श्लोकार्थ—जो दुष्ट अपना ही पोषण करने वाला प्राणियों के प्रति निर्दयी है । वह पुरुष, स्त्री अथवा नपुंसक कोई भी हो, राजाओं के लिये उसका मारना पाप नहीं है ॥

सप्तविंशः श्लोकः

त्वां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः ।
आत्मयोगबलेनेमा धारयिष्याम्यहं प्रजाः ॥२७॥

पदच्छेद—

त्वाम् स्तब्धाम् दुर्मदाम् नीत्वा मायागाम् तिलशः शरैः ।
आत्म योग बलेन इमाः धारयिष्यामि अहम् प्रजाः ॥

शब्दार्थ—

त्वाम्	५.	तुझे	आत्म	९.	अपने
स्तब्धाम्	३.	गर्वीली एवं	योग	१०.	योग के
दुर्मदाम्	४.	मदोन्मत्ता	बलेन	११.	प्रभाव से
नीत्वा	८.	करके	इमाः	१२.	इन
मायागाम्	२.	माया से गोरूप धारिणी	धारयिष्यामि	१४.	पोषण करूँगा
तिलशः	७.	खण्ड-खण्ड	अहम्	१.	मैं
शरैः	६.	अपने बाणों से	प्रजाः ॥	१३.	प्रजाओं का

श्लोकार्थ—मैं माया से गोरूपधारिणी गर्वीली एवम् मदोन्मत्ता तुझे अपने बाणों से खण्ड-खण्ड करके अपने योग के प्रभाव से इन प्रजाओं का पोषण करूँगा ॥

अष्टाविंशः श्लोकः

एवं मन्युमयीं मूर्तिं कृतान्तमिव बिभ्रतम् ।
प्रणता प्राञ्जलिः प्राह मही सञ्जातवेपथुः ॥२८॥

पदच्छेद—

एवम् मन्युमयीम् मूर्तिम् कृतान्तम् इव बिभ्रतम् ।
प्रणता प्राञ्जलिः प्राह मही सञ्जात वेपथुः ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	प्रणता	१०.	विनीत भाव से
मन्युमयीम्	४.	क्रोधमयी	प्राञ्जलिः	११.	हाथ जोड़कर
मूर्तिम्	५.	मूर्ति	प्राह	१२.	बोली
कृतान्तम्	२.	काल की	मही	९.	पृथ्वी
इव	३.	भाँति	सञ्जात	८.	हुई
बिभ्रतम् ।	६.	धारण किये हुये पृथु से	वेपथुः ॥	७.	काँपती

श्लोकार्थ—इस प्रकार काल की भाँति क्रोधमयी मूर्ति धारण किये हुये पृथु से काँपती हुई पृथ्वी विनीतभाव से हाथ जोड़कर बोली ॥

एकोनत्रिंशः श्लोकः

धरोवाच—नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने ।
नमः स्वरूपानुभवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये ॥२९॥

पदच्छेद— नमः परस्मै पुरुषाय मायया विन्यस्त नाना तनवे गुण आत्मने ।
नमः स्वरूप अनुभवेन निर्धुत द्रव्य क्रिया कारक विभ्रम ऊर्मये ॥

शब्दार्थ—

नमः	१८.	नमस्कार है	नमः	१७.	बार-बार
परस्मै	१५.	आप परम	स्वरूप	७.	आत्मस्वरूप के
पुरुषाय	१६.	पुरुष को	अनुभवेन	८.	अनुभव के कारण (आप)
मायया	१.	(अपनी) माया से	निर्धुत	१४.	सर्वथा रहित हैं
विन्यस्त	४.	धारण कर	द्रव्य	९.	अधिभूत
नाना	२.	अनेक प्रकार के	क्रिया	१०.	अध्यात्म (और)
तनवे	३.	शरीर	कारक	११.	अधिदेव के
गुण	६.	निर्गुण (जान पड़ते हैं)	विभ्रम	१२.	अभिमान (तथा)
आत्मने ।	५.	स्वयम्	ऊर्मये ॥	१३.	रागद्वेषादि तरंगों से

श्लोकार्थ—अपनी माया से अनेक प्रकार के शरीर धारण कर स्वयम् निर्गुण जान पड़ते हैं। वस्तुतः आत्मस्वरूप के अनुभव के कारण आप अधिभूत, अध्यात्म और अधिदेव के अभिमान तथा रागद्वेषादि तरंगों से सर्वथा रहित हैं। आप परम पुरुष को बार-बार नमस्कार है ॥

त्रिंशः श्लोकः

येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसङ्ग्रहः ।
स एव मां हन्तुमुदायुधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये ॥३०॥

पदच्छेद— येन अहम् आत्म आयतनम् विनिर्मिता धात्रा यतः अयम् गुण सर्गसंग्रहः ।
सः एव माम् हन्तुम् उदायुधः स्वराड् उपस्थितः अन्यम् शरणम् कम् आश्रये ॥

शब्दार्थ—

येन	१.	जिस आप	सः	११.	वही
अहम् आत्म	३.	मुझे सम्पूर्ण जीवों का	एव	१०.	जब
आयतनम्	४.	आश्रय	माम् हन्तुम्	१४.	मुझे मारने के लिये
विनिर्मिता	५.	बनाया है (तथा)	उदायुधः	१३.	शस्त्र उठाकर
धात्रा	२.	विधाता ने	स्वराड्	१२.	स्वयम् प्रकाश प्रभु
यतः	६.	जिस आप से ही	उपस्थितः	१५	तैयार हो गये हैं
अयम्	७.	यह	अन्यम् शरणम्	१७	दूसरे की शरण में
गुण	८.	त्रिगुणात्मक	कम्	१६.	तब मैं किस
सर्गसंग्रहः ।	९.	सृष्टि निर्मित है	आश्रये ॥	१८.	जाऊँ

श्लोकार्थ—जिस आप विधाता ने मुझे सम्पूर्ण जीवों का आश्रय बनाया है तथा जिस आपसे ही यह त्रिगुणात्मक सृष्टि निर्मित है, जब वही स्वयं प्रकाश प्रभु शस्त्र उठाकर मुझे मारने लिये तैयार हो गये हैं तब मैं किस दूसरे की शरण में जाऊँ ॥

एकत्रिंशः श्लोकः

य एतदादावसृजच्चराचरं स्वमाययाऽऽत्माश्रययाविचिन्त्यया ।
तयैव सोऽयं किल गोप्तुमुद्यतः कथं नु मां धर्मपरो जिघांसति ॥३१॥

पदच्छेद—यः एतद् आदौ असृजत् चर अचरम् स्व मायया आत्म आश्रयया अवितर्क्यया ।
तया एव सः अयम् किल गोप्तुम् उद्यतः कथम् नु माम् धर्मपरः जिघांसति ॥

शब्दार्थ—

यः	२.	जिस आपने	अवितर्क्यया	६.	अनिर्वचनीय
एतद्	८.	यह	तया एव	१३.	उस माया के द्वारा
आदौ	१.	कल्प के प्रारम्भ में	सः अयम्	१२.	और वही आप
असृजत्	११.	रचा है	किल गोप्तुम्	१४.	ही इसका पालन करने के लिये
चर	१०.	चेतन जगत्	उद्यतः	१५.	तैयार हुये हैं
अचरम्	९.	जड़	कथम्	१९.	किस प्रकार
स्व	५.	अपनी	नु	१६.	फिर भला
मायया	७.	माया से	माम्	१८.	मुझ गोरूपधारिणी को
आत्म	३.	अपने में	धर्मपरः	१७.	धर्म परायण (आप)
आश्रयया	४.	रहने वाली	जिघांसति ॥	२०.	मारना चाहते हैं

श्लोकार्थ—कल्प के प्रारम्भ में जिस आपने अपने में रहने वाली अनिर्वचनीय अपनी माया से यह जड़ चेतन-जगत् रचा है । और वही आप उस माया के द्वारा ही इसका पालन करने के लिये तैयार हुये हैं । फिर भला धर्मपरायण आप मुझ गोरूपधारिणी को किस प्रकार मारना चाहते हैं ॥

द्वात्रिंशः श्लोकः

नूनं बतेशस्य समीहितं जनैस्तन्मायया दुर्जययाकृतात्मभिः ।
न लक्ष्यते यस्त्वकरोदकारयद्योऽनेक एकः परतश्च ईश्वरः ॥३२॥

पदच्छेद—नूनम् बत ईशस्य समीहितम् जनैः तद् मायया दुर्जयया अकृत आत्मभिः ।
न लक्ष्यते यः तु अकरोत् अकारयत् यः अनेकः एकः परतः च ईश्वरः ॥

शब्दार्थ—

नूनम्	४.	अवश्य	न लक्ष्यते	५.	नहीं जान सकते हैं
बत	१.	खेद है कि	यः तु	११.	जिस आपने तो (ब्रह्मा जी को)
ईशस्य	२.	परमेश्वर (आपकी)	अकरोत्	१२.	उत्पन्न किया है (और उन से)
समीहितम् जनैः	३.	लीला को अज्ञानी लोग	अकारयत् यः	१३.	सृष्टि रचाई हैं जो आप
तद्	६.	क्योंकि आपकी	अनेकः	१५.	अनेक रूप जान पड़ते हैं
मायया	८.	माया से	एकः	१४.	एक होकर भी (माया से)
दुर्जयया	७.	अजेय	परतः	१७.	परात्पर
अकृत	१०.	भ्रान्त रहती है	च	१६.	अतः आप
आत्मभिः ।	९.	उनकी बुद्धि	ईश्वरः ॥	१८.	सर्वेश्वर हैं

श्लोकार्थ—खेद है कि परमेश्वर आपकी लीला को अज्ञानी लोग अवश्य नहीं जान सकते हैं । क्योंकि आपकी अजेय माया से उनकी बुद्धि भ्रान्त रहती है । जिस आपने तो ब्रह्मा जी को उत्पन्न किया है और उनसे सृष्टि रचाई है, जो आप एक होकर भी अनेक रूप जान पड़ते हैं । अतः आप परात्पर सर्वेश्वर हैं ॥

त्रयस्त्रिंशः श्लोकः

सर्गादि योऽस्यानुरुणद्धि शक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः ।
तस्मै समुन्नद्धनिरुद्धशक्तये नमः परस्मै पुरुषाय वेधसे ॥३३॥

पदच्छेद—सर्ग आदि यः अस्य अनुरुणद्धि शक्तिभिः द्रव्य क्रिया कारक चेतन आत्मभिः ।
तस्मै समुन्नद्ध निरुद्ध शक्तये नमः परस्मै पुरुषाय वेधसे ॥

शब्दार्थ—

सर्ग आदि	७	सृष्टि स्थिति और संहार	तस्मै	१५.	उस आप को
यः	१.	जो आप	समुन्नद्ध	१०.	आविर्भाव और
अस्य	६.	इस जगत् की क्रमशः	निरुद्ध	११.	तिरोभाव से युक्त
अनुरुणद्धि	८.	करते हैं (तथा)	शक्तये	६.	यथा समय शक्तियों के
शक्तिभिः	५.	अपनी शक्तियों के द्वारा	नमः	१६	प्रणाम है
द्रव्य	२.	पञ्चमहाभूत	परस्मै	१३.	परम
क्रिया कारक	३.	इन्द्रिय उनके देवता	पुरुषाय	१४.	पुरुष
चेतन आत्मभिः ।	४	बुद्धि और अहंकार रूप	वेधसे ॥	१२.	जगत् विधाता

श्लोकार्थ—जो आप पञ्च महाभूत, इन्द्रिय, उनके देवता, बुद्धि और अहंकार रूप अपनी शक्तियों के द्वारा इस जगत् की क्रमशः सृष्टि, स्थिति और संहार करते हैं तथा यथा समय आविर्भाव और तिरोभाव से युक्त जगद्विधाता, परम पुरुष उस आपको प्रणाम है ॥

चतुस्त्रिंशः श्लोकः

स वै भवानात्मविनिर्मितं जगद् भूतेन्द्रियान्तःकरणात्मकं विभो ।
संस्थापयिष्यन्नज मां रसातलादभ्युज्जहाराम्भस आदिसूकरः ॥३४॥

पदच्छेद—सः वै भवान् आत्म विनिर्मितम् जगत् भूत इन्द्रिय अन्तःकरण आत्मकम् विभो ।
संस्थापयिष्यन् अज माम् रसातलात् अभ्युज्जहार अम्भसः आदि सूकरः ॥

शब्दार्थ—

सः वै	३.	वही	संस्थापयिष्यन्	१०.	स्थिति के लिये
भवान् आत्म	४.	आप अपने	अज	१.	अजन्मा
तम्	५.	रचे हुये	माम्	१३.	मुझे
जगत्	६.	जगत् की	रसातलात्	१४.	रसातल से
भूत इन्द्रिय	६.	पञ्चमहाभूत इन्द्रिय और	अभ्युज्जहार	१६.	लाये थे
अन्तः करण	७.	अन्तःकरण	अम्भसः	१५	जल के बाहर
आत्मकम्	८.	स्वरूप	आदि	११.	आदि
विभो ।	२.	हे प्रभो	सूकर ॥	१२.	वराह रूप होकर

श्लोकार्थ—अजन्मा हे प्रभो ! वही आप अपने रचे हुये पञ्च महाभूत, इन्द्रिय और अन्तःकरण स्वरूप जगत् की स्थिति के लिये आदि वराह रूप होकर मुझे रसातल से जल के बाहर लाये थे ॥

पञ्चत्रिंशः श्लोकः

अपामुपस्थे मयि नाव्यवस्थिताः प्रजा भवानद्य रिरक्षिषुः किल ।
स वीरमूर्तिः समभूद्धराधरो यो मां पयस्युग्रशरो जिघांससि ॥३५॥

पदच्छेद— अपाम् उपस्थे मयि नावि आस्थिताः प्रजाः भवान् अद्य रिरक्षिषुः किल ।
सः वीर मूर्तिः समभूत् धराधरः यः माम् पयसि उग्रशरः जिघांससि ॥

शब्दार्थ—

अपाम्	२.	जल से मेरा	वीर मूर्तिः	१३.	वीरभाव से
उपस्थे	३.	उद्धार किये थे	समभूत्	५.	पाये थे
मयि	१०.	मुझ पर	धराधरः	४.	(और) धरणी धर नाम
नावि	९.	नौका के समान	यः	१.	जो आप
आस्थिताः प्रजाः	११.	आश्रित प्रजा की	माम्	१५.	मुझे
भवान् अद्य	७.	आप आज	पयसि	८.	जल से
रिरक्षिषुः किल ।	१२.	रक्षा करने के लिये ही	उग्रशरः	१४.	तीखे बाण चढ़ाकर
सः	६.	वही	जिघांससि ॥	१६.	मारना चाहते हैं

श्लोकार्थ—जो आप जल से मेरा उद्धार किये थे और धरणीधर नाम पाये थे, वही आप आज जल में नौका के समान मुझ पर आश्रित प्रजा की रक्षा करने के लिये वीरभाव से तीखे बाण चढ़ाकर मारना चाहते हैं ॥

षट्त्रिंशः श्लोकः

नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ।
न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयशस्करेभ्यः ॥३६॥

पदच्छेद— नूनम् जनैः ईहितम् ईश्वराणाम् अस्मद् विधैः तद् गुण सर्ग मायया ।
न ज्ञायते मोहित चित्त वर्त्मभिः तेभ्यः नमः वीर यशस्करेभ्यः ॥

शब्दार्थ—

नूनम्	११.	अवश्य	न	१२.	नहीं
जनैः	८.	लोग	ज्ञायते	१३.	जानते हैं
ईहितम्	१०.	लीला को	मोहित	४.	मोहित
ईश्वराणाम्	९.	परमात्मा की	चित्त	५.	चित्त
अस्मद् विधैः	७	हमारे जैसे	वर्त्मभिः	६.	वृत्ति वाले
तद्	२.	उन आपकी	तेभ्यः नमः	१६.	उन आप को नमस्कार है
गुण सर्ग	१.	त्रिगुणात्मक सृष्टि करने वाली	वीर	१४.	अतः वीरोचित
मायया ।	३.	माया से	यशस् करेभ्यः ॥	१५.	कीर्ति करने वाले

श्लोकार्थ—त्रिगुणात्मक सृष्टि करने वाली उन आपकी माया से मोहित चित्त वृत्ति वाले हमारे जैसे लोग परमात्मा की लीला को अवश्य नहीं जानते हैं; अतः वीरोचित कीर्ति करने वाले उन आपको नमस्कार है ।

इति श्रीमद्भागवते महापुराणे पारहंस्यां संहितायां चतुर्थस्कन्धे पृथुविजये धरित्रीनिग्रहो नाम सप्तदशोऽध्यायः ॥१७॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

चतुर्थः स्कन्धः

अष्टादशः अध्यायः

प्रथमः श्लोकः

मैत्रेय उवाच—इत्थं पृथुमभिष्टूय रुषा प्रस्फुरिताधरम् ।
पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना ॥१॥

पदच्छेद—

इत्थम् पृथुम् अभिष्टूय रुषा प्रस्फुरित अधरम् ।
पुनः आह अवनिः भीता संस्तभ्य आत्मानम् आत्मना ॥

शब्दार्थ—

इत्थम्	५.	इस प्रकार	पुनः आह	१२.	फिर से बोली
पृथुम्	४.	महाराज पृथु की	अवनिः	८.	पृथ्वी
अभिष्टूय	६.	स्तुति करके	भीता	७.	डरी हुई
रुषा	१.	क्रोध से	संस्तभ्य	११.	ढाढस देकर
प्रस्फुरित	२.	फड़कते	आत्मानम्	१०.	मन को
अधरम् ।	३.	होंठ वाले	आत्मना ॥	९.	बुद्धि से

श्लोकार्थ—क्रोध से फड़कते होंठ वाले महाराज पृथु की इस प्रकार स्तुति करके डरी हुई पृथ्वी बुद्धि से मन को ढाढस देकर फिर से बोली ॥

द्वितीयः श्लोकः

संनियच्छाभिभो मन्युं निबोध श्रावितं च मे ।
सर्वतः सारमादत्ते यथा मधुकरो बुधः ॥२॥

पदच्छेद—

संनियच्छ अभि भो मन्युम् निबोध श्रावितम् च मे ।
सर्वतः सारम् आदत्ते यथा मधुकरः बुधः ॥

शब्दार्थ—

संनियच्छ	४.	शान्त कीजिये	मे ।	६.	मेरी
अभि	२.	प्रभो	सर्वतः	१२.	सभी जगह से
भो	१.	हे	सारम्	१३.	सार तत्त्व
मन्युम्	३.	अपना क्रोध	आदत्ते	१४.	ग्रहण कर लेते हैं
निबोध	८.	सुनिये	यथा	११.	समान
श्रावितम्	७.	प्रार्थना	मधुकरः	१०.	भ्रमर के
च	५.	और	बुधः ॥	९.	बुद्धिमान् जन

श्लोकार्थ—हे प्रभो ! अपना क्रोध शान्त कीजिये और मेरी प्रार्थना सुनिये । बुद्धिमान् जन भ्रमर के समान सभी जगह से सार तत्त्व ग्रहण कर लेते हैं ॥

तृतीयः श्लोकः

अस्मिँल्लोकेऽथवामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः ।
दृष्टा योगाः प्रयुक्ताश्च पुंसां श्रेयःप्रसिद्धये ॥३॥

पदच्छेद—

अस्मिन् लोके अथवा अमुष्मिन् मुनिभिः तत्त्व दर्शिभिः ।
दृष्टाः योगाः प्रयुक्ताः च पुंसां श्रेयः प्रसिद्धये ॥

शब्दार्थ—

अस्मिन्	४.	इस	दृष्टाः	१२.	बताये हैं
लोके	५.	लोक में	योगाः	११.	अनेक उपाय
अथवा	६.	और	प्रयुक्ताः	१४.	प्रयोग किये हैं
अमुष्मिन्	७.	परलोक में	च	१३.	और (उनका)
मुनिभिः	३.	मुनियों ने	पुंसां	८.	मनुष्यों के
तत्त्व	१.	वस्तु स्वरूप को	श्रेयः	९.	कल्याण की
दर्शिभिः ।	२.	साक्षात् करने वाले	प्रसिद्धये ॥	१०.	सिद्धि के लिये

श्लोकार्थ—वस्तु स्वरूप को साक्षात् करने वाले मुनियों ने इस लोक में और परलोक में मनुष्यों के कल्याण की सिद्धि के लिये अनेक उपाय बताये हैं और प्रयोग किये हैं ॥

चतुर्थः श्लोकः

तानातिष्ठति यः सम्यगुपायान् पूर्वदर्शितान् ।
अवरः श्रद्धयोपेत उपेयान् विन्दतेऽञ्जसा ॥४॥

पदच्छेद—

तान् आतिष्ठति यः सम्यग् उपायान् पूर्वदर्शितान् ।
अवरः श्रद्धया उपेतः उपेयान् विन्दते अञ्जसा ॥

शब्दार्थ—

तान्	१.	उन	अवरः	४.	इस समय (भी)
आतिष्ठति	९.	आचरण करता है	श्रद्धया	६.	श्रद्धा से
यः	५.	जो पुरुष	उपेतः	७.	युक्त होकर
सम्यग्	८.	भली भाँति	उपेयान्	११.	अभीष्ट फल
उपायान्	३.	उपायों का	विन्दते	१२.	प्राप्त करता है
पूर्वदर्शितान् ।	२.	प्राचीन ऋषियों के बताये हुये	अञ्जसा ॥	१०.	वह सुगमता से

श्लोकार्थ—उन प्राचीन ऋषियों के बताये हुये उपायों का इस समय भी जो पुरुष श्रद्धा से युक्त होकर भली भाँति आचरण करता है, वह सुगमता से अभीष्ट फल प्राप्त करता है ॥

पञ्चमः श्लोकः

तान नादृत्य योऽविद्वानर्थानारभते स्वयम् ।
तस्य व्यभिचरन्त्यर्था आरब्धाश्च पुनः पुनः ॥५॥

पदच्छेद—

तान् अनादृत्य यः अविद्वान् अर्थान् आरभते स्वयम् ।
तस्य व्यभिचरन्ति अर्थाः आरब्धाः च पुनः पुनः ॥

शब्दार्थ—

तान्	२.	उन (शास्त्रोक्त) उपायों का	तस्य	७.	उसके
अनादृत्य	३.	अनादर करके	व्यभिचरन्ति	१२.	निष्फल होते हैं
यः अविद्वान्	१.	(परन्तु) जो अज्ञानी पुरुष	अर्थाः	८.	सभी उपाय
अर्थान्	५.	उपायों का	आरब्धाः	१०.	प्रयत्न
आरभते	६.	सहारा लेता है	च	९.	और
स्वयम् ।	४.	अपने मनः कल्पित	पुनः पुनः ॥	११.	बार-बार

श्लोकार्थ—परन्तु जो अज्ञानी पुरुष उन शास्त्रोक्त उपायों का अनादर करके अपने मनः कल्पित उपायों का सहारा लेता है, उसके सभी उपाय और प्रयत्न बार-बार निष्फल होते हैं ॥

षष्ठः श्लोकः

पुरा सृष्टा ह्योषधयो ब्रह्मणा या विशाम्पते ।
भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः ॥६॥

पदच्छेद—

पुरा सृष्टाः हि ओषधयः ब्रह्मणा याः विशाम्पते ।
भुज्यमाना मया दृष्टाः असद्भिः अधृत व्रतैः ॥

शब्दार्थ—

पुरा	२.	पूर्वकाल में	भुज्यमाना	१२.	खाये जा रहे हैं
सृष्टाः	५.	उत्पन्न किया	मया	६.	मैंने
हि	११.	ही (उन्हें)	दृष्टाः	७.	देखा कि
ओषधयः	४.	धान्य आदि को	असद्भिः	१०.	दुराचारी लोग
ब्रह्मणा याः	३.	ब्रह्मा जी ने जिन	अधृत	९.	पालन न करने वाले
विशाम्पते	१.	हे राजन्	व्रतैः ॥	८.	व्रतों का

श्लोकार्थ—हे राजन् ! पूर्वकाल में ब्रह्मा जी ने जिन धान्य आदि को उत्पन्न किया था, मैंने देखा कि व्रतों का पालन न करने वाले दुराचारी लोग ही उन्हें खाये जा रहे हैं ॥

सप्तमः श्लोकः

अपालितानादृता च भवद्भिर्लोकपालकैः ।
चोरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः ॥७॥

पदच्छेद—

अपालिता अनादृता च भवद्भिः लोक पालकैः ।
चोरी भूते अथ लोके अहम् यज्ञार्थे अग्रसम् ओषधीः ॥

शब्दार्थ—

अपालिता	४.	पालन नहीं किया	चोरी भूते	८.	चोरों के सामान हो गये
अनादृता	६.	अनादर किया	अथ लोके	७.	तदन्तर सब लोग
च	५.	और	अहम्	९.	(इसी से) मैंने
भवद्भिः	१.	आप	यज्ञार्थे	१०.	यज्ञ के लिये
लोक	२.	प्रजा	अग्रसम्	१२.	(अपने में) छिपा लिया है
पालकैः ।	३.	पालकों ने (मेरा)	ओषधीः ॥	११.	ओषधियों को

श्लोकार्थ—आप प्रजा पालकों ने मेरा पालन नहीं किया । तदनन्तर सब लोग चोरों के समान हो गये । इसी से मैंने यज्ञ के लिये ओषधियों को अपने में छिपा लिया है ॥

अष्टमः श्लोकः

नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा ।
तत्र योगेन दृष्टेन भवानादातुमर्हति ॥८॥

पदच्छेद—

नूनम् ताः वीरुधः क्षीणाः मयि कालेन भूयसा ।
तत्र योगेन दृष्टेन भवान् आदातुम् अर्हति ॥

शब्दार्थ—

नूनम्	५.	अवश्य	तत्र	१०.	उन्हें वहाँ से
ताः वीरुधः	४.	वे ओषधियाँ	योगेन	९.	उपायों के द्वारा
क्षीणाः	६.	नष्ट हो गईं हैं	दृष्टेन	८.	पूर्वाचार्यों के बतलाये
मयि	३.	मेरे उदर में	भवान्	७.	आप
कालेन	२.	समय हो जाने से	आदातुम्	११.	निकाल लेने में
भूयसा ।	१.	(अब) अधिक	अर्हति ॥	१२.	समर्थ हैं

श्लोकार्थ—अब अधिक समय हो जाने से मेरे उदर में वे ओषधियाँ अवश्य नष्ट हो गई हैं । आप पूर्वाचार्यों के बतलाये उपायों के द्वारा उन्हें वहाँ से निकाल लेने में समर्थ हैं ॥

नवमः श्लोकः

वत्सं कल्पय मे वीर येनाहं वत्सला तव ।
धोक्ष्ये क्षीरमयान् कामाननुरूपं च दोहनम् ॥९॥

पदच्छेद—

वत्सम् कल्पय मे वीर येन अहम् वत्सला तव ।
धोक्ष्ये क्षीरमयान् कामान् अनुरूपम् च दोहनम् ॥

शब्दार्थ—

वत्सम्	४.	बछड़ा	तव ।	११.	आपको
कल्पय	७.	व्यवस्था करें	धोक्ष्ये	१४.	दे दूँगी
मे	२.	मेरे	क्षीरमयान्	१२.	दूध के रूप में
वीर	१.	हे वीर (आप)	कामान्	१३.	सभी अभीष्ट वस्तुएँ
येन	८.	जिसमें	अनुरूपम्	३.	योग्य
अहम्	९.	मैं	च	५.	और
वत्सला	१०.	पिन्हाकर	दोहनम् ॥	६.	दोहनपात्र की

श्लोकार्थ—हे वीर ! आप मेरे योग्य बछड़ा और दोहनपात्र की व्यवस्था करें । जिससे पिन्हाकर आपको दूध के रूप में सभी अभीष्ट वस्तुएँ दे दूँगी ॥

दशमः श्लोकः

दोग्धारं च महाबाहो भूतानां भूतभावन ।
अन्नमीप्सितमूर्जस्वद्भगवान् वाञ्छते यदि ॥१०॥

पदच्छेद—

दोग्धारम् च महाबाहो भूतानाम् भूत भावन ।
अन्नम् ईप्सितम् ऊर्जस्वत् भगवान् वाञ्छते यदि ॥

शब्दार्थ—

दोग्धारम्	११.	दूहने की	अन्नम्	९.	अन्न
च	१२.	व्यवस्था करें	ईप्सितम्	७.	अभीष्ट (और)
महाबाहो	१.	लम्बी बाँह वाले	ऊर्जस्वत्	८.	शक्ति प्रद
भूतानाम्	६.	प्राणियों के लिये	भगवान्	५.	आप
भूत	२.	प्राणिमात्र के	वाञ्छते	१०.	चाहते हैं (तो)
भावनः ।	३.	रक्षक हे महाराज	यदि ॥	४.	अगर

श्लोकार्थ—लम्बी बाँह वाले प्राणिमात्र के रक्षक हे महाराज ! अगर आप प्राणियों के लिये अभीष्ट और शक्तिप्रद अन्न चाहते हैं तो दूहने की व्यवस्था करें ॥

एकादशः श्लोकः

समां च कुरु मां राजन्देववृष्टं यथा पयः ।
अपर्तावपि भद्रं ते उपावर्तेत मे विभो ॥११॥

पदच्छेद—

समाम् च कुरु माम् राजन् देव वृष्टम् यथा पयः ।
अपर्तौ अपि भद्रम् ते उपावर्तेत मे विभो ॥

शब्दार्थ—

समाम्	५.	समतल	पयः ।	११.	जल
च	१.	तथा	अपर्तौ	१२.	वर्षा ऋतु के बाद
कुरु	६.	कर दें	अपि	१३.	भी
माम्	४.	(आप) मुझे	भद्रम्	१५.	कल्याण
राजन्	३.	हे महाराज पृथु	ते	१४.	आपकी प्रजा का
देव	८.	वर्षा से	उपावर्तेत	१६.	कर सकें
वृष्टम्	९.	प्राप्त	मे	१०.	मेरा
यथा	७.	ताकि	विभो ॥	२.	सर्व समर्थ

श्लोकार्थ—तथा सर्व समर्थ हे महाराज पृथु ! आप मुझे समतल कर दें । ताकि वर्षा से प्राप्त मेरा जल वर्षा ऋतु के बाद भी आपकी प्रजा का कल्याण कर सके ॥

द्वादशः श्लोकः

इति प्रियं हितं वाक्यं भुव आदाय भूपतिः ।
वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः ॥१२॥

पदच्छेद—

इति प्रियम् हितम् वाक्यम् भुवः आदाय भूपतिः ।
वत्सम् कृत्वा मनुम् पाणौ अदुहत् सकल ओषधीः ॥

शब्दार्थ—

इति	२.	ऐसा	वत्सम्	९.	बछड़ा
प्रियम्	३.	मन पसन्द (व)	कृत्वा	१०.	बनाया (और)
हितम्	४.	हितकारी	मनुम्	८.	मनु महाराज को
वाक्यम्	५.	वचन	पाणौ	११.	अपने हाथ पर
भुवः	१.	पृथ्वी देवी का	अदुहत्	१४.	दुह लीं
आदाय	६.	सुनने पर	सकल	१२.	(उससे) सारी
भूपतिः ।	७.	महाराज पृथु ने	ओषधीः ॥	१३.	वनस्पतियाँ अन्नादि

श्लोकार्थ—पृथ्वी देवी का ऐसा मन पसन्द व हितकारी वचन सुनने पर महाराज पृथु ने मनु महाराज को बछड़ा बनाया और अपने हाथ पर उससे सारी अन्नादि वनस्पतियाँ दुह लीं ॥

त्रयोदशः श्लोकः

तथा परे च सर्वत्र सारमाददते बुधाः ।
ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम् ॥१३॥

पदच्छेद—

तथा परे च सर्वत्र सारम् आददते बुधाः ।
ततः अन्ये च यथाकामम् दुदुहुः पृथु भाविताम् ॥

शब्दार्थ—

तथा	१.	तथा (पृथु के)	ततः	८.	इसलिये
परे	३.	दूसरे	अन्ये	९.	दूसरे जन
च	२.	समान	च	१०.	भी
सर्वत्र	५.	सब जगह से	यथाकामम्	१३.	इच्छानुसार
सारम्	६.	सार अंश	दुदुहुः	१४.	दुहने लगे
आददते	७.	ग्रहण कर लेते हैं	पृथु	११.	महाराज पृथु के
बुधाः ।	४.	चतुर ज्ञानी लोग	भाविताम् ॥	१२.	वशीभूत वसुधा को

श्लोकार्थ—तथा राजा पृथु के समान दूसरे चतुर ज्ञानी लोग सब जगह से सार अंश ग्रहण कर लेते हैं । इसीलिये दूसरे जन भी महाराज पृथु के वशीभूत वसुधा को इच्छानुसार दुहने लगे ॥

चतुर्दशः श्लोकः

ऋषयो दुदुहुर्देवीमिन्द्रियेष्वथ सत्तम ।
वत्सं बृहस्पतिं कृत्वा पयश्छन्दोमयं शुचि ॥१४॥

पदच्छेद—

ऋषयः दुदुहुः देवीम् इन्द्रियेषु अथ सत्तम ।
वत्सम् बृहस्पतिम् कृत्वा पयः छन्दोमयम् शुचि ॥

शब्दार्थ—

ऋषयः	३.	ऋषियों ने	वत्सम्	५.	बछड़ा
दुदुहुः	१२.	दुहा	बृहस्पतिम्	४.	आचार्य बृहस्पति को
देवीम्	८.	पृथ्वी देवी से	कृत्वा	६.	बनाकर
इन्द्रियेषु	७.	मन, वाणी और श्रवण में	पयः	११.	दूध
अथ	२.	तदनन्तर	छन्दोमयम्	९.	वेदस्वरूप
सत्तम ।	१.	साधु श्रेष्ठ हे विदुर	शुचि ॥	१०.	पवित्र

श्लोकार्थ—साधुश्रेष्ठ हे विदुर ! तदनन्तर ऋषियों ने आचार्य बृहस्पति को बछड़ा बनाकर मन, वाणी और श्रवण में वेद स्वरूप पवित्र दूध दुहा ॥

पञ्चदशः श्लोकः

कृत्वा वत्सं सुरगणा इन्द्रं सोममदूदुहन्।
हिरण्मयेन पात्रेण वीर्यमोजो बलं पयः ॥१५॥

पदच्छेद—

कृत्वा वत्सम् सुरगणाः इन्द्रम् सोमम् अदूदुहन् ।
हिरण्मयेन पात्रेण वीर्यम् ओजो बलम् पयः ॥

शब्दार्थ—

कृत्वा	४.	बनाकर	हिरण्मयेन	५.	सुवर्ण के
वत्सम्	३.	बछड़ा	पात्रेण	६.	पात्र में
सुरगणाः	१.	देवताओं ने	वीर्यम्	८.	मनोबल
इन्द्रम्	२.	इन्द्र को	ओजो	९.	इन्द्रियबल और
सोमम्	७.	अमृत	बलम्	१०.	शारीरिक बल रूप
अदूदुहन् ।	१२.	दुहा	पयः ॥	११.	दूध

श्लोकार्थ—देवताओं ने इन्द्र को बछड़ा बनाकर सुवर्ण के पात्र में अमृत, मनोबल, इन्द्रियबल और शारीरिक बल रूप दूध दुहा ॥

षोडशः श्लोकः

दैतेया दानवा वत्सं प्रह्लादमसुरर्षभम् ।
विधायादूदुहन् क्षीरमयःपात्रे सुरासवम् ॥१६॥

पदच्छेद—

दैतेयाः दानवाः वत्सम् प्रह्लादम् असुर ऋषभम् ।
विधाय अदूदुहन् क्षीरम् अयः पात्रे सुरा आसवम् ॥

शब्दार्थ—

दैतेयाः	१.	दैत्यों और	विधाय	७.	बनाकर
दानवाः	२.	दानवों ने	अदूदुहन्	१२.	दुहा
वत्सम्	६.	बछड़ा	क्षीरम्	११.	दूध
प्रह्लादम्	५.	प्रह्लाद जी को	अयः	८.	लोहे के
असुर	३.	असुरों में	पात्रे	९.	पात्र में
ऋषभम् ।	४.	श्रेष्ठ	सुरा आसवम् ॥	१०.	मदिरा और ताड़ी आदि के रूप में

श्लोकार्थ—दैत्यों और दानवों ने असुरों में श्रेष्ठ प्रह्लाद जी को बछड़ा बनाकर लोहे के पात्र में मदिरा और ताड़ी आदि के रूप में दूध दुहा ॥

सप्तदशः श्लोकः

गन्धर्वाप्सरसोऽधुक्षन् पात्रे पद्ममये पयः।
वत्सं विश्वावसुं कृत्वा गान्धर्वं मधु सौभगम् ॥१७॥

पदच्छेद—

गन्धर्व अप्सरसः अधुक्षन् पात्रे पद्ममये पयः।
वत्सम् विश्वावसुम् कृत्वा गान्धर्वम् मधु सौभगम् ॥

शब्दार्थ—

गन्धर्व	१. गन्धर्व और	वत्सम्	४. बछड़ा
अप्सरसः	२. अप्सराओं ने	विश्वावसुम्	३. विश्वावसु को
अधुक्षन्	१२. दुहा	कृत्वा	५. बनाकर
पात्रे	७. पात्र में	गान्धर्वम्	८. संगीत का (और)
पद्ममये	६. कमल के	मधु	९. मधुर
पयः।	११. दूध	सौभगम् ॥	१०. सौन्दर्य का

श्लोकार्थ—गन्धर्व और अप्सराओं ने विश्वावसु को बछड़ा बनाकर कमल के पात्र में संगीत और सौन्दर्य का दूध दुहा ॥

अष्टादशः श्लोकः

वत्सेन पितरोऽर्यम्णा कव्यं क्षीरमधुक्षत।
आमपात्रे महाभागाः श्रद्धया श्राद्धदेवताः ॥१८॥

पदच्छेद—

वत्सेन पितरः अर्यम्णा कव्यम् क्षीरम् अधुक्षत।
आम पात्रे महाभागाः श्रद्धया श्राद्ध देवताः ॥

शब्दार्थ—

वत्सेन	६. बछड़े से	आम	७. मिट्टी के कच्चे
पितरः	४. पितरों ने	पात्रे	८. पात्र में
अर्यम्णा	५. अर्यमा नाम के	महाभागः	१. बड़भागी
कव्यम्	१०. पितृ अन्न रूप	श्रद्धया	९. श्रद्धा के साथ
क्षीरम्	११. दूध	श्राद्ध	२. श्राद्ध कर्म के
अधुक्षत।	१२. दुहा	देवताः ॥	३. देवता

श्लोकार्थ—बड़भागी श्राद्ध कर्म के देवता पितरों ने अर्यमा नाम के बछड़े से मिट्टी के कच्चे पात्र में श्रद्धा के साथ पितृ अन्नरूप दूध दुहा ॥

एकोनविंशः श्लोकः

प्रकल्प्य वत्सं कपिलं सिद्धाः सङ्कल्पनामयीम् ।
सिद्धिं नभसि विद्यां च ये च विद्याधरादयः ॥१९॥

पदच्छेद—

प्रकल्प्य वत्सम् कपिलम् सिद्धाः संकल्पनामयीम् ।
सिद्धिम् नभसि विद्याम् च ये च विद्याधर आदयः ॥

शब्दार्थ—

प्रकल्प्य	४.	बनाकर	नभसि	५	आकाशरूप पात्र में
वत्सम्	३	बछड़ा	विद्याम्	१२.	अन्तर्धानादि विद्या को दुहा
कपिलम्	२	कपिलदेव जी को	च ये	८.	और जो
सिद्धाः	१.	सिद्धों ने	च	११.	उन्होंने
संकल्पनामयीम् ।	६.	अणिमादि	विद्याधर	९.	विद्याधर
सिद्धिम्	७.	अष्टसिद्धियों को	आदयः ॥	१०.	आदि यक्ष थे

श्लोकार्थ—सिद्धों ने कपिलदेव जी को बछड़ा बनाकर आकाशरूप पात्र में अणिमादि अष्ट सिद्धियों को, और जो विद्याधर आदि यक्ष थे उन्होंने अन्तर्धानादि विद्या को दुहा ॥

विंशः श्लोकः

अन्ये च मायिनो मायामन्तर्धानाद्भुतात्मनाम् ।
मयं प्रकल्प्य वत्सं ते दुदुहुर्धारणामयीम् ॥२०॥

पदच्छेद—

अन्ये च मायिनः मायाम् अन्तर्धान अद्भुत आत्मनाम् ।
मयम् प्रकल्प्य वत्सम् ते दुदुहुः धारणामयीम् ॥

शब्दार्थ—

अन्ये	२.	दूसरे	मयम्	५.	मयदानव को
च	१.	तथा (जो)	प्रकल्प्य	७.	बनाकर
मायिनः	३.	मायावी (थे)	वत्सम्	६.	बछड़ा
मायाम्	११.	मायारूप	ते	४.	उन्होंने
अन्तर्धान	८.	अन्तर्धानादि	दुदुहुः	१३.	दूध रूप से दुहा
अद्भुत	९.	विचित्र	धारणामयीम् ॥	१२.	संकल्पमयी माया को
आत्मनाम् ।	१०.	स्वरूप वाली			

श्लोकार्थ—तथा जो दूसरे मायावी थे, उन्होंने मयदानव को बछड़ा बनाकर अन्तर्धानादि विचित्र स्वरूप वाली संकल्पमयी माया को दूध रूप से दुहा ॥

एकविंशः श्लोकः

यक्षरक्षांसि भूतानि पिशाचाः पिशिताशनाः ।
भूतेशवत्सा दुदुहुः कपाले क्षतजासवम् ॥२१॥

पदच्छेद—

यक्ष रक्षांसि भूतानि पिशाचाः पिशित अशनाः ।
भूतेश वत्साः दुदुहुः कपाले क्षतज आसवम् ॥

शब्दार्थ—

यक्ष	३. यक्ष	भूतेश	७. रुद्र को
रक्षांसि	४. राक्षस	वत्साः	८. बछड़ा बनाकर
भूतानि	५. भूत (और)	दुदुहुः	१२. दुहा
पिशाचाः	६. पिशाचों ने	कपाले	९. खप्पर में
पिशित	१. मांस	क्षतज	१०. रक्त रूप
अशनाः ।	२. खाने वाले	आसवम् ॥	११. दूध

श्लोकार्थ—मांस खाने वाले यक्ष, राक्षस, भूत और पिशाचों ने रुद्र को बछड़ा बनाकर खप्पर में रक्त रूप दूध दुहा ॥

द्वाविंशः श्लोकः

तथाहयो दन्दशूकाः सर्पा नागाश्च तक्षकम् ।
विधाय वत्सं दुदुहुर्बिलपात्रे विषं पयः ॥२२॥

पदच्छेद—

तथा अहयः दन्दशूकाः सर्पाः नागाः च तक्षकम् ।
विधाय वत्सम् दुदुहुः बिलपात्रे विषम् पयः ॥

शब्दार्थ—

तथा	२. और	विधाय	८. बनाकर
अहयः	१. बिना फन वाले	वत्सम्	७. बछड़ा
दन्दशूकाः सर्पाः	३. फन वाले सांप	दुदुहुः	१२. दुहा
नागाः	५. नागों ने	बिल पात्रे	९. अपने मुखरूप पात्र में
च	४. तथा	विषम्	१०. विषरूप
तक्षकम् ।	६. तक्षक को	पयः ॥	११. दूध

श्लोकार्थ—बिना फन वाले और फन वाले सांप तथा नागों ने तक्षक को बछड़ा बनाकर अपने मुख रूप पात्र में विषरूप दूध दुहा ॥

त्रयोविंशः श्लोकः

पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषम् ।
अरण्यपात्रे चाधुक्षन्मृगेन्द्रेण च दंष्ट्रिणः ॥२३॥

पदच्छेद—

पशवः यवसम् क्षीरम् वत्सम् कृत्वा च गोवृषम् ।
अरण्यपात्रे च अधुक्षन् मृगेन्द्रेण च दंष्ट्रिणः ॥

शब्दार्थ—

पशवः	२.	पशुओं ने	गोवृषम् ।	३.	नन्दीश्वर को
यवसम्	७.	घास रूप	अरण्यपात्रे	६.	वनरूप पात्र में
क्षीरम्	८.	दूध	च	१०.	तथा
वत्सम्	४.	बछड़ा	अधुक्षन्	९.	दुहा
कृत्वा	५.	बनाकर	मृगेन्द्रेण च	१२.	सिंह को बछड़ा बनाया
च	१.	और	दंष्ट्रिणः ॥	११.	दाढ़ वाले पशुओं ने

श्लोकार्थ—और पशुओं ने नन्दीश्वर को बछड़ा बनाकर वनरूप पात्र में घास रूप दूध दुहा तथा दाढ़ वाले पशुओं ने सिंह को बछड़ा बनाया ॥

चतुर्विंशः श्लोकः

क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे ।
सुपर्णवत्सा विहगाश्चरं चाचरमेव च ॥२४॥

पदच्छेद—

क्रव्यादाः प्राणिनः क्रव्यम् दुदुहुः स्वे कलेवरे ।
सुपर्ण वत्साः विहगाः चरम् च अचरम् एव च ॥

शब्दार्थ—

क्रव्यादाः	१.	मांस भक्षी	सुपर्ण	८.	गरुड़ को
प्राणिनः	२.	प्राणियों ने (सिंह को बछड़ा बनाकर)	वत्साः	९.	बछड़ा बनाकर
क्रव्यम्	५.	कच्चा मांस रूप	विहगाः	७.	पक्षियों ने
दुदुहुः	६.	दूध दुहा	चरम्	१०.	चर (कीटादि
स्वे	३.	अपने	च अचरम्	११.	और अचर (फलादि)
कलेवरे ।		शरीर में	एव च ॥	१२.	रूप दूध दुहा

श्लोकार्थ—मांस भक्षी प्राणियों ने सिंह को बछड़ा बनाकर अपने शरीर में कच्चा मांस रूप दूध दुहा । पक्षियों ने गरुड़ को बछड़ा बनाकर चर कीटादि और अचल फलादि रूप दूध दुहा ॥

पञ्चविंशः श्लोकः

वटवत्सा वनस्पतयः पृथग्रसमयं पयः ।
गिरयो हिमवद्वत्सा नानाधातून् स्वसानुषु ॥२५॥

पदच्छेद—

वट वत्साः वनस्पतयः पृथक् रस मयम् पयः ।
गिरयः हिमवत् वत्साः नाना धातून् स्वसानुषु ॥

शब्दार्थ—

वट	२.	वट वृक्ष को	गिरयः	७.	पर्वतों ने
वत्साः	३.	बछड़ा बनाकर	हिमवत्	८.	हिमालय को
वनस्पतयः	१.	वनस्पतियों ने	वत्साः	९.	बछड़ा बनाकर
पृथक्	४.	भिन्न-भिन्न	नाना	११.	अनेक प्रकार के
रस मयम्	५.	रस रूप	धातून्	१२.	धातु रूप दूध (दुहा)
पयः ।	६.	दूध दुहा	स्वसानुषु ॥	१०.	अपने शिखरों पर

श्लोकार्थ—वनस्पतियों ने वट वृक्ष को भिन्न-भिन्न रसरूप दूध दुहा । पर्वतों ने हिमालय को बछड़ा बनाकर अपने शिखरों पर अनेक प्रकार के धातु रूप दूध दुहा ॥

षड्विंशः श्लोकः

सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक् पयः ।
सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविताम् ॥२६॥

पदच्छेद—

सर्वे स्वमुख्य वत्सेन स्वे-स्वे पात्रे पृथक् पयः ।
सर्वकाम दुघाम् पृथ्वीम् दुदुहुः पृथु भाविताम् ॥

शब्दार्थ—

सर्वे	१.	सभी लोगों ने	सर्वकाम	७.	सभी कामनाओं को
स्वमुख्य	२.	अपने मुखिया को	दुघाम्	८.	देने वाली
वत्सेन	३.	बछड़ा बनाकर	पृथ्वीम्	९.	पृथ्वी से
स्वे-स्वे पात्रे	४.	अपने-अपने पात्र में	दुदुहुः	१२.	दुहा
पृथक्	१०.	अलग-अलग	पृथु	५.	महाराज पृथु से
पयः ।	११.	दूध	भाविताम् ॥	६.	वश में की गई

श्लोकार्थ—सभी लोगों ने अपने मुखिया को बछड़ा बनाकर अपने-अपने पात्र में महाराज पृथु से वश में की गई सभी कामनाओं को देने वाली पृथ्वी से अलग-अलग दूध दुहा ॥

सप्तविंशः श्लोकः

एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः ।
दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह ॥२७॥

पदच्छेद—

एवम् पृथु आदयः पृथ्वीम् अन्नादाः स्वन्नम् आत्मनः ।
दोह वत्स आदि भेदेन क्षीर भेदम् कुरूद्वह ॥

शब्दार्थ—

एवम्	७.	इस प्रकार	दोह	९.	दुहने का पात्र (और)
पृथु	२.	महाराज पृथु	वत्स	१०.	बछड़ा
आदयः	३.	आदि लोगों ने	आदि	११.	इत्यादि के
पृथ्वीम्	५.	पृथ्वी से	भेदेन	१२.	भेद से
अन्नादाः	१.	अन्न खाने वाले	क्षीर	१३.	दूध में
स्वन्नम्	६.	अपना-अपना अन्न दुहा	भेदम्	१४.	अन्तर (हो गया)
आत्मनः ।	४.	अपने लिये	कुरूद्वह ॥	८.	हे विदुर जी

श्लोकार्थ—अन्न खाने वाले महाराज पृथु आदि लोगों ने अपने लिये पृथ्वी से अपना-अपना अन्न दुहा । इस प्रकार हे विदुर जी ! दुहने का पात्र और बछड़ा इत्यादि के भेद से दूध में अन्तर हो गया ॥

अष्टाविंशः श्लोकः

ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः ।
दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः ॥२८॥

पदच्छेद—

ततः महीपतिः प्रीतः सर्वकाम दुघाम् पृथुः ।
दुहितृत्वे चकार इमाम् प्रेम्णा दुहितृ वत्सलः ॥

शब्दार्थ—

ततः	१.	तदनन्तर	दुहितृत्वे	१०.	पुत्री के रूप में
महीपतिः	५.	महाराज	चकार	१२.	स्वीकार किया
प्रीतः	२.	प्रसन्न होकर	इमाम्	९.	इस पृथ्वी को
सर्वकाम	७.	सभी मनोरथों को	प्रेम्णा	११.	बड़े प्रेम से
दुघाम्	८.	देने वाली	दुहितृ	३.	पुत्रियों पर
पृथुः ।	६.	पृथु ने	वत्सलः ॥	४.	वात्सल्य भाव रखने वाले

श्लोकार्थ—तदनन्तर प्रसन्न होकर पुत्रियों पर वात्सल्यभाव रखने वाले महाराज पृथु ने सभी मनोरथों को देने वाली इस पृथ्वी को पुत्री के रूप में बड़े प्रेम से स्वीकार किया ॥

एकोनत्रिंशः श्लोकः

चूर्णयन् स्वधनुष्कोट्या गिरिकूटानि राजराट् ।
भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः ॥२९॥

पदच्छेद—

चूर्णयन् स्व धनुः कोटया गिरि कूटानि राजराट् ।
भूमण्डलम् इदम् वैन्यः प्रायः चक्रे समम् विभुः ॥

शब्दार्थ—

चूर्णयन्	९.	चूर्ण करके	भूमण्डलम्	११.	पृथ्वी मण्डल को
स्व	४.	अपने	इदम्	१०.	इस
धनुः	५.	धनुष की	वैन्यः	३.	महाराज पृथु
कोटया	६.	नोक से	प्रायः	१२.	अधिकतर
गिरि	७.	पर्वतों के	चक्रे	१४.	बना दिया
कूटानि	८.	शिखरों को	समम्	१३.	समतल
राजराट् ।	१.	राजाधिराज	विभुः ॥	२.	सर्व समर्थ

श्लोकार्थ—राजाधिराज सर्व समर्थ महाराज पृथु ने अपने धनुष की नोक से पर्वतों के शिखरों को चूर्ण करके इस पृथ्वी मण्डल को अधिकतर समतल बना दिया ॥

त्रिंशः श्लोकः

अथास्मिन् भगवान् वैन्यः प्रजानां वृत्तिदः पिता ।
निवासान् कल्पयाञ्चक्रे तत्र तत्र यथार्हतः ॥३०॥

पदच्छेद—

अथ अस्मिन् भगवान् वैन्यः प्रजानाम् वृत्तिदः पिता ।
निवासान् कल्पयान् चक्रे तत्र तत्र यथा अर्हतः ॥

शब्दार्थ—

अथ	१.	उसके बाद	निवासान्	१२.	अनेकों आवास
अस्मिन्	७.	उस पृथ्वी पर	कल्पयान्	१३.	निर्माण की योजना
भगवान्	५.	महाराज	चक्रे	१४.	बनायी
वैन्यः	६.	पृथु ने	तत्र	८.	जगह
प्रजानाम्	२.	प्रजाओं को	तत्र	९.	जगह पर
वृत्तिदः	३.	जीविका देने वाले	यथा	११.	अनुसार
पिताः ।	४.	पिता के समान रक्षक	अर्हतः ॥	१०.	के आवश्यकता

श्लोकार्थ—उसके बाद प्रजाओं को जीविका देने वाले पिता के समान रक्षक महाराज पृथु ने उस पृथ्वी पर जगह-जगह पर आवश्यकता के अनुसार अनेकों आवास निर्माण की योजना बनायी ॥

एकत्रिंशः श्लोकः

ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च।
घोषान् व्रजान् सशिबिरानाकरान् खेटखर्वटान् ॥३१॥

पदच्छेद—

ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च।
घोषान् व्रजान् सशिविरान् आकरान् खेट-खर्वटान् ॥

शब्दार्थ—

ग्रामान्	१.	(उन्होंने) गांव	घोषान्	७.	अहीरों की बस्ती
पुरः	२.	कस्बे	व्रजान्	८.	पशु आवास
पत्तनानि	३.	नगर	स	१०.	सहित
दुर्गाणि	५.	किले	शिविरान्	९.	पडावों के
विविधानि	४.	अनेकों प्रकार के	आकरान्	११.	खाने
च।	६.	और	खेट-खर्वटान् ॥	१२.	पुरवे पहाड़ी गांव बसाये

श्लोकार्थ—उन्होंने कस्बे, नगर अनेकों प्रकार के किले और अहीरों की बस्ती, पशु आवास पडावों के सहित, खानें, पुरवे, पहाड़ी गांव बसाये ॥

द्वात्रिंशः श्लोकः

प्राक्पृथोरिह नैवैषा पुरग्रामादिकल्पना।
यथासुखं वसन्ति स्म तत्र तत्राकुतोभयाः ॥३२॥

पदच्छेद—

प्राक् पृथोः इह न एव एषा पुर ग्राम आदि कल्पना।
यथा सुखम् वसन्ति स्म तत्र तत्र अकुतो भयाः ॥

शब्दार्थ—

प्राक्	२.	पहले	यथा	१४.	पूर्वक
पृथोः	१.	महाराज पृथु के	सुखम्	१३.	सुख
इह	३.	इस पृथ्वी पर	वसन्ति	१५.	बस जाते
न एव	८.	नहीं हुआ था (लोग)	स्म	१६.	थे
एषा	६.	यह	तत्र	११.	जगह
पुर ग्राम	४.	कस्बा गांव	तत्र	१२.	जगह पर
आदि	५.	इत्यादि आवासों का	अकुतो	१०.	रहित होकर
कल्पना।	७.	निर्माण	भयाः ॥	९.	भय से

श्लोकार्थ—महाराज पृथु से पहले इस पृथ्वी पर कस्बा, गांव इत्यादि आवासों का निर्माण नहीं हुआ था। लोग भय से रहित होकर जगह-जगह पर सुख पूर्वक बस जाते थे ॥

श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पृथुविजये अष्टादशोऽध्यायः ॥१८॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

चतुर्थः स्कन्धः

एकोनविंशः अध्यायः

प्रथमः श्लोकः

मैत्रेय उवाच—अथादीक्षत राजा तु हयमेधशतेन सः।
ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥१॥

पदच्छेद— अथ अदीक्षत राजा तु हयमेध शतेन सः।
ब्रह्मावर्ते मनोः क्षेत्रे यत्र प्राची सरस्वती ॥

शब्दार्थ—

अथ	१.	तदनन्तर	ब्रह्मावर्ते	५.	ब्रह्मावर्त
अदीक्षत	९.	दीक्षा ली थी	मनोः	४.	मनु महाराज के
राजा तु	३.	महाराज पृथु ने	क्षेत्रे	६.	क्षेत्र में
हयमेध	८.	अश्वमेध यज्ञ की	यत्र	१०.	जहाँ पर
शतेन	७.	एक सौ	प्राची	११.	पूर्वमुख बहती
सः।	२.	उन	सरस्वती ॥	११.	सरस्वती नदी

श्लोकार्थ—तदनन्तर उन महाराज पृथु ने मनु महाराज के ब्रह्मावर्त क्षेत्र में एक सौ अश्वमेध यज्ञ की दीक्षा ली थी; जहाँ पर सरस्वती नदी पूर्वमुख बहती थी ॥

द्वितीयः श्लोकः

तदभिप्रेत्य भगवान् कर्मातिशयमात्मनः।
शतक्रतुर्न ममृषे पृथोर्यज्ञमहोत्सवम् ॥२॥

पदच्छेद— तद् अभिप्रेत्य भगवान् कर्म अतिशयम् आत्मनः।
शतक्रतुः न ममृषे पृथोः यज्ञ महोत्सवम् ॥

शब्दार्थ—

तद्	१.	उस कर्म को	शतक्रतुः	७.	इन्द्र
अभिप्रेत्य	५.	समझ कर	न	११.	नहीं
भगवान्	६.	देवराज	ममृषे	१२.	सह सके
कर्म	३.	पुण्य कर्म से	पृथोः	८.	पृथु महाराज के
अतिशयम्	४.	अधिक	यज्ञ	९.	अश्वमेध यज्ञ के
आत्मनः।	२.	अपने	महोत्सवम् ॥	१०.	समारोह को

श्लोकार्थ—उस कर्म को अपने पुण्यकर्म से अधिक समझकर देवराज इन्द्र पृथु महाराज के अश्वमेध यज्ञ के समारोह को नहीं सह सके ॥

तृतीयः श्लोकः

यत्र यज्ञपतिः साक्षाद्भगवान् हरिरीश्वरः ।
अन्वभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः ॥३॥

पदच्छेद—

यत्र यज्ञ पतिः साक्षात् भगवान् हरिः ईश्वरः ।
अन्वभूयत सर्व आत्मा सर्वलोक गुरुः प्रभुः ॥

शब्दार्थ—

यत्र	१.	जिस यज्ञ में	अन्वभूयत	१२.	दर्शन दिया था
यज्ञपतिः	२	यज्ञेश्वर	सर्व	४.	सब की
साक्षात्	११.	साक्षात् प्रत्यक्ष रूप से	आत्मा	५.	आत्मा
भगवान्	९.	भगवान्	सर्वलोक	६.	सारे लोकों के
हरिः	१०.	श्री हरि ने	गुरुः	७.	गुरु
ईश्वरः ।	३.	सबके स्वामी	प्रभुः ॥	८	सर्व समर्थ

श्लोकार्थ—जिस यज्ञ में यज्ञेश्वर, सबके स्वामी, सबकी आत्मा, सारे लोकों के गुरु, सर्वसमर्थ भगवान् श्री हरि ने साक्षात् प्रत्यक्ष रूप से दर्शन दिया था ॥

चतुर्थः श्लोकः

अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः ।
उपगीयमानो गन्धर्वैर्मुनिभिश्चाप्सरोगणैः ॥४॥

पदच्छेद—

अन्वितः ब्रह्म शर्वाभ्याम् लोक पालैः सह अनुगैः ।
उपगीयमानः गन्धर्वैः मुनिभिः च अप्सरो गणैः ॥

शब्दार्थ—

अन्वितः	६.	साथ थे (तथा)	उपगीयमानः	१२.	यशोगान कर रहे थे
ब्रह्म	१.	ब्रह्मा जी (और)	गन्धर्वैः	७.	गन्धर्व
शर्वाभ्याम्	२.	महादेव जी	मुनिभिः	८.	ऋषि
लोक पालैः	५.	आठों लोक पाल (उनके)	च	१०.	और
सह	४.	साथ	अप्सरो	११.	अपसरायें (उनका)
अनुगैः	३.	अपने अनुचरों के	गणैः ॥	९.	गण

श्लोकार्थ—ब्रह्मा जी और महादेव जी अपने अनुचरों के साथ आठों लोकपाल उनके साथ थे तथा गन्धर्व, ऋषिगण और अप्सरायें उनका यशोगान कर रहे थे ॥

पञ्चमः श्लोकः

सिद्धा विद्याधरा दैत्या दानवा गुह्यकादयः।
सुनन्दनन्दप्रमुखाः पार्षदप्रवरा हरेः ॥५॥

पदच्छेद—

सिद्धा विद्याधराः दैत्याः दानवाः गुह्यक आदयः।
सुनन्द नन्द प्रमुखाः पार्षद प्रवराः हरेः ॥

शब्दार्थ—

सिद्धाः	१.	वहाँ पर सिद्ध	सुनन्द	११.	सुनन्द (और)
विद्याधराः	२.	विद्याधर	नन्द	१२.	नन्द (भी आये)
दैत्याः	३.	दैत्य	प्रमुखाः	१०.	प्रधान
दानवाः	४.	दानव (और)	पार्षद	९.	पार्षदों में
गुह्यक	५.	यक्ष	प्रवराः	८	श्रेष्ठ
आदयः।	६.	इत्यादि देवगण (तथा)	हरेः ॥	७	भगवान् के

श्लोकार्थ—वहाँ पर सिद्ध, विद्याधर, दैत्य, दानव और यक्ष इत्यादि देवगण तथा भगवान् के श्रेष्ठ पार्षदों में प्रधान सुनन्द और नन्द भी आये ॥

षष्ठः श्लोकः

कपिलो नारदो दत्तो योगेशाः सनकादयः।
तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ॥६॥

पदच्छेद—

कपिलः नारदः दत्तः योगेशाः सनक आदयः।
अन्वीयुः भागवताः ये च तत् सेवन उत्सुका ॥

शब्दार्थ—

कपिलः	१.	भगवान् कपिल	अन्वीयुः	१२.	पीछे-पीछे पधारे
नारदः	२.	देवर्षि नारद	भागवताः	१०.	भगवद् भक्त
दत्तः	३.	भगवान् दत्तात्रेय	ये	६.	जो
योगेशाः	५.	योगेश्वर	च	९.	वे
सनक आदयः।	४.	सनकादि चारों	तत् सेवन	७.	उन् भगवान् की सेवा में
तम्	११.	भगवान् श्री हरि के	उत्सुकाः ॥	८.	तत्पर रहते हैं

श्लोकार्थ—भगवान् कपिल, देवर्षि नारद, भगवान् दत्तात्रेय, सनकादि चारों योगेश्वर, जो उन भगवान् की सेवा में तत्पर रहते हैं, वे भगवद्भक्त भगवान् श्री हरि के पीछे-पीछे पधारे ॥

सप्तमः श्लोकः

यत्र धर्मदुघा भूमिः सर्वकामदुघा सती ।
दोग्धि स्माभीप्सितानर्थान् यजमानस्य भारत ॥७॥

पदच्छेद—

यत्र धर्मदुघा भूमिः सर्वकाम दुघा सती ।
दोग्धि स्म अभीप्सितान् अर्थान् यजमानस्य भारत ॥

शब्दार्थ—

यत्र	२.	जिस यज्ञ में	दोग्धि स्म	१०.	प्रदान किया
धर्मदुघा	३.	यज्ञ सामग्रियों को देने वाली	अभीप्सितान्	८.	चाहे गये
भूमिः	४.	पृथ्वी	अर्थान्	९.	मनोरथों को
सर्वकाम	५.	सभी मनोरथों को	यजमानस्य	७.	महाराज पृथु के
दुघा सती ।	६.	पूर्ण करने वाली हुई (उसने)	भारत ॥	१.	हे विदुर जी

श्लोकार्थ—हे विदुर जी ! जिस यज्ञ में सामग्रियों को देने वाली पृथ्वी सभी मनोरथों को पूर्ण करने वाली हुई । उसने महाराज पृथु के चाहे गये मनोरथों को प्रदान किया ॥

अष्टमः श्लोकः

ऊहुः सर्वरसान्नद्यः क्षीरदध्यन्नगोरसान् ।
तरवो भूरिवर्ष्माणः प्रासूयन्त मधुच्युतः ॥८॥

पदच्छेद—

ऊहुः सर्वरसान् नद्यः क्षीर दधि अन्न गोरसान् ।
तरवः भूरि वर्ष्माणः प्रासूयन्त मधु च्युतः ॥

शब्दार्थ—

ऊहुः	६.	बहाती थीं	तरवः	७.	वृक्षों ने
सर्वरसान्	५.	सभी रसों को	भूरि	८.	अधिक
नद्यः	१.	नदियाँ	वर्ष्माणः	९.	फल
क्षीर दधि	२.	दूध, दही	प्रासूयन्त	१०.	उत्पन्न किये
अन्न	३.	अन्न (और)	मधु	११.	जिनसे मधु
गोरसान् ।	४.	गोरस आदि	च्युतः ॥	१२.	चूता था

श्लोकार्थ—नदियाँ दूध दही, अन्न और गोरस आदि सभी रसों को बहाती थीं । वृक्षों ने अधिक फल उत्पन्न किये जिनसे मधु चूता था ॥

नवमः श्लोकः

सिन्धवो रत्ननिकरान् गिरयोऽन्नं चतुर्विधम् ।
उपायनमुपाजह्रुः सर्वे लोकाः सपालकाः ॥९॥

पदच्छेद—

सिन्धवः रत्न निकरान् गिरयः अन्नं चतुर्विधम् ।
उपायनम् उपाजह्रुः सर्वे लोकाः सपालकाः ॥

शब्दार्थ—

सिन्धवः	१.	समुद्र ने	उपायनम्	९.	उपहार
रत्न निकरान्	२.	रत्नों की राशि	उपाजह्रुः	१०.	भेंट किये
गिरयः	३.	पर्वतों ने	सर्वे	७.	सम्पूर्ण
अन्नं	५.	अन्न	लोकाः	८.	लोकों ने (अन्य)
चतुर्विधम् ।	४.	(भक्ष्य भोज्य चोष्य लेह्य) चार प्रकार के	सपालकाः ॥	६.	लोकपालों के सहित

श्लोकार्थ—समुद्र ने रत्नों की राशि, पर्वतों ने भोज्य, भक्ष्य, चोष्य, लेह्य चार प्रकार के अन्न और लोकपालों के सहित सम्पूर्ण लोकों ने अन्य उपहार भेंट किये ॥

दशमः श्लोकः

इति चाधोक्षजेशस्य पृथोस्तु परमोदयम् ।
असूयन् भगवानिन्द्रः प्रतिघातमचीकरत् ॥१०॥

पदच्छेद—

इति च अधोक्षज ईशस्य पृथोः तु परम उदयम् ।
असूयन् भगवान् इन्द्रः प्रतिघातम् अचीकरत् ॥

शब्दार्थ—

इति	५.	इस	परम उदयम् ।	६.	महान् उत्कर्ष को देखकर
च	१.	और	असूयन्	१०.	ईर्ष्या करते हुये
अधोक्षज	२.	भगवान् श्री हरि को ही	भगवान्	८.	देवराज
ईशस्य	३.	प्रभु मानने वाले	इन्द्रः	९.	इन्द्र ने
पृथोः	४.	महाराज पृथु के	प्रतिघातम्	११.	विघ्न डालने की
तु	७.	इधर	अचीकरत् ॥	१२.	चेष्टा की

श्लोकार्थ—और भगवान् श्री हरि को ही प्रभु मानने वाले महाराज पृथु के इस महान् उत्कर्ष को देखकर इधर देवराज इन्द्र ने ईर्ष्या करते हुये विघ्न डालने की चेष्टा की ।

एकादशः श्लोकः

चरमेणाश्वमेधेन यजमाने यजुष्पतिम् ।
वैन्ये यज्ञपशुं स्पर्धन्नपोवाह तिरोहितः ॥११॥

पदच्छेद—

चरमेण अश्वमेधेन यजमाने यजुष्पतिम् ।
वैन्ये यज्ञ पशुम् स्पर्धन् अपोवाह तिरोहितः ॥

शब्दार्थ—

चरमेण	२.	अन्तिम सौवें	यज्ञ	८.	यज्ञ के
अश्वमेधेन	३.	अश्वमेध यज्ञ से	पशुम्	९.	घोड़े को
यजमाने	५.	आराधना कर रहे थे	स्पर्धन्	६.	ईर्ष्यावश इन्द्र ने
यजुष्पतिम् ।	४.	यज्ञ पति श्री हरि की	अपोवाह	१०.	चुरा लिया
वैन्ये	१.	(जिस समय) महाराज पृथु	तिरोहितः ॥	७.	गुप्त रूप से

श्लोकार्थ—जिस समय महाराज पृथु अन्तिम सौवें अश्वमेध यज्ञ से यज्ञपति श्री हरि की आराधना कर रहे थे, उस समय ईर्ष्यावश इन्द्र ने गुप्तरूप से यज्ञ के घोड़े को चुरा लिया ।

द्वादशः श्लोकः

तमत्रिर्भगवानैक्षत्त्वरमाणं विहायसा ।
आमुक्तमिव पाखण्डं योऽधर्मे धर्मविभ्रमः ॥१२॥

पदच्छेद—

तम् अत्रिः भगवान् ऐक्षत् त्वर माणम् विहायसा ।
आमुक्तम् इव पाखण्डम् यः अधर्मे धर्म विभ्रमः ॥

शब्दार्थ—

तम्	६.	उस इन्द्र को	आमुक्तम्	१.	कवच के
अत्रिः	८.	अत्रि ऋषि ने	इव	२.	समान
भगवान्	७.	भगवान्	पाखण्डम्	३.	पाखण्डी वेश में
ऐक्षत्	९.	देखा	यः अधर्मे	१०.	जो अधर्म में
त्वरमाणम्	५.	तीव्र गति से जाते हुये	धर्म	११.	धर्म का
विहायसा ।	४.	आकाश मार्ग से	विभ्रमः ॥	१२.	भ्रम कर रहा था

श्लोकार्थ—कवच के समान पाखण्डी वेश में आकाश मार्ग से तीव्र गति से जाते हुये उस इन्द्र को भगवान् अत्रि ऋषि ने देखा, जो अधर्म में धर्म का भ्रम कर रहा था ॥

त्रयोदशः श्लोकः

अत्रिणा चोदितो हन्तुं पृथुपुत्रो महारथः।
अन्वधावत संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ॥१३॥

पदच्छेद—

अत्रिणा चोदितः हन्तुम् पृथु पुत्रः महारथः ।
अन्वधावत संक्रुद्धः तिष्ठ-तिष्ठ इति च अब्रवीत् ॥

शब्दार्थ—

अत्रिणा	१.	अत्रि ऋषि के	अन्वधावत	८.	उसके पीछे दौड़ा
चोदितः	२.	कहने पर	संक्रुद्धः	७.	क्रोध करके
हन्तुम्	६.	मारने के लिये	तिष्ठ-तिष्ठ	१०.	ठहरो-ठहरो
पृथु	३.	महाराज पृथु का	इति	११.	ऐसा
पुत्रः	५.	पुत्र	च	९.	और (इन्द्र से)
महारथः।	४.	महारथी	अब्रवीत् ॥	१२.	बोला

श्लोकार्थ—अत्रि ऋषि के कहने पर महाराज पृथु का महारथी पुत्र मारने के लिये क्रोध करके उसके पीछे दौड़ा और इन्द्र से ठहरो-ठहरो ऐसा बोला ॥

चतुर्दशः श्लोकः

तं तादृशाकृतिं वीक्ष्य मेने धर्मं शरीरिणम् ।
जटिलं भस्मनाच्छन्नं तस्मै बाणं न मुञ्चति ॥१४॥

पदच्छेद—

तम् तादृश आकृतिम् वीक्ष्य मेने धर्मम् शरीरिणम् ।
जटिलम् भस्मना छन्नम् तस्मै बाणम् न मुञ्चति ॥

शब्दार्थ—

तम्	४.	उस इन्द्र को	जटिलम्	१.	उसके सिर पर जटा (और)
तादृश	५.	उस प्रकार के	भस्मना	२.	शरीर में भस्म
आकृतिम्	६.	आकार में	छन्नम्	३.	लगाये हुये था
वीक्ष्य	७.	देखकर पृथु के (पुत्र ने)	तस्मै	११.	उस पर
मेने	१०.	समझा (अतः)	बाणम्	१२.	बाण
धर्मम्	९.	धर्म	न	१३.	नहीं
शरीरिणम्।	८.	शरीरधारी	मुञ्चति ॥	१४.	छोड़ा

श्लोकार्थ—वह सिर पर जटा और शरीर में भस्म लगाये हुये था। उस इन्द्र को उस प्रकार के आकार में देखकर पृथु के पुत्र ने शरीरधारी धर्म समझा। अतः उस पर बाण नहीं छोड़ा।

पञ्चदशः श्लोकः

वधान्निवृत्तं तं भूयो हन्तवेऽत्रिरचोदयत् ।
जहि यज्ञहनं तात महेन्द्रं विबुधाधमम् ॥१५॥

पदच्छेद—

वधात् निवृत्तम् तम् भूयः हन्तवे अत्रिः अचोदयत् ।
जहि यज्ञ हनम् तात महेन्द्रम् विबुध अधमम् ॥

शब्दार्थ—

वधात्	२.	इन्द्र के वध से	जहि	१४.	मारो
निवृत्तम्	३.	विमुख हुये	यज्ञ	११.	यज्ञ में
तम्	४.	पृथु पुत्र से	हनम्	१२.	विघ्न डालने वाले
भूयः	६.	फिर से	तात	८.	हे वत्स
हन्तवे	५.	मारने के लिये	महेन्द्रम्	१३.	इन्द्र को
अत्रिः	१.	अत्रि ऋषि ने	विबुध	९.	देवताओं में
अचोदयत् ।	७.	कहा	अधमम् ॥	१०.	नीच (तथा)

श्लोकार्थ—अत्रि ऋषि ने इन्द्र के वध से विमुख हुये पृथु पुत्र से मारने के लिये फिर से कहा—हे वत्स ! देवताओं में नीच तथा यज्ञ में विघ्न डालने वाले इन्द्र को मारो ॥

षोडशः श्लोकः

एवं वैन्यसुतः प्रोक्तस्त्वरमाणं विहायसा ।
अन्वद्रवदभिक्रुद्धो रावणं गृध्रराडिव ॥१६॥

पदच्छेद—

एवम् वैन्य सुतः प्रोक्तः त्वर माणम् विहायसा ।
अन्वद्रवद् अभिक्रुद्धः रावणम् गृध्रराट् इव ॥

शब्दार्थ—

एवम्	१.	अत्रि ऋषि के इस प्रकार	अन्वद्रवद्	७.	ऐसे टूट पड़ा
वैन्यसुतः	३.	पृथु पुत्र	अभिक्रुद्धः	६.	(इन्द्र पर) क्रोध करके
प्रोक्तः	२.	कहने पर	रावणम्	९.	रावण के ऊपर
त्वरमाणम्	५.	तेज गति से जाते हुये	गृध्रराट्	१०.	जटायु टूट पड़ा था
विहायसा ।	४.	आकाश में	इव ॥	८.	जैसे

श्लोकार्थ—अत्रि ऋषि के इस प्रकार कहने पर पृथु-पुत्र आकाश में तेज गति से जाते हुये इन्द्र पर क्रोध करके ऐसे टूट पड़ा; जैसे रावण के ऊपर जटायु टूट पड़ा था ॥

सप्तदशः श्लोकः

सोऽश्वं रूपं च तद्धित्वा तस्मा अन्तर्हितः स्वराट् ।
वीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान् ॥१७॥

पदच्छेद—

सः अश्वम् रूपम् च तद् हित्वा तस्मै अन्तर्हितः स्वराट् ।
वीरः स्व पशुम् आदाय पितुः यज्ञम् उपेयिवान् ॥

शब्दार्थ—

सः अश्वम्	२.	वह इन्द्र घोड़े को	वीरः	८.	वीर पृथुपुत्र
रूपम्	४.	वेष को	स्व	९.	अपने
च तद्	३.	और उस	पशुम्	१०.	घोड़े को
हित्वा	५.	छोड़कर	आदाय	११.	लेकर
तस्मै	६.	पृथु पुत्र के सामने	पितुः	१२.	पिता के
अन्तर्हितः	७.	अन्तर्धान हो गया	यज्ञम्	१३.	यज्ञ में
स्वराट् ।	१.	मायावी	उपेयिवान् ॥	१४.	आ गये

श्लोकार्थ—मायावी वह इन्द्र घोड़े को और उस वेष को छोड़कर पृथु पुत्र के सामने अन्तर्धान हो गया । वीर पृथुपुत्र अपने घोड़े को लेकर पिता के यज्ञ में आ गये ॥

अष्टादशः श्लोकः

तत्तस्य चाद्भुतं कर्म विचक्ष्य परमर्षयः ।
नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो ॥१८॥

पदच्छेद—

तत् तस्य च अद्भुतम् कर्म विचक्ष्य परम ऋषयः ।
नामधेयम् ददुः तस्मै विजिताश्वः इति प्रभो ॥

शब्दार्थ—

तत्	५.	उस	नामधेयम्	११.	नाम
तस्य	४.	पृथु पुत्र के	ददुः	१२.	रक्खा
च	३.	उस समय	तस्मै	८.	उसका
अद्भुतम् कर्म	६.	अलौकिक वीर कर्म को	विजिताश्वः	९.	विजिताश्व
विचक्ष्य	७.	देखकर	इति	१०.	यह
परम ऋषयः ।	२.	महर्षियों ने	प्रभो ॥	१.	हे विदुर जी

श्लोकार्थ—हे विदुर जी ! महर्षियों ने उस समय पृथुपुत्र के उस अलौकिक वीर कर्म को देखकर उसका विजिताश्व यह नाम रक्खा ॥

एकोनविंशः श्लोकः

उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः।
चषालयूपतश्छन्नो हिरण्यरशनं विभुः ॥१९॥

पदच्छेद—

उपसृज्य तमः तीव्रम् जहार अश्वम् पुनः हरिः।
चषाल यूपतः छन्नः हिरण्य रशनम् विभुः ॥

शब्दार्थ—

उपसृज्य	५.	सृष्टि कर दी	चषाल	७	चपाल (और)
तमः	४.	अन्धकार की	यूपतः	८.	पशु स्तम्भ से बंधे
तीव्रम्	३.	घोर	छन्नः	६.	(तथा) उसमें छिपकर
जहार	१३.	चुरा लिया	हिरण्य	९.	सोने की
अश्वम्	१२.	घोड़े को	रशनम्	१०.	रस्सी के साथ
पुनः	११.	फिर से	विभुः ॥	१.	(तदनन्तर) समर्थ
हरिः।	२.	इन्द्र ने			

श्लोकार्थ—तदनन्तर समर्थ इन्द्र ने घोर अन्धकार की सृष्टि कर दी तथा उसमें छिप कर चषाल और पशु स्तम्भ से बँधे सोने की रस्सी के साथ फिर से घोड़े को चुरा लिया ॥

विंशः श्लोकः

अत्रिः सन्दर्शयामास त्वरमाणं विहायसा।
कपालखट्वाङ्गधरं वीरो नैनमबाधत ॥२०॥

पदच्छेद—

अत्रिः सन्दर्शयामास त्वरमाणम् विहायसा।
कपाल खट्वाङ्गधरम् वीरः न एनम् अबाधत ॥

शब्दार्थ—

अत्रिः	१.	अत्रि ऋषि ने	खट्वाङ्गधरम्	६.	खरताल धारण किये था
सन्दर्शयामास	४.	दिखलाया (जो)	वीरः	७.	(इसलिये) वीर पृथु पुत्र ने
त्वरमाणम्	३.	तेज गति से जाते हुये इन्द्र को	न	९.	नहीं
विहायसा	२.	आकाश में	एनम्	८.	इसे
कपाल	५.	कपाल (और)	अबाधत ॥	१०.	बाधा पहुँचाई

श्लोकार्थ—अत्रि ऋषि ने आकाश में तेज गति से जाते हुये इन्द्र को दिखलाया जो कपाल और खरताल लिये था। इसलिये वीर पृथु पुत्र ने इसे नहीं बाधा पहुँचाई ॥

एकविंशः श्लोकः

अत्रिणा चोदितस्तस्मै सन्दधे विशिखं रुषा ।
सोऽश्वं रूपं च तद्धित्वा तस्थावन्तर्हितः स्वराट् ॥२१॥

पदच्छेद—

अत्रिणा चोदितः तस्मै सन्दधे विशिखम् रुषा ।
सः अश्वम् रूपम् च तद् हित्वा तस्थौ अन्तर्हितः स्वराट् ॥

शब्दार्थ—

अत्रिणा	१.	अत्रि ऋषि के	रूपम्	११.	स्वरूप को
चोदितः	२.	कहने पर (पृथु पुत्र ने)	च	९.	और
तस्मै	४.	उस इन्द्र पर	तत्	१०.	उस
सन्दधे	६.	सन्धान किया (किन्तु)	हित्वा	१२.	छोड़कर
विशिखम्	५.	वाण का	तस्थौ	१४.	हो गया
रुषा ।	३.	क्रोध से	अन्तर्हितः	१३.	अन्तर्धान
सः अश्वम्	८.	वह इन्द्र घोड़े को	स्वराट् ॥	७.	मायावी

श्लोकार्थ—अत्रि ऋषि के कहने पर पृथु पुत्र ने क्रोध से उस इन्द्र पर वाण का सन्धान किया । किन्तु मायावी वह इन्द्र घोड़े को और उस स्वरूप को छोड़कर अन्तर्धान हो गया ॥

द्वाविंशः श्लोकः

वीरश्चाश्वमुपादाय पितृयज्ञमथाव्रजत् ।
तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः ॥२२॥

पदच्छेद—

वीरः च अश्वम् उपादाय पितृ यज्ञम् अथ आव्रजत् ।
तद् अवद्यम् हरेः रूपम् जगृहुः ज्ञान दुर्बलाः ॥

शब्दार्थ—

वीरः	२.	वीर पृथुपुत्र	तद्	९.	उस
च	७.	इधर	अवद्यम्	१०.	निन्दित
अश्वम्	३.	घोड़े को	हरेः	८.	इन्द्र के
उपादाय	४.	लेकर	रूपम्	११.	स्वरूप को
पितृयज्ञम्	५.	पिता की यज्ञशाला में	जगृहुः	१४.	अपना लिया
अथ	१.	तदनन्तर	ज्ञान	१२.	बुद्धि से
आव्रजत् ।	६.	आ गये	दुर्बलाः ॥	१३.	हीन मनुष्यों ने

श्लोकार्थ—तदनन्तर वीर पृथुपुत्र घोड़े को लेकर पिता की यज्ञशाला में आ गये । इधर इन्द्र के उस निन्दित स्वरूप को बुद्धि से हीन मनुष्यों ने अपना लिया ॥

त्रयोविंशः श्लोकः

यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया ।
तानि पापस्य खण्डानि लिङ्गं खण्डमिहोच्यते ॥२३॥

पदच्छेद—

यानि रूपाणि जगृहे इन्द्रः हय जिहीर्षया ।
तानि पापस्य खण्डानि लिङ्गम् खण्डम् इह उच्यते ॥

शब्दार्थ—

यानि	४.	जिन-जिन	तानि पापस्य	७.	वे रूप पाप के
रूपाणि	५.	रूपों को	खण्डानि	८.	खण्ड कहलाये
जगृहे	६.	धारण किया था	लिङ्गम्	१०.	चिह्न को
इन्द्रः	१.	इन्द्र ने	खण्डम्	११.	खण्ड
हय	२.	घोड़े को	इह	९.	क्योंकि यहाँ
जिहीर्षया ।	३.	चुराने की इच्छा से	उच्यते ॥	१२.	कहा गया है

श्लोकार्थ—इन्द्र ने घोड़े को चुराने की इच्छा से जिन-जिन रूपों को धारण किया था, वे सब पाप के खण्ड कहलायें। क्योंकि यहाँ चिह्न को खण्ड कहा गया है ॥

चतुर्विंशः श्लोकः

एवमिन्द्रे हरत्यश्वं वैन्ययज्ञजिघांसया ।
तद्गृहीतविसृष्टेषु पाखण्डेषु मतिर्नृणाम् ॥२४॥

पदच्छेद—

एवम् इन्द्रे हरति अश्वम् वैन्य यज्ञ जिघांसया ।
तद् गृहीत विसृष्टेषु पाखण्डेषु मतिः नृणाम् ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	तद्	९.	उस
इन्द्रे	४.	इन्द्र ने	गृहीत	८.	धारण करके (छोड़ दिया)
हरति	६.	चुराते समय	विसृष्टेषु	७.	जिन रूपों को
अश्वम्	५.	घोड़े को	पाखण्डेषु	१०.	पाप खण्डों में
वैन्य यज्ञ	२.	महाराज पृथु के यज्ञ में	मतिः	१२.	बुद्धि जाती है
जिघांसया ।	३.	विघ्न डालने की इच्छा से	नृणाम् ॥	११.	मनुष्यों को

श्लोकार्थ—इस प्रकार महाराज पृथु के यज्ञ में विघ्न डालने की इच्छा से इन्द्र ने घोड़े को चुराते समय जिन रूपों को धारण करके छोड़ दिया, उन पाप खण्डों में मनुष्यों की बुद्धि जाती है ॥

पञ्चविंशः श्लोकः

धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु ।
प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु ॥२५॥

पदच्छेद—

धर्मः इति उपधर्मेषु नग्न रक्तपट आदिषु ।
प्रायेण सज्जते भ्रान्त्या पेशलेषु च वाग्मिषु ॥

शब्दार्थ—

धर्म	८.	यह धर्म है	प्रायेण	१०.	अधिकतर (लोग)
इति	६.	इस प्रकार	सज्जते	१२.	मानने लगते हैं
उपधर्मेषु	७.	उपधर्मों को	भ्रान्त्या	११.	भ्रम के कारण
नग्न	४.	निवस्त्र	पेशलेषु	१.	ऊपर से सुन्दर लगने वाले
रक्तपट	५.	लाल वस्त्र (और)	च	२.	और
आदिषु ।	६.	कापालिक इत्यादि	वाग्मिषु ॥	३.	तर्क युक्त प्रतीत होने वाले

श्लोकार्थ—ऊपर से सुन्दर लगने वाले और तर्कयुक्त प्रतीत होने वाले निवस्त्र, लाल वस्त्र और कापालिक इत्यादि उपधर्मों को यह धर्म है इस प्रकार अधिकतर लोग भ्रम के कारण मानने लगते हैं ॥

षड्विंशः श्लोकः

तदभिज्ञाय भगवान् पृथुः पृथुपराक्रमः ।
इन्द्राय कुपितो बाणमादत्तोद्यतकार्मुकः ॥२६॥

पदच्छेद—

तद् अभिज्ञाय भगवान् पृथुः पृथु पराक्रमः ।
इन्द्राय कुपितः बाणम् आदत्त उद्यत कार्मुकः ॥

शब्दार्थ—

तद्	१.	इन्द्र की उस दुष्टता को	इन्द्राय	१०.	इन्द्र के मारने के लिये
अभिज्ञाय	२.	समझ कर	कुपितः	७.	क्रोध करके
भगवान्	५.	महाराज	बाणम्	११.	बाण
पृथुः	६.	पृथु ने	आदत्त	१२.	चढ़ाया
पृथु	३.	महान्	उद्यत	६.	उठाया और
पराक्रमः ।	४.	पराक्रमी	कार्मुकः ॥	८.	धनुष

श्लोकार्थ—इन्द्र की उस दुष्टता को समझकर महान् पराक्रमी महाराज पृथु ने क्रोध करके धनुष उठाया और इन्द्र को मारने के लिये बाण चढ़ाया ॥

सप्तविंशः श्लोकः

तमृत्विजः शक्रवधाभिसन्धितं विचक्ष्य दुष्प्रेक्ष्यमसह्यरंहसम् ।
निवारयामासुरहो महामते न युज्यतेऽत्रान्यवधः प्रचोदितात् ॥२७॥

पदच्छेद— तम् ऋत्विजः शक्रवध अभिसन्धितम् विचक्ष्य दुष्प्रेक्ष्यम् असह्य रंहसम् ।
निवारयामासुः अहो महामते न युज्यते अत्र अन्यवधः प्रचोदितात् ॥

शब्दार्थ—

तम्	६.	उन महाराज पृथु को	निवारयामासुः	९.	रोक दिया और कहा
ऋत्विजः	८.	याजकों ने (उन्हें)	अहो	११.	हे राजन्
शक्रवध	४.	इन्द्र के वध के लिये	महामते	१०.	बुद्धिमान्
अभिसन्धितम्	५.	तत्पर	न	१५.	नहीं
विचक्ष्य	७.	देखकर	युज्यते	१६.	उचित है
दुष्प्रेक्ष्यम्	१.	न देखने योग्य	अत्र	१२.	इस यज्ञ में
असह्य	२.	असहनीय	अन्यवधः	१४.	दूसरे का वध
रंहसम् ।	३.	वेग वाले (तथा)	प्रचोदितात् ॥	१३.	यज्ञ पशु से भिन्न

श्लोकार्थ—न देखने योग्य असहनीय वेगवाले तथा इन्द्र के वध के लिये तत्पर उन महाराज पृथु को देखकर याजकों ने उन्हें रोक दिया। हे बुद्धिमान् राजा ! इस यज्ञ में यज्ञ पशु से भिन्न दूसरे का वध उचित नहीं है ।।

अष्टाविंशः श्लोकः

वयं मरुत्वन्तमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषम् ।
अयातयामोपहवैरनन्तरं प्रसह्य राजन् जुहवाम तेऽहितम् ॥२८॥

पदच्छेद— वयम् मरुत्वन्तम् इह अर्थ नाशनम् ह्वयामहे त्वत् श्रवसा हत त्विषम् ।
अयातयाम उपहवैः अनन्तरम् प्रसह्य राजन् जुहवाम ते अहितम् ॥

शब्दार्थ—

वयम्	२.	हम लोग	त्विषम् ।	७.	कान्ति वाले (तथा)
मरुत्वन्तम्	१०.	इन्द्र को	अयातयाम	११.	अमोघ
इह	३.	यहाँ	उपहवैः	१२.	मन्त्रों के द्वारा
अर्थ	८.	यज्ञ में	अनन्तरम्	१४.	उसके बाद
नाशनम्	९.	विघ्न डालने वाले	प्रसह्य	१५.	बलात्
ह्वयामहे	१३.	बुला लेते हैं (और)	राजन्	१.	हे राजन्
त्वत्	४.	आपकी	जुहवाम	१८.	हवन कर देंगे
श्रवसा	५.	कीर्ति से	ते	१६.	आपके
हत	६.	नष्ट	अहितम् ॥	१७.	शत्रु का

श्लोकार्थ—हे राजन् ! हम लोग यहाँ आपकी कीर्ति से नष्ट कान्ति वाले तथा यज्ञ में विघ्न डालने वाले इन्द्र को अमोघ मन्त्रों के द्वारा बुला लेते हैं। और उसके बाद बलात् आपके शत्रु का हवन कर देंगे ।।

एकोनत्रिंशः श्लोकः

इत्यामन्त्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा ।
स्रुग्घस्तान्जुह्वतोऽभ्येत्य स्वयम्भूः प्रत्यषेधत ॥२९॥

पदच्छेद—

इति आमन्त्र्य क्रतु पतिम् विदुर अस्य ऋत्विजः रुषा ।
स्रुक् हस्तान् जुह्वतः अभ्येत्य स्वयम्भूः प्रत्यषेधत ॥

शब्दार्थ—

इति	३.	ऐसा	स्रुक्	७.	श्रुवा
आमन्त्र्य	४.	विचार करके	हस्तान्	८.	हाथ में लेकर
क्रतु पतिम्	२.	यजमान से	जुह्वतः	९.	आहुति डालने को तैयार ही थे (कि)
विदुर	१.	हे विदुर जी	अभ्येत्य	११.	सामने आकर
अस्य	५.	इसके	स्वयम्भूः	१०.	ब्रह्मा जी ने
ऋत्विजः रुषा ।	६.	याजक क्रोध से	प्रत्यषेधत ॥	१२.	रोक दिया

श्लोकार्थ—हे विदुर जी ! यजमान से ऐसा विचार करके इसके याजक क्रोध से श्रुवा हाथ में लेकर आहुति डालने के लिये तैयार ही थे कि ब्रह्मा जी ने सामने आकर रोक दिया ॥

त्रिंशः श्लोकः

न वध्यो भवतामिन्द्रो यद्यज्ञो भगवत्तनुः ।
यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः ॥३०॥

पदच्छेद—

न वध्यः भवताम् इन्द्रः यद् यज्ञः भगवत् तनुः ।
यम् जिघांसथ यज्ञेन यस्य इष्टाः तनवः सुराः ॥

शब्दार्थ—

न	३.	नहीं	यम्	८.	तुम लोग जिसे
वध्यः	४.	वध करना चाहिये	जिघांसथ	९.	मारना चाहते हो
भवताम्	१.	आपको	यज्ञेन	१०.	यज्ञ के द्वारा
इन्द्रः	२.	इन्द्र का	यस्य	१३.	उस इन्द्र के
यद्	५.	क्योंकि (इन्द्र)	इष्टाः	११.	पूजित
यज्ञः	६.	यज्ञ स्वरूप	तनवः	१४.	अंग है
भगवत् तनुः ।	७.	भगवान् का शरीर है	सुराः ॥	१२.	देवता

श्लोकार्थ—आपको इन्द्र का वध नहीं करना चाहिये; क्योंकि इन्द्र यज्ञ स्वरूप भगवान् का शरीर है । तुम लोग जिसे मारना चाहते हो; यज्ञ के द्वारा पूजित देवता उस इन्द्र के अंग हैं ॥

एकत्रिंशः श्लोकः

तदिदं पश्यत महद्धर्मव्यतिकरं द्विजाः ।
इन्द्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता ॥३१॥

पदच्छेद—

तद् इदम् पश्यत महत् धर्म व्यतिकरम् द्विजाः ।
इन्द्रेण अनुष्ठितम् राज्ञः कर्म तद् विजिघांसता ॥

शब्दार्थ—

तद्	१.	इसलिये	इन्द्रेण	७.	इन्द्र के द्वारा
इदम्	६.	इस	अनुष्ठितम्	८.	उत्पादित
पश्यत	१३.	विचार करो	राज्ञः	३.	महाराज पृथु के
महत्	१०.	भयंकर	कर्म	५.	यज्ञानुष्ठान में
धर्म	११.	धर्म के	तद्	४.	इस
व्यतिकरम्	१२.	विनाश पर	विजिघांसता ॥	६.	विघ्न के इच्छुक
द्विजाः ।	२.	हे विप्रो			

श्लोकार्थ—इसलिये हे विप्रो ! महाराज पृथु के इस यज्ञानुष्ठान में विघ्न के इच्छुक इन्द्र के द्वारा उत्पादित इस भयंकर धर्म के विनाश पर विचार करो ॥

द्वात्रिंशः श्लोकः

पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः ।
अलं ते क्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् ॥३२॥

पदच्छेद—

पृथु कीर्तेः पृथोः भूयात् तर्हि एकोनशतक्रतुः ।
अलम् ते क्रतुभिः स्विष्टैः यद् भवान् मोक्षधर्मवित् ॥

शब्दार्थ—

पृथु	२.	विशाल	अलम्	११.	पर्याप्त हैं
कीर्ति	३.	कीर्ति वाले	ते	९.	आपके
पृथोः	४.	महाराज पृथु के	क्रतुभिः	१०.	इतने ही यज्ञ
भूयात्	७.	पूर्ण होवें	स्विष्टैः	८.	विधि पूर्वक किये गये
तर्हि	१.	इसलिये	यद् भवान्	१२.	क्योंकि आप
एकोनशत	५.	निन्यानवे	मोक्षधर्म	१३.	मोक्ष धर्म को
क्रतुः ।	६.	यज्ञ ही	वित् ॥	१४.	जानने वाले हैं

श्लोकार्थ—इसलिये विशाल कीर्ति वाले महाराज पृथु के निन्यानवे यज्ञ ही पूर्ण होवें । विधि पूर्वक किये गये आपके इतने ही यज्ञ पर्याप्त हैं । क्योंकि आप मोक्षधर्म के जानने वाले हैं ॥

त्रयस्त्रिंशः श्लोकः

नैवात्मने महेन्द्राय रोषमाहर्तुमर्हसि ।
उभावपि हि भद्रं ते उत्तमश्लोकविग्रहौ ।।३३।।

पदच्छेद— न एव आत्मने महेन्द्राय रोषम् आहर्तुम् अर्हसि ।
उभौ अपि हि भद्रम् ते उत्तम श्लोक विग्रहौ ।।

शब्दार्थ—

न एव	५.	नहीं	उभौ, अपि	८.	आप दोनों ही
आत्मने	१.	आत्मस्वरूप	हि	७.	क्योंकि
महेन्द्राय	२.	इन्द्र पर	भद्रम्	१२.	कल्याण हो
रोषम्	३.	क्रोध	ते	११.	आपका
आहर्तुम्	४.	करना	उत्तमश्लोक	९.	महनीय कीर्ति श्री हरि के
अर्हसि ।	६.	उचित है	विग्रहौ ।।	१०.	शरीर हैं (अतः)

श्लोकार्थ—आत्मस्वरूप इन्द्र पर क्रोध करना उचित नहीं है । क्योंकि आप दोनों ही महनीय कीर्ति वाले श्री हरि के शरीर हैं । अतः आपका कल्याण हो ।।

चतुस्त्रिंशः श्लोकः

मास्मिन्महाराज कृथाः स्म चिन्तां निशामयास्मद्वच आदृतात्मा ।
यद्ध्यायतो दैवहतं नु कर्तुं मनोऽतिरुष्टं विशते तमोऽन्धम् ।।३४।।

पदच्छेद—मा अस्मिन् महाराज कृथाः स्म चिन्ताम्, निशामय अस्मद् वचः आदृत आत्मा ।
यत् ध्यायतः दैव हतम् नु कर्तुम्, मनः अतिरुष्टम् विशते तमः अन्धम् ।।

शब्दार्थ—

मा	५.	मत	यत्	१२.	क्योंकि (जो)
अस्मिन्	३.	इस विषय में	ध्यायतः	१६.	चिन्ता करता है
महाराज	१.	हे राजन्	दैव	१३.	विधाता के
कृथाः	६.	करो (तथा)	हतम्	१४.	बिगाड़े हुये काम को
स्म	२.	तुम	नु	१९.	अवश्य
चिन्ताम्	४.	चिन्ता	कर्तुम्	१५.	बनाने की
निशामय	११.	सुनो	मनः	१७.	उसका मन
अस्मद्	९.	मेरी	अतिरुष्टम्	१८.	अत्यन्त क्रोध के
वचः	१०.	बात	विशते	२२.	प्रवेश करता है
आदृत	७.	आदर के	तमः	२१.	अज्ञान में
आत्मा ।	८.	साथ	अन्धम् ।।	२०.	घोर

श्लोकार्थ—हे राजन् ! तुम इस विषय में चिन्ता मत करो, तथा आदर के साथ मेरी बात सुनो । क्योंकि जो विधाता के बिगाड़े हुये काम को बनाने की चिन्ता करता है । उसका मन अत्यन्त क्रोध के कारण अवश्य घोर अज्ञान में प्रवेश करता है ।।

पञ्चत्रिंशः श्लोकः

क्रतुर्विरमतामेष देवेषु दुरवग्रहः ।
धर्मव्यतिकरो यत्र पाखण्डैरिन्द्रनिर्मितैः ॥३५॥

पदच्छेद—

क्रतुः विरमताम् एषः देवेषु दुरवग्रहः ।
धर्म व्यतिकरः यत्र पाखण्डैः इन्द्र निर्मितैः ॥

शब्दार्थ—

क्रतुः	२.	यज्ञ	धर्म व्यतिकरः	१०.	धर्म का नाश हो रहा है
विरमताम्	३.	रोक दिया जाय	यत्र	६.	इसके कारण
एषः	१.	यह	पाखण्डैः	९.	पाखण्डों से
देवेषु	४.	क्योंकि देवताओं में	इन्द्र	७.	इन्द्र के द्वारा
दुरवग्रहः	५.	दुराग्रह होता है	निर्मितैः ॥	८.	फैलाये गये

श्लोकार्थ—यह यज्ञ रोक दिया जाय क्योंकि देवताओं में दुराग्रह होता है । इसके कारण इन्द्र के द्वारा फैलाये गये पाखण्डों से धर्म का नाश हो रहा है ॥

षट्त्रिंशः श्लोकः

एभिरिन्द्रोपसंसृष्टैः पाखण्डैर्हारिभिर्जनम् ।
ह्रियमाणं विचक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट् ॥३६॥

पदच्छेद—

एभिः इन्द्र उपसंसृष्टैः पाखण्डैः हारिभिः जनम् ।
ह्रियमाणम् विचक्ष्व एनम् यः ते यज्ञधुक् अश्वमुट् ॥

शब्दार्थ—

एभिः	६.	इन	ह्रियमाणम्	९.	फंसते हुये
इन्द्र	४.	उस इन्द्र से	विचक्ष्व	१२.	देखो
उपसंसृष्टैः	५.	निर्मित	एनम्	१०.	इन
पाखण्डैः	८.	पाखण्डों में	यः, ते	१.	जिस इन्द्र ने आपके
हारिभिः	७.	मनोहारि	वै यज्ञधुक्	२.	अश्वमेघ यज्ञ में विघ्न के लिये
जनम् ।	११.	लोगों को	अश्व मुट् ॥	३.	आपके घोड़े को चुराया है

श्लोकार्थ—जिस इन्द्र ने आपके अश्वमेघ यज्ञ में विघ्न डालने के लिये आपके घोड़े को चुराया है, उस इन्द्र से निर्मित इन मनोहारि पाखण्डों में फंसते हुये इन लोगों को देखो ॥

सप्तत्रिंशः श्लोकः

भवान् परित्रातुमिहावतीर्णो धर्मं जनानां समयानुरूपम् ।
वेनापचारादवलुप्तमद्य तद्देहतो विष्णुकलासि वैन्य ॥३७॥

पदच्छेद— भवान् परित्रातुम् इह अवतीर्णः धर्मम् जनानाम् समय अनुरूपम् ।
वेन अपचारात् अवलुप्तम् अद्य तद् देहतः विष्णुकला असि वैन्य ॥

शब्दार्थ—

भवान्	१०.	आप	वेन	२.	राजा वेन के
परित्रातुम्	६.	रक्षा करने के लिये	अपचारात्	३	अत्याचार से
इह	११.	यहाँ पृथ्वी पर	अवलुप्तम्	४.	नष्ट हुये
अवतीर्णः	१३.	अवतार लिये हैं	अद्य	१.	इस समय
धर्मम्	८.	धर्म को	तद् देहतः	१२.	उस वेन के शरीर से
जनानाम्	५.	लोगों के	विष्णुकला	१५.	साक्षात् विष्णु के अंश
समय	६.	समय	असि	१६.	हैं
अनुरूपम् ।	७	अनुसार	वैन्य ॥	१४.	हे महाराज (आप)

श्लोकार्थ—इस समय राजा वेन के अत्याचार से नष्ट हुये लोगों के समयानुसार धर्म रक्षा करने के लिये आप यहाँ पृथ्वी पर उस वेन के शरीर से अवतार लिये हैं। हे महाराज ! आप साक्षात् विष्णु के अंश हैं ॥

अष्टात्रिंशः श्लोकः

स त्वं विमृश्यास्य भवं प्रजापते सङ्कल्पनं विश्वसृजां पिपीपृहि ।
ऐन्द्रीं च मायामुपधर्ममातरं प्रचण्डपाखण्डपथं प्रभो जहि ॥३८॥

पदच्छेद—सः त्वम् विमृश्य अस्य भवम् प्रजापते सङ्कल्पनम् विश्वसृजाम् पिपीपृहि ।
ऐन्द्रीम् च मायाम् उपधर्म मातरम् प्रचण्ड पाखण्ड पथम् प्रभो जहि ॥

शब्दार्थ—

सः त्वम्	२.	सो आप	ऐन्द्रीम्	६.	इन्द्र की
विमृश्य	५.	विचार करें (और)	च	१२	अतः
अस्य	३	इस	मायाम् उपधर्म	१०.	माया अधर्म की
भवम्	४.	जन्म पर	मातरम्	११.	जननी है
प्रजापते	१.	प्रजाओं के स्वामी (हे राजन्)	प्रचण्ड	१४.	प्रबल
सङ्कल्पनम्	७.	संकल्प को	पाखण्ड पथम्	१५.	आडम्बर के मार्ग को
विश्वसृजाम्	६.	संसार के रचयिता	प्रभो	१३.	हे राजन्
पिपीपृहि ।	८.	पूर्ण करें	जहि ॥	१६.	नष्ट करें

श्लोकार्थ—प्रजाओं के स्वामी हे राजन् ! सो आप इस जन्म पर विचार करें और संसार के रचयिता संकल्प को पूर्ण करें। इन्द्र की माया अधर्म की जननी है। अतः हे राजन् ! प्रबल आडम्बर के मार्ग को नष्ट करें।

एकोनचत्वारिंशः श्लोकः

मैत्रेय उवाच—इत्थं स लोकगुरुणा समादिष्टो विशाम्पतिः ।
तथा च कृत्वा वात्सल्यं मघोनापि च सन्दधे ॥३९॥

पदच्छेद—

इत्थम् सः लोक गुरुणा समादिष्टः विशाम्पतिः ।
तथा च कृत्वा वात्सल्यम् मघोना अपि च सन्दधे ॥

शब्दार्थ—

इत्थम्	१.	इस प्रकार	कृत्वा	९.	करके
सः	४.	उन	वात्सल्यम्	८.	प्रीति
लोक गुरुणा	२.	ब्रह्मा जी का	मघोना	७.	इन्द्र से साथ
समादिष्टः	३.	आदेश पाकर	अपि	१२.	भी
विशाम्पतिः ।	५.	महाराज पृथु ने	च	१०.	और
तथा च	६.	उसी प्रकार	सन्दधे ॥	११.	सन्धि कर ली

श्लोकार्थ—इस प्रकार ब्रह्माजी का आदेश पाकर उन महाराज पृथु ने उसी प्रकार इन्द्र के साथ प्रीति करके और सन्धि भी कर ली ॥

चत्वारिंशः श्लोकः

कृतावभृथस्नानाय पृथवे भूरिकर्मणे ।
वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ॥४०॥

पदच्छेद—

कृत अवभृथ स्नानाय पृथवे भूरि कर्मणे ।
वरान् ददुः ते वरदाः ये तद् बर्हिषि तर्पिताः ॥

शब्दार्थ—

कृत	१२.	कर लेने पर	ददुः	१४.	दिये
अवभृथ	१०.	यज्ञान्त	ते	५.	वे
स्नानाय	११.	स्नान	वरदाः	६.	वर दायक देवता
पृथवे	९.	महाराज पृथु को	ये	१.	जो देवतागण
भूरि	७.	अत्यधिक	तद्	२.	उनके
कर्मणे ।	८.	यज्ञ कर्मों को करने वाले	बर्हिषि	३.	यज्ञ में
वरान्	१३.	वरदान	तर्पिताः ॥	४.	प्रसन्न किये गये थे

श्लोकार्थ—जो देवतागण उनके यज्ञ में प्रसन्न किये गये थे; उन वरदायक देवताओंने अत्यधिक यज्ञ कर्मों को करने वाले महाराज पृथु को यज्ञान्तस्नान कर लेने पर वरदान दिये ।

एकचत्वारिंशः श्लोकः

विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्धदक्षिणाः ।
आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः ॥४१॥

पदच्छेद—

विप्राः सत्य आशिषः तुष्टाः श्रद्धया लब्ध दक्षिणाः ।
आशिषः युयुजुः क्षत्तः आदि राजाय सत्कृताः ॥

शब्दार्थ—

विप्राः	४.	ब्राह्मणों ने	दक्षिणाः ।	६.	दक्षिणा
सत्य	२.	सत्य	आशिषः	११.	आशीर्वाद
आशिषः	३.	आशीर्वाद वाले	युयुजुः	१२	दिया
तुष्टाः	८.	प्रसन्न होकर	क्षत्तः	१.	हे विदुर जी
श्रद्धया	५.	श्रद्धा के साथ	आदिराजाय	९.	आदिराज पृथु को
लब्ध	७.	प्राप्त कर लेने पर	सत्कृताः ॥	१०.	सत्कार और

श्लोकार्थ—हे विदुर जी ! सत्य आशीर्वाद वाले ब्राह्मणों ने श्रद्धा के साथ दक्षिणा प्राप्त कर लेने पर आदिराज पृथु को सत्कार और आशीर्वाद दिया ॥

द्वाचत्वारिंशः श्लोकः

त्वयाऽऽहूता महाबाहो सर्व एव समागताः ।
पूजिता दानमानाभ्यां पितृदेवर्षिमानवाः ॥४२॥

पदच्छेद—

त्वया आहूताः महाबाहो सर्वे एव समागताः ।
पूजिताः दान मानाभ्याम् पितृ देवर्षि मानवाः ॥

शब्दार्थ—

त्वया	२.	आपके	पूजिताः	१२.	पूजन किया है
आहूताः	३.	बुलाने पर	दान	१०.	दान और
महाबाहो	१.	हे महाबाहो पृथु जी	मानाभ्याम्	११.	मान से (उनका)
सर्वे	४.	सब	पितृ	६.	पितर
एव	५.	ही	देवर्षि	७.	देवता ऋषि और
समागताः ।	९.	आये (आपने)	मानवाः ॥	८.	मनुष्यगण

श्लोकार्थ—हे महाबाहो पृथु जी ! आपके बुलाने पर सब ही पितर, देवता, ऋषि और मनुष्यगण आये । आपने दान और मान से उनका पूजन किया ॥

श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पृथुविजये एकोनविंशः अध्यायः ॥१९॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

चतुर्थः स्कन्धः

विंशः अध्यायः

प्रथमः श्लोकः

मैत्रेय उवाच—भगवानपि वैकुण्ठः साकं मघवता विभुः ।
यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक् तमभाषत ॥१॥

पदच्छेद—

भगवान् अपि वैकुण्ठः साकम् मघवता विभुः ।
यज्ञैः यज्ञपतिः तुष्टः यज्ञभुक् तम् अभाषत ॥

शब्दार्थ—

भगवान्	६.	भगवान्	यज्ञैः	१.	अश्वमेध यज्ञों से
अपि	८.	भी	यज्ञपतिः	३.	यज्ञेश्वर
वैकुण्ठः	७.	श्री हरि	तुष्टः	२.	प्रसन्न होकर
साकम्	१०.	साथ (वहाँ आये)	यज्ञभुक्	४.	यज्ञ के भोक्ता
मघवता	९.	इन्द्र के	तम्	११.	उन महाराज पृथु जी से
विभुः ।	५.	सर्व व्यापक	अभाषत ॥	१२.	बोले

श्लोकार्थ—अश्वमेध यज्ञों से प्रसन्न होकर यज्ञेश्वर यज्ञ के भोक्ता सर्व व्यापक भगवान् श्री हरि भी इन्द्र के साथ वहाँ आये और उन महाराज पृथु जी से बोले ॥

द्वितीयः श्लोकः

श्रीभगवानुवाच—एष तेऽकार्षीद्भङ्गं हयमेधशतस्य ह ।
क्षमापयत आत्मानममुष्य क्षन्तुमर्हसि ॥२॥

पदच्छेद—

एषः ते अकार्षीत् भङ्गम् हयमेध शतस्य ह ।
क्षमापयते आत्मानम् अमुष्य क्षन्तुम् अर्हसि ॥

शब्दार्थ—

एषः	१.	इस इन्द्र ने	ह ।	७.	अतः
ते	२.	आपके	क्षमापयते	९.	क्षमा माँग रहा है
अकार्षीत्	६.	उपस्थित किया है	आत्मानम्	८.	अपने लिये
भङ्गम्	५.	विघ्न	अमुष्य	१०.	इसे
हयमेध	४.	अश्वमेध यज्ञ में	क्षन्तुम्	११.	क्षमा करने में
शतस्य	३.	सौवें	अर्हसि ॥	१२.	तुम समर्थ हो

श्लोकार्थ—इस इन्द्र ने आपके सौवें अश्वमेध यज्ञ में विघ्न उपस्थित किया है । अतः अपने लिये क्षमा माँग रहा है । इसे क्षमा करने में तुम समर्थ हो ॥

तृतीयः श्लोकः

सुधियः साधवो लोके नरदेव नरोत्तमाः ।
नाभिद्रुह्यन्ति भूतेभ्यो यर्हि नात्मा कलेवरम् ॥३॥

पदच्छेद—

सुधियः साधवः लोके नरदेव नरोत्तमाः ।
न अभिद्रुह्यन्ति भूतेभ्यः यर्हि न आत्मा कलेवरम् ॥

शब्दार्थ—

सुधियः	३.	बुद्धिमान्	अभिद्रुह्यन्ति	८.	वैर करते हैं
साधवः	४.	साधु स्वभाव वाले	भूतेभ्यः	६.	अन्य प्राणियों से
लोके	२.	संसार में	यर्हि	९.	क्योंकि (यह)
नरदेव	१.	हे राजन्	न	१२.	नहीं
नरोत्तमः ।	५.	उत्तम पुरुष	आत्मा	११.	आत्मा
न	७.	नहीं	कलेवरम् ॥	१०.	शरीर

श्लोकार्थ—हे राजन् ! संसार में बुद्धिमान् साधुस्वभाव वाले उत्तम पुरुष अन्य प्राणियों से वैर नहीं करते हैं। क्योंकि यह शरीर आत्मा नहीं है ॥

चतुर्थः श्लोकः

पुरुषा यदि मुह्यन्ति त्वादृशा देवमायया ।
श्रम एव परं जातो दीर्घया वृद्धसेवया ॥४॥

पदच्छेद—

पुरुषाः यदि मुह्यन्ति त्वादृशाः देव मायया ।
श्रमः एव परम् जातः दीर्घया वृद्ध सेवया ॥

शब्दार्थ—

पुरुषाः	२.	मनुष्य	श्रमः	१२.	परिश्रम (ही)
यदि	३.	यदि	एव	११.	केवल
मुह्यन्ति	६.	मोहित होते हैं	परम्	७.	तब तो
त्वादृशाः	१.	तुम्हारे जैसे	जातः	१३.	मिला
देव	४.	भगवान् की	दीर्घया	९.	लम्बी समय की
मायया ।	५.	माया से	वृद्ध	८.	ज्ञानी जनों की
			सेवया ॥	१०.	सेवा से

श्लोकार्थ—तुम्हारे जैसे मनुष्य यदि भगवान् की माया से मोहित होते हैं तब तो ज्ञानीजनों की लम्बी समय की सेवा से केवल परिश्रम ही मिला ॥

पञ्चमः श्लोकः

अतः कायमिमं विद्वानविद्याकामकर्मभिः ।
आरब्ध इति नैवास्मिन् प्रतिबुद्धोऽनुषज्जते ॥५॥

पदच्छेद—

अतः कायम् इमम् विद्वान् अविद्या काम कर्मभिः ।
आरब्धः इति न एव अस्मिन् प्रतिबुद्धः अनुषज्जते ॥

शब्दार्थ—

अतः	१.	इसलिये	आरब्धः	९.	बना है
कायम्	५.	शरीर	इति	१०.	ऐसा समझकर
इमम्	४.	यह	न	१२.	न
विद्वान्	२.	बुद्धिमान्	एव	१३.	ही
अविद्या	६.	अविद्या	अस्मिन्	११.	उसमें
काम	७.	वासना (और)	प्रतिबुद्धः	३.	जागरुक मनुष्य
कर्मभिः ।	८.	कर्मों से	अनुषज्जते ॥	१४.	आसक्त होता है

श्लोकार्थ—इसलिये बुद्धिमान् जागरुक मनुष्य यह शरीर अविद्या, वासना और कर्मों से बना है ऐसा समझ कर उसमें नहीं आसक्त होता है ॥

षष्ठः श्लोकः

असंसक्तः शरीरेऽस्मिन्नमुनोत्पादिते गृहे ।
अपत्ये द्रविणे वापि कः कुर्यान्ममतां बुधः ॥६॥

पदच्छेद—

असंसक्तः शरीरे अस्मिन् अमुनाः उत्पादिते गृहे ।
अपत्ये द्रविणे वा अपि कः कुर्यात् ममताम् बुधः ॥

शब्दार्थ—

असंसक्तः	३.	निर्लिप्त रहता हुआ	द्रविणे	११.	धन में
शरीरे	२.	शरीर में	वा	१०.	अथवा
अस्मिन्	१.	इस	अपि	१२.	भी
अमुना	६.	इससे	कः	४.	कौन
उत्पादिते	७.	उत्पन्न किये गये	कुर्यात्	१४.	करेगा
गृहे ।	८.	घर	ममताम्	१३.	ममता
अपत्ये	९.	सन्तान	बुधः ॥	५.	बुद्धिमान्

श्लोकार्थ—इस शरीर में निर्लिप्त रहता हुआ कौन बुद्धिमान् इससे उत्पन्न किये गये घर, सन्तान अथवा धन में भी ममता करेगा ।

सप्तमः श्लोकः

एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रयः ।
सर्वगोऽनावृतः साक्षी निरात्माऽऽत्माऽऽत्मनः परः ॥७॥

पदच्छेद—

एकः शुद्धः स्वयम् ज्योतिः निर्गुणः असौ गुण आश्रयः ।
सर्वगः अनावृतः साक्षी निरात्मा आत्मा आत्मनः परः ॥

शब्दार्थ—

एकः	३.	एक	सर्वगः	९.	सर्व व्यापक
शुद्धः	४.	माया से रहित	अनावृतः	१०.	आवरण रहित
स्वयम्	५.	स्वयम्	साक्षी	११.	द्रष्टा
ज्योतिः	६.	प्रकाश	निरात्मा	१२.	शरीर से भिन्न (और)
निर्गुणः	७.	निर्गुण	आत्मा	२.	आत्मा
असौ	१.	वह	आत्मनः	१३.	मन से
गुण आश्रयः ।	८.	सत्त्वादि गुणों का आश्रय स्थान	परः ॥	१४.	परे है

श्लोकार्थ—वह आत्मा एक, माया से रहित, स्वयम् प्रकाश, निर्गुण, सत्त्वादिगुणों का आश्रय स्थान, सर्व व्यापक, आवरण रहित, द्रष्टा, शरीर से भिन्न और मन से परे है ॥

अष्टमः श्लोकः

य एवं सन्तमात्मानमात्मस्थं वेद पुरुषः ।
नाज्यते प्रकृतिस्थोऽपि तद्गुणैः स मयि स्थितः ॥८॥

पदच्छेद—

यः एवम् सन्तम् आत्मानम् आत्मस्थम् वेद पुरुषः ।
न अज्यते प्रकृतिस्थः अपि तद् गुणैः सः मयि स्थितः ॥

शब्दार्थ—

यः	१.	जो	अज्यते	१३.	लिप्त होता है (क्योंकि)
एवम्	५.	इस प्रकार	प्रकृतिस्थः	८	प्रकृति में स्थित रहता हुआ
सन्तम्	६.	विद्यमान	अपि	९.	भी
आत्मानम्	४.	आत्मा को	तद्	१०.	प्रकृति के
आत्मस्थम्	३.	अपने में स्थित	गुणैः	११.	गुणों से
वेद	७.	जानता है वह	सः	१४.	वह
पुरुषः ।	२.	पुरुष	मयि	१५.	मुझ में
न	१२.	नहीं	स्थितः ॥	१६.	स्थित रहता है

श्लोकार्थ—जो पुरुष अपने में स्थित आत्मा को इस प्रकार विद्यमान जानता है, वह प्रकृति में स्थित रहता हुआ भी प्रकृति के गुणों में लिप्त नहीं होता है क्योंकि वह मुझ में स्थित रहता है ॥

नवमः श्लोकः

यः स्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वितः ।
भजते शनकैस्तस्य मनो राजन् प्रसीदति ॥९॥

पदच्छेद—

यः स्वधर्मेण माम् नित्यम् निराशीः श्रद्धया अन्वितः ।
भजते शनकैः तस्य मनः राजन् प्रसीदति ॥

शब्दार्थ—

यः	१.	जो	भजते	८.	भजन करता है
स्वधर्मेण	३	अपने वर्णाश्रम धर्म से	शनकैः	१०.	धीरे-धीरे
माम्	७.	मेरा	तस्य	११.	उसका
नित्यम्	६.	सदा	मनः	१२.	मन
निराशीः	२.	निष्काम पुरुष	राजन्	९.	हे महाराज
श्रद्धया	४.	श्रद्धा के	प्रसीदति ॥	१३.	प्रसन्न हो जाता है
अन्वितः ।	५.	साथ			

श्लोकार्थ—जो निष्काम पुरुष अपने वर्णाश्रम धर्म से श्रद्धा के साथ सदा मेरा भजन करता है, हे महाराज ! धीरे-धीरे उसका मन प्रसन्न हो जाता है ॥

दशमः श्लोकः

परित्यक्तगुणः सम्यग्दर्शनो विशदाशयः ।
शान्तिं मे समवस्थानं ब्रह्म कैवल्यमश्नुते ॥१०॥

पदच्छेद—

परित्यक्त गुणः सम्यग् दर्शनः विशद आशयः ।
शान्तिम् मे समवस्थानम् ब्रह्म कैवल्यम् अश्नुते ॥

शब्दार्थ—

परित्यक्त	४.	छोड़कर	शान्तिम्	८.	शान्ति स्वरूप
गुणः	३.	विषयों को	मे	९.	मेरे
सम्यग्	५.	यथार्थ	समवस्थानम्	७.	तदनन्तर समता और
दर्शनः	६.	ज्ञान प्राप्त करता है	ब्रह्म	१०.	ब्रह्म पद
विशद	१.	निर्मल	कैवल्यम्	११.	मोक्ष को
आशयः ।	२.	मन-वाला-मनुष्य	अश्नुते ॥	१२.	प्राप्त करता है

श्लोकार्थ—निर्मल मन वाला मनुष्य विषयों को छोड़कर यथार्थ ज्ञान प्राप्त करता है । तदनन्तर समता और शान्ति स्वरूप मेरे ब्रह्मपद मोक्ष को प्राप्त करता है ॥

एकादशः श्लोकः

उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनाम् ।
कूटस्थमिममात्मानं यो वेदाप्नोति शोभनम् ॥११॥

पदच्छेद— उदासीनम् इव अध्यक्षम् द्रव्य ज्ञान क्रिया आत्मनाम् ।
कूटस्थम् इमम् आत्मानम् यः वेद आप्नोति शोभनम् ॥

शब्दार्थ—

उदासीनम्	९.	निर्लिप्त के	कूटस्थम्	११.	निर्विकार
इव	१०.	समान	इमम्	७.	इस
अध्यक्षम्	६.	साक्षी	आत्मानम्	८.	आत्मा को
द्रव्य	२.	पञ्च महाभूत	यः	१.	जो मनुष्य
ज्ञान	३.	ज्ञान	वेद	१२.	जानता है (वह)
क्रिया	४.	क्रिया और	आप्नोति	१४.	प्राप्त करता है
आत्मनाम् ।	५.	मन के	शोभनम् ॥	१३.	श्रेयस्कर (मोक्ष को)

श्लोकार्थ—जो मनुष्य पञ्चमहाभूत ज्ञान, क्रिया और मन के साक्षी इस आत्मा को निर्लिप्त के समान निर्विकार जानता है, वह श्रेयस्कर मोक्ष को प्राप्त करता है ॥

द्वादशः श्लोकः

भिन्नस्य लिङ्गस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः ।
दृष्टासु सम्पत्सु विपत्सु सूरयो न विक्रियन्ते मयि बद्धसौहृदाः ॥१२॥

पदच्छेद— भिन्नस्य लिङ्गस्य गुण प्रवाहः द्रव्य क्रिया कारक चेतन आत्मनः ।
दृष्टासु सम्पत्सु विपत्सु सूरयः न विक्रियन्ते मयि बद्ध सौहृदाः ॥

शब्दार्थ—

भिन्नस्य	१.	आत्मा से भिन्न (तथा)	दृष्टासु	१३.	आने पर भी
लिङ्गस्य	७.	सूक्ष्म शरीर की	सम्पत्सु	११.	सुख (और)
गुण	८.	त्रिगुणात्मक	विपत्सु	१२.	दुःख
प्रवाहः	९.	सृष्टि होती रहती है	सूरयः	१०.	बुद्धिमान् (मनुष्य)
द्रव्य	२.	पञ्च महाभूत	न	१४.	नहीं
क्रिया	३.	इन्द्रिय (और)	विक्रियन्ते	१५.	विकार को प्राप्त होते हैं
कारक	४.	(उनके) देवता	मयि	१६.	क्योंकि मेरे में (उनका)
चेतन	५.	मन	बद्ध	१८.	बंधा रहता है
आत्मनः ।	६.	स्वरूप	सौहृदाः ॥	१७.	अनुराग

श्लोकार्थ— आत्मा से भिन्न तथा पञ्च महाभूत इन्द्रियाँ और उनके देवता मनः स्वरूप सूक्ष्म शरीर की त्रिगुणात्मक सृष्टि होती रहती है । बुद्धिमान् मनुष्य सुख और दुःख आने पर भी विकार को नहीं प्राप्त होते हैं । क्योंकि मेरे में उनका अनुराग बंधा रहता है ॥

त्रयोदशः श्लोकः

समः समानोत्तममध्यमाधमः सुखे च दुःखे च जितेन्द्रियाशयः ।
मयोपक्लृप्ताखिललोकसंयुतो विधत्स्व वीराखिललोकरक्षणम् ॥१३॥

पदच्छेद— समः समान उत्तम मध्यम अधमः सुखे च दुःखे च जित इन्द्रिय आशयः ।
मया उपक्लृप्त अखिल लोक संयुतः विधत्स्व वीर अखिल लोक रक्षणम् ॥

शब्दार्थ—

समः	१२.	समता के साथ (तुम)	आशयः ।	९.	मन (और)
समान	४.	समान होकर	मया	१३.	मेरे द्वारा
उत्तम मध्यम	२.	सात्त्विक राजस (और)	उपक्लृप्त	१४.	जुटाये गये
अधमः	३.	तामस मनुष्यों के प्रति	अखिल लोक	१५.	सम्पूर्ण मन्त्रियों के
सुखे	६.	सुख	संयुतः	१६.	साथ
च	५.	तथा	विधत्स्व	२०.	करो
दुःखे	८.	दुःख में	वीर	१.	हे वीर पृथु जी
च	७.	और	अखिल	१७.	सारी
जित	११.	वश में करके	लोक	१८.	प्रजा का
इन्द्रिय	१०.	इन्द्रियों को	रक्षणम् ॥	१९.	पालन

श्लोकार्थ—हे वीर ! पृथु जी सात्त्विक, राजस और तामस मनुष्यों के प्रति समान होकर तथा सुख और दुःख में मन और इन्द्रियों को वश में करके समता के साथ तुम मेरे द्वारा जुटाये गये सम्पूर्ण मन्त्रियों के साथ सारी प्रजा का पालन करो ॥

चतुर्दशः श्लोकः

श्रेयः प्रजापालनमेव राज्ञो यत्साम्पराये सुकृतात् षष्ठमंशम् ।
हर्तान्यथा हृतपुण्यः प्रजानामरक्षिता करहारोऽघमत्ति ॥१४॥

पदच्छेद— श्रेयः प्रजा पालनम् एव राज्ञः यत् साम्परायये सुकृतात् षष्ठम् अंशम् ।
हर्ता अन्यथा हृत पुण्यः प्रजानाम् अरक्षिता करहारः अघम् अत्ति ॥

शब्दार्थ—

श्रेयः	४.	श्रेयस्कर है	हर्ता	९.	प्राप्त करता है
प्रजा पालनम्	२.	प्रजा का पालन	अन्यथा	१०	नहीं तो
एव	३	ही	हृत	१५	क्षीण हो जाता है (और)
राज्ञः	१	राजा के लिये	पुण्यः	१४.	उसका पुण्य
यत्	५.	जिससे (वह)	प्रजानाम्	११.	प्रजाओं का
साम्पराये	६.	परलोक में	अरक्षिता	१२.	पालन न करके (उनसे)
सुकृतात्	७.	प्रजा के पुण्य से	करहारः	१३.	जो कर लेता है (उससे)
षष्ठम् अंशम् ।	८.	छठवां भाग	अघम् अत्ति ॥	१६.	(वह) पाप भोगता है

श्लोकार्थ—राजा के लिये प्रजा का पालन ही श्रेयस्कर है; जिससे वह परलोक में प्रजा के पुण्य से छठवां भाग प्राप्त करता है । नहीं तो प्रजाओं का पालन न करके उनसे जो कर लेता है उससे उसका पुण्य क्षीण हो जाता है और वह पाप भोगता है ॥

पञ्चदशः श्लोकः

एवं द्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोऽन्यतमोऽवितास्याः ।
ह्रस्वेन कालेन गृहोपयातान् द्रष्टासि सिद्धाननुरक्तलोकः ॥१५॥

पदच्छेद—एवम् द्विज अग्र्य अनुमत अनुवृत्त धर्म प्रधानः अन्यतमः अविता अस्याः ।
ह्रस्वेन कालेन गृह उपयातान् द्रष्टासि सिद्धान् अनुरक्त लोकः ॥

शब्दार्थ—

एवम्	१.	इस प्रकार (यदि तुम)	अस्याः ।	८.	इस पृथ्वी को
द्विज	२.	त्रिवर्ण	ह्रस्वेन	१३.	थोड़े
अग्र्य	३.	श्रेष्ठ विप्रों की	कालेन	१४.	समय के बाद
अनुमत	४.	सम्मति और	गृह	१५.	अपने घर
अनुवृत्त	५.	परम्परा प्राप्त	उपयातान्	१६.	पधारे हुये
धर्म	६.	धर्म को	द्रष्टासि	१८.	दर्शन करोगे
प्रधानः	७.	प्रमुख मानते हुये	सिद्धान्	१७.	सनकादि सिद्धों का
अन्यतमः	९.	अद्वितीय न्यायप्रिय	अनुरक्त	१२.	प्रेम करेगी (और)
अविता	१०.	पालक होंगे (तो)	लोकः ॥	११.	प्रजा तुमसे

श्लोकार्थ—इस प्रकार यदि तुम त्रिवर्ण (ब्राह्मण, क्षत्रिय, वैश्य) में श्रेष्ठ विप्रों की सम्मति और परम्परा से प्राप्त धर्म को प्रमुख मानते हुये अद्वितीय न्याय प्रिय पालक होंगे । तो प्रजा तुमसे प्रेम करेगी; और थोड़े समय के बाद अपने घर पधारे हुये सनकादि सिद्धों के दर्शन करोगे ॥

षोडशः श्लोकः

वरं च मत् कञ्चन मानवेन्द्र वृणीष्व तेऽहं गुणशीलयन्त्रितः ।
नाहं मखैर्वै सुलभस्तपोभिर्योगेन वा यत्समचित्तवर्ती ॥१६॥

पदच्छेद— वरम् च मत् कञ्चन मानवेन्द्र वृणीष्व ते अहम् गुण शील यन्त्रितः ।
न अहम् मखैः वै सुलभः तपोभिः योगेन वा मत् सम चित्तवर्ती ॥

शब्दार्थ—

वरम्	७.	वरदान	न	१४.	नहीं होता हूँ
च मत् कञ्चन	६.	अतः मुझसे कोई भी	अहम् मखैः	९.	मैं यज्ञों से
मानवेन्द्र	१.	हे राजन्	वै सुलभः	१३.	बिल्कुल सुलभ
वृणीष्व	८.	मांगो	तपोभिः	१०.	तपस्याओं से
ते	३.	तुम्हारे	योगेन	१२.	योग से
अहम्	२.	मैं	वा	११.	अथवा
गुण शील	४.	सद्गुणों और स्वभाव से	मत् सम	१५.	क्योंकि मैं समदर्शियों के
यन्त्रिताः	५.	वश में हूँ	चित्तवर्ती ।	१६.	हृदय में रहता हूँ

श्लोकार्थ—हे राजन् ! मैं तुम्हारे सद्गुणों और स्वभाव से वश में हूँ । अतः मुझसे कोई भी वरदान मांगों । मैं यज्ञों से, तपस्याओं से अथवा योग से बिल्कुल सुलभ नहीं हूँ । क्योंकि मैं समदर्शियों के हृदय में रहता हूँ ॥

सप्तदशः श्लोकः

मैत्रेय उवाच—स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित्।
अनुशासित आदेशं शिरसा जगृहे हरेः ॥१७॥

पदच्छेद—

स: इत्थम् लोक गुरुणा विष्वक्सेनेन विश्वजित्।
अनुशासितः आदेशम् शिरसा जगृहे हरेः ॥

शब्दार्थ—

सः	६.	उन महाराज पृथु ने	अनुशासितः	४.	कहने पर
इत्थम्	३.	इस प्रकार	आदेशम्	८.	आदेश
लोक गुरुणा	१.	जगद् गुरु (भगवान्)	शिरसा	९.	शिर से
विष्वकसेनेन	२.	श्री हरि के	जगृहे	१०.	ग्रहण किया
विश्वजित्।	५.	विश्व विजयी	हरेः ॥	७.	भगवान् का

श्लोकार्थ—जगद्गुरु भगवान् श्री हरि के इस प्रकार कहने पर विश्व विजयी उन महाराज पृथु ने भगवान् का आदेश शिर से ग्रहण किया ॥

अष्टादशः श्लोकः

स्पृशन्तं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा।
शतक्रतुं परिष्वज्य विद्वेषं विससर्ज ह ॥१८॥

पदच्छेद—

स्पृशन्तम् पादयोः प्रेम्णा व्रीडितम् स्वेन कर्मणा।
शतक्रतुम् परिष्वज्य विद्वेषम् विससर्ज ह ॥

शब्दार्थ—

स्पृशन्तम्	६.	छूते ही	शतक्रतुम्	७.	इन्द्र का
पादयोः	५.	पैर	परिष्वज्य	९.	आलिंगन करके
प्रेम्णा	८.	प्रेम से	विद्वेषम्	१०.	मनो मालिन्य
व्रीडितम्	४.	लजा कर	विससर्ज	११.	निकाल दिया
स्वेन	२.	अपने	ह ॥	१.	उस समय
कर्मणा।	३.	कर्म से			

श्लोकार्थ—उस समय अपने कर्म से लजा कर पैर छूते ही इन्द्र का प्रेम से आलिंगन करके मनोमालिन्य निकाल दिया ॥

एकोनविंशः श्लोकः

भगवानथ विश्वात्मा पृथुनोपहृतार्हणः ।
समुज्जिहानया भक्त्या गृहीतचरणाम्बुजः ॥१९॥

पदच्छेद—

भगवान् अथ विश्व आत्मा पृथुना उपहृत अर्हणः ।
समुज्जिहानया भक्त्या गृहीत चरण अम्बुजः ॥

शब्दार्थ—

भगवान्	५.	भगवान् श्री हरि की	अर्हणः ।	६.	पूजा का
अथ	१.	तदनन्तर	समुज्जिहानया	८.	उमड़ते
विश्व	३.	सबकी	भक्त्या	९.	भक्ति-भाव से
आत्मा	४.	आत्मा	गृहीत	१२.	पकड़ लिया
पृथुना	२.	महाराज पृथु ने	चरण	१०.	प्रभु के चरण
उपहृत	७.	विधान किया (और)	अम्बुजः ॥	११.	कमल को

श्लोकार्थ—तदनन्तर महाराज पृथु ने सब की आत्मा भगवान् श्री हरि की पूजा का विधान किया। और उमड़ते भक्ति-भाव से प्रभु के चरण कमल को पकड़ लिया ॥

विंशः श्लोकः

प्रस्थानाभिमुखोऽप्येनमनुग्रहविलम्बितः ।
पश्यन् पद्मपलाशाक्षो न प्रतस्थे सुहृत्सताम् ॥२०॥

पदच्छेद—

प्रस्थान अभिमुखः अपि एनम् अनुग्रह विलम्बितः ।
पश्यन् पद्म पलाश अक्षः न प्रतस्थे सुहृत् सताम् ॥

शब्दार्थ—

प्रस्थान	३.	वहाँ से जाना	पद्म	८.	(वे अपने) कमल
अभिमुखः	४.	चाहते थे	पलाश	९.	दल के समान
अपि	५.	किन्तु (पृथु के प्रति)	अक्षः	१०.	नेत्रों से
एनम्	११.	उन्हें	न	१३.	(और वहाँ से) न
अनुग्रह	६.	वात्सल्य भाव से	प्रतस्थे	१४.	जा सके
विलम्बितः ।	७.	(उन्हें) रोक दिया	सुहृत्	२.	प्रेमी भगवान् श्री हरि
पश्यन्	१२.	देखते ही रह गये	सताम् ॥	१.	सज्जनों के

श्लोकार्थ—सज्जनों के प्रेमी भगवान् श्री हरि वहाँ से जाना चाहते थे; किन्तु पृथु के प्रति वात्सल्य भाव ने उन्हें रोक दिया। वे अपने कमल दल के समान नेत्रों से उन्हें देखते ही रह गये। और वहाँ से न जा सके ॥

एकविंशः श्लोकः

स आदिराजो रचिताञ्जलिर्हरिं विलोकितुं नाशकदश्रुलोचनः ।
न किञ्चनोवाच स बाष्पविक्लवो हृदोपगुह्यामुमधादवस्थितः ॥२१॥

पदच्छेद—सः आदिराजः रचित अञ्जलिः हरिम् विलोकितुम् न अशकत् अश्रु लोचनः ।
न किञ्चन उवाच सः बाष्प विक्लवः हृदा उपगुह्य अमुम् अधात् अवस्थितः ॥

शब्दार्थ—

सः	२.	वे महाराज पृथु	न	११.	नहीं
आदिराजः	१.	आदिराज	किञ्चन	१०.	कुछ
रचित	१९.	जोड़े	उवाच	१२.	बोल सके
अञ्जलिः	१८.	हाथ	सः	१३.	वे (केवल)
हरिम्	६.	भगवान् का	बाष्प विक्लवः	९.	कण्ठ गद्गद हो जाने से
विलोकितुम्	७	दर्शन करने में	हृदा	१४.	हृदय से
न	५.	न (तो)	उपगुह्य	१६.	आलिंगन कर
अशकत्	८.	समर्थ हो सके (और)	अमुम्	१५.	उनका
अश्रु	४.	आंसु भर आने से	अधात्	१७.	पकड़े रहे (और)
लोचनः ।	३.	नेत्रों में	अवस्थितः ॥	२०.	खड़े रहे

श्लोकार्थ—आदिराज वे महाराज पृथु नेत्रों में आंसू भर आने से न तो भगवान् का दर्शन करने में समर्थ हो सके और कण्ठ गद्गद हो जाने से कुछ नहीं बोल सके। वे केवल हृदय से उनका आलिंगन कर पकड़े रहे और हाथ जोड़े खड़े रहे ॥

द्वाविंशः श्लोकः

अथावमृज्याश्रुकला विलोकयन्नतृप्तदृग्गोचरमाह पूरुषम् ।
पदा स्पृशन्तं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरङ्गविद्विषः ॥२२॥

पदच्छेद— अथ अवमृज्य अश्रुकलाः विलोकयन् अतृप्तदृग् गोचरम् आह पूरुषम् ।
पदा स्पृशन्तम् क्षितिम् अंसे उन्नते विन्यस्त हस्त अग्रम् उरङ्ग विद्विषः ॥

शब्दार्थ—

अथ	१.	तदनन्तर (पृथु जी)	पदा	९.	(भगवान्) अपने पैर से
अवमृज्य	३.	पोंछकर	स्पृशन्तम्	११.	छूते हुये
अश्रुकलाः	२.	(अपने) आंसुओं की धारा को	क्षितिम्	१०.	पृथ्वी को
विलोकयन्	७	देखते हुये (इस प्रकार)	अंसे	१४.	कन्धे पर
अतृप्तदृग्	४.	अतृप्त प्यासी दृष्टि से	उन्नते	१३.	ऊँचे
गोचरम्	५.	इन्द्रियों के विषय	विन्यस्त	१६.	रखे हुए
आह	८.	कहने लगे (उस समय)	हस्त अग्रम्	१५.	हाथ की अंगुलियों को
पूरुषम् ।	६.	आदि पुरुष को	उरङ्ग विद्विषः ॥	१२.	सर्प शत्रु गरुड़ के

श्लोकार्थ—तदनन्तर पृथु जी अपने आँसुओं की धारा को पोंछकर अतृप्त प्यासी दृष्टि से इन्द्रियों के विषय आदि पुरुष को देखते हुये इस प्रकार कहने लगे। उस समय भगवान् अपने पैर से पृथ्वी को छूते हुये सर्प के शत्रु गरुड़ के ऊँचे कन्धे पर हाथ की अंगुलियों को रखे हुए थे ॥

त्रयोविंशः श्लोकः

पृथुरुवाच—वरान् विभो त्वद्वरदेश्वराद् बुधः कथं वृणीते गुणविक्रियात्मनाम् ।
ये नारकाणामपि सन्ति देहिनां तानीश कैवल्यपते वृणे न च ॥२३॥

पदच्छेद—वरान् विभो त्वद् वरद ईश्वरात् बुधः कथम् वृणोते गुण विक्रिया आत्मनाम् ।
ये नारकाणाम् अपि सन्ति देहिनाम् तान् ईश कैवल्यपते वृणे न च ॥

शब्दार्थ—

वरान्	८.	विषयों के मनोरथों को	ये नरकाणाम्	१०.	ये विषय तो नारकी
विभो	१.	हे प्रभो	अपि सन्ति	१२.	भी मिलते हैं
त्वद्	४.	आप से	देहिनाम्	११.	जीवों को
वरद	२.	वर देने वालों को (भी)	तान्	१६.	उन तुच्छ विषयों को
ईश्वरात्	३.	वर देने में समर्थ	ईश	१५.	हे स्वामिन् (मैं)
बुधः	५.	बुद्धिमान् मनुष्य	कैवल्यपते	१४.	मोक्ष देने वाले
कथम् वृणीते	६.	कैसे माँग सकता है	वृणे	१८.	माँगता हूँ
गुण विक्रिया	६.	विषयों से विकार को	न	१७.	नहीं
आत्मनाम्	७.	प्राप्त होने वाले लोगों के	च ॥	१३.	अतः

श्लोकार्थ—हे प्रभो ! वर देने वालों को भी वर देने में समर्थ आपसे बुद्धिमान् मनुष्य विषयों से विकार को प्राप्त होने वाले लोगों के विषयों के मनोरथों को कैसे माँग सकता है ? ये विषय तो नारकी जीवों को भी मिलते हैं। अतः मोक्ष को देने वाले हे स्वामिन् ! मैं उन तुच्छ विषयों को नहीं मांगता हूँ ॥

चतुर्विंशः श्लोकः

न कामये नाथ तदप्यहं क्वचिन्न यत्र युष्मच्चरणाम्बुजासवः ।
महत्तमान्तर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः ॥२४॥

पदच्छेद—न कामये नाथ तद् अपि अहम् क्वचित् न यत्र युष्मत् चरण अम्बुज आसवः ।
महत्तम अन्तर् हृदयात् मुख च्युतः विधत्स्व कर्ण अयुतम् एष मे वरः ॥

शब्दार्थ—

न कामये	४.	नहीं चाहता हूँ	महत्तम	६.	महा पुरुषों के
नाथ	१.	हे स्वामिन्	अन्तर्	८.	अन्दर से
तद् अपि	३.	वह मोक्ष सुख भी	हृदयात्	७.	हृदय के
अहम्	२.	मैं	मुखच्युत	९.	उनके मुख द्वारा चूता हुआ
क्वचित्	१२.	बिल्कुल	विधत्स्व	१६.	दे दीजिये
न	१३	नहीं (है अतः)	कर्ण	१५.	कान
यत्र	५.	जिसमें	अयुतम्	१४	(मुझे) दस हजार
युष्मत् चरण	१०.	आपके चरण	एषः	१८.	यही
अम्बुज आसवः ।	११.	कमलों का पराग	मे	१७.	मेरा
			वरः ॥	१९.	प्रार्थना है

श्लोकार्थ—हे स्वामिन् ! मैं वह मोक्ष सुख भी नहीं चाहता हूँ, जिसमें महापुरुषों के हृदय के अन्दर से उनके मुख द्वारा चूता हुआ आपके चरण कमलों का पराग बिल्कुल नहीं है । अतः मुझे दस हजार कान दे दीजिये । मेरी यही प्रार्थना है ॥

पञ्चविंशः श्लोकः

स उत्तमश्लोक महन्मुखच्युतो भवत्पदाम्भोजसुधाकणानिलः ।
स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः ॥२५॥

पदच्छेद— सः उत्तमश्लोक महत् मुखच्युतः भवत् पद अम्भोज सुधाकण अनिलः ।
स्मृतिम् पुनः विस्मृत तत्त्ववर्त्मनाम् कुयोगिनाम् नः वितरति अलम् वरैः ॥

शब्दार्थ—

सः	८.	वह	स्मृतिम्	१५.	स्मरण
उत्तमश्लोक	१.	पुण्य कीर्ति हे प्रभो	पुनः	१४.	फिर से (भगवान् का)
महत्	२.	महापुरुषों के	विस्मृत	११.	भूले हुये
मुखच्युतः	३.	मुख से निकली हुई	तत्त्ववर्त्मनाम्	१०.	भगवत् स्वरूप के मार्ग को
भवत्	४.	आपके	कुयोगिनाम्	१३.	कुयोगियों को
पद	५.	चरण	नः	१२.	हम
अम्भोज	६.	कमल के	वितरति	१६.	करा देती है (अतः)
सुधाकण	७.	पराग कण की	अलम्	१८.	प्रयोजन नहीं है
अनिलः ।	९.	वायु	वरैः ॥	१७.	अन्य वरदानों से (हमें कोई)

श्लोकार्थ—पुण्य कीर्ति हे प्रभो ! महापुरुषों के मुख से निकली हुई आपके चरण कमल के परागकण की वह वायु भगवत् स्वरूप के मार्ग को भूले हुये हम कुयोगियों को फिर से भगवान् का स्मरण करा देती है ! अतः अन्य वरदानों से हमें कोइ प्रयोजन नहीं है ॥

षड्विंशः श्लोकः

यशः शिवं सुश्रव आर्यसङ्गमे यदृच्छया चोपशृणोति ते सकृत् ।
कथं गुणज्ञो विरमेद्विना पशुं श्रीर्यत्प्रवव्रे गुणसंग्रहेच्छया ॥२६॥

पदच्छेद— यशः शिवम् सुश्रव आर्य सङ्गमे यदृच्छया च उपशृणोति ते सकृत् ।
कथम् गुणज्ञः विरमेत् विना पशुम् श्रीः यत् प्रवव्रे गुण संग्रह इच्छया ॥

शब्दार्थ—

यशः	७.	कीर्ति को	कथम्	१३.	(उससे) कैसे
शिवम्	६.	कल्याणमयी	गुणज्ञः	१२.	गुणग्राही (मनुष्य)
सुश्रव	४.	पवित्र	विरमेत्	१४.	विराम लेगा
आर्य सङ्गमे	१.	सत्सङ्ग में (जो मनुष्य)	विना	११.	छोड़कर
यदृच्छया	२.	अपने आप	पशुम्	१०.	पशुओं को
च	५.	और	श्रीः	१५.	लक्ष्मी जी भी
उपशृणोति	९.	सुन लेता है	यत्	१४.	क्योंकि
ते	३.	आपकी	प्रवव्रे	१७.	वरण करती हैं
सकृत् ।	८.	एक बार भी	गुण संग्रह इच्छया ॥	१६.	विभूतियों को पाने की इच्छा से (आपका ही)

श्लोकार्थ—सत्सङ्ग में जो मनुष्य अपने आप आपकी पवित्र और कल्याणमयी कीर्ति को [illegible]बार भी सुन लेता है, पशुओं को छोड़कर गुणग्राही मनुष्य उससे कैसे विराम लेगा । क्योंकि [illegible] जी भी विभूतियों को पाने की इच्छा से आपका ही वरण करती हैं ॥

सप्तविंशः श्लोकः

अथाभजे त्वाखिलपुरुषोत्तमं गुणालयं पद्मकरेव लालसः ।
अप्यावयोरेकपतिस्पृधोः कलिर्न स्यात्कृतत्वच्चरणैकतानयोः ॥२७॥

पदच्छेद— अथ आभजे त्वा अखिल पूरुषोत्तमम् गुणालयम् पद्मकरा इव लालसः ।
अपि आवयोः एकपति स्पृधोः कलिः न स्यात् कृत त्वत् चरण एक तानयोः ॥

शब्दार्थ—

अथ	१.	अब मैं	अपि	१५.	कहीं
आभजे	९.	भजन करता हूँ (किन्तु हे प्रभो)	आवयोः	१६.	हम दोनों में
त्वा	८.	आपका	एकपति	१३.	एक स्वामी के लिये
अखिल	५.	सम्पूर्ण	स्पृधोः	१४.	होड़ करने वाले
पुरुषोत्तमम्	६.	पुरुषों में श्रेष्ठ (और)	कलिः न	१७.	विवाद नहीं
गुणालयम्	७.	गुणागार	स्यात्	१८.	हो जावे
पद्मकरा	२.	लक्ष्मी जी के	कृत	१२.	करने वाले (अतः)
इव	३.	समान	त्वत् चरण	१०.	आपके चरणों में
लालसः ।	४.	उत्सुकता से	एक तानयोः ॥	११.	ध्यान

श्लोकार्थ—अब मैं लक्ष्मी जी के समान उत्सुकता से सम्पूर्ण पुरुषों में श्रेष्ठ और गुणागार आपका भजन करता हूँ। किन्तु हे प्रभो ! आपके चरणों में ध्यान करने वाले अतः एकस्वामी के लिये होड़ करने वाले कहीं हम दोनों में विवाद नहीं हो जावे ॥

अष्टाविंशः श्लोकः

जगज्जनन्यां जगदीश वैशसं स्यादेव यत्कर्मणि नः समीहितम् ।
करोषि फल्ग्वप्युरु दीनवत्सलः स्व एव धिष्ण्येऽभिरतस्य किं तया ॥२८॥

पदच्छेद—जगत् जनन्याम् जगदीश वैशसम् स्यात् एव यत् कर्मणि नः समीहितम् ।
करोषि फल्गु अपि उरु दीन वत्सलः स्वे एव धिष्ण्ये अभिरतस्य किम् तया ॥

शब्दार्थ—

जगत्	२.	जगत्	अपि	९.	भी (गुण को)
जनन्याम्	३.	जननी लक्ष्मी जी के	उरु	१०.	बड़ा करके
जगदीश	१.	हे जगदीश्वर	दीन	१२.	दीनों के ऊपर
वैशसम्	४.	(मन में) विरोध	वत्सलः	१३.	वात्सल्य भाव रखने वाले हैं
स्यात् एव	५.	हो सकता है	स्वे एव	१४.	(आप) अपने ही
यत् कर्मणि	६.	क्योंकि उनके सेवा कर्म में	धिष्ण्ये	१५.	आत्माराम में
नः समीहितम् ।	७.	हमारा भी अनुराग है	अभिरतस्य	१६.	रमण करते हैं
करोषि	११.	मानते हैं (क्योंकि आप)	किम्	१८.	क्या प्रयोजन है
फल्गु	८.	आप भक्तों के छोटे से	तया ॥	१७.	आपको लक्ष्मी जी से

श्लोकार्थ—हे जगदीश्वर ! जगत् जननी लक्ष्मी जी के मन में विरोध हो सकता है। क्योंकि उनके सेवा कर्म में हमारा भी अनुराग है। आप भक्तों के छोटे से भी गुण को बड़ा करके मानते हैं। क्योंकि आप दीनों के ऊपर वात्सल्यभाव रखने वाले हैं। आप अपने ही आत्माराम में रमण करते हैं। आपको लक्ष्मी जी से क्या प्रयोजन ? ॥

एकोनत्रिंशः श्लोकः

भजन्त्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयम् ।
भवत्पदानुस्मरणादृते सतां निमित्तमन्यद्भगवन्न विद्महे ॥२९॥

पदच्छेद—भजन्ति अथ त्वाम् अतः एव साधवः व्युदस्त माया गुण विभ्रम उदयम् ।
भवत् पद अनुस्मरणात् ऋते सताम् निमित्तम् अन्यद् भगवन् न विद्महे ॥

शब्दार्थ—

भजन्ति	१०.	भजन करते हैं	भवत्	११.	(मुझे तो) आपके
अथ	१.	तथा	पद	१२.	चरण कमल के
त्वाम्	९.	आपका	अनुस्मरणात्	१३.	चिन्तन के
अतः एव	३.	इसीलिये	ऋते	१४.	अतिरिक्त
साधवः	४.	निष्काम पुरुष	सताम्	१५.	सत् पुरुषों का
व्युदस्त	८.	रहित	निमित्तम्	१७.	प्रयोजन
माया गुण	५.	माया के कार्य	अन्यद्	१६.	और कोई
विभ्रम	६.	अहंकार आदि की	भगवन्	२.	हे प्रभो
उदयम् ।	७.	उत्पत्ति से	न विद्महे ॥	१८.	नहीं जान पड़ता है

श्लोकार्थ—तथा हे प्रभो ! इसलिये निष्काम पुरुष माया के कार्य अहंकार आदि की उत्पत्ति से रहित आपका भजन करते हैं । हे प्रभो ! मुझे तो आपके चरण कमल के चिन्तन के अतिरिक्त सत्पुरुषों का और प्रयोजन नहीं जान पड़ता है ॥

त्रिंशः श्लोकः

मन्ये गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति भजन्तमात्थ यत् ।
वाचा नु तन्त्या यदि ते जनोऽसितः कथं पुनः कर्म करोति मोहितः ॥३०॥

पदच्छेद—मन्ये गिरम् ते जगताम् विमोहिनीम् वरम् वृणीष्व इति भजन्तम् आत्थ यत् ।
वाचा नु तन्त्या यदि ते जनः असितः कथम् पुनः कर्म करोति मोहितः ॥

शब्दार्थ—

मन्ये	१०.	मानता हूँ	वाचा	१५.	वेद वाणी रूप
गिरम्	७.	वाणी को (मैं)	नु	१८.	तो
ते	५.	आपकी	तन्त्या	१६.	रस्सी से
जगताम्	८.	संसार को	यदि	११.	(क्योंकि) यदि
विमोहिनीम्	९.	मोहित करने वाली	ते	१४.	आपकी
वरम् वृणीष्व	४.	वरदान माँगो	जनः	१३.	मनुष्य
इति	६.	इस	असितः	१२.	सकाम
भजन्तम्	१.	भजन करते हुये मुझसे	कथम्	२०.	कैसे
आत्थ	३.	कहा (कि)	पुनः	१९.	फिर
यत् ।	२.	आपने जो (यह)	कर्म करोति	२१.	सकाम कर्म करता
			मोहितः ॥	१७.	मोहित नहीं होता

श्लोकार्थ—भजन करते हुये मुझसे आपने जो यह कहा कि वरदान माँगो; आपकी इस वाणी को मैं संसार को मोहित करने वाली मानता हूँ । क्योंकि यदि सकाम मनुष्य आपकी वेदवाणी रूप रस्सी से मोहित नहीं होता तो फिर कैसे सकाम कर्म करता ॥

एकत्रिंशः श्लोकः

त्वन्माययाद्धा जन ईश खण्डितो यदन्यदाशास्त ऋतात्मनोऽबुधः।
यथा चरेद्बालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुम् ॥३१॥

पदच्छेद—त्वद् मायया अद्धा जनः ईश खण्डितः यद् अन्यद् आशास्ते ऋत आत्मनः अबुधः।
यथा चरेत् बालहितम् पिता स्वयम् तथा त्वम् एव अर्हसि नः समीहितुम् ॥

शब्दार्थ—

त्वद् मायया	२.	आप को माया के कारण	यथा	९.	जैसे
अद्धा जनः	३.	ही मनुष्य	चरेत्	१२.	करता है
ईश	१.	हे ईश्वर	बालहितम्	११.	बालक का कल्याण
खण्डितः	६.	विमुख होकर	पिता स्वयम्	१०.	पिता अपने आप
यद् अन्यद्	७.	दूसरी वस्तु की	तथा	१३.	उसी प्रकार
आशास्ते	८.	आशा करता है	त्वम् एव	१४.	आप ही
ऋत आत्मनः	४.	सत्य स्वरूप आपको	अर्हसि	१६.	समर्थ हैं
अबुधः।	५.	न जानता हुआ (आपसे)	नः समीहितुम्	१५.	हमारा कल्याण करने में

श्लोकार्थ—हे ईश्वर ! आपकी माया के कारण ही मनुष्य सत्यस्वरूप आपको न जानता हुआ आपसे विमुख होकर दूसरी वस्तु की आशा करता है। जैसे पिता अपने आप बालक का कल्याण करता है, उसी प्रकार आप ही हमारा कल्याण करने में समर्थ हैं ॥

द्वात्रिंशः श्लोकः

इत्यादिराजेन नुतः स विश्वदृक् तमाह राजन् मयि भक्तिरस्तु ते।
दिष्ट्येदृशी धीर्मयि ते कृता यया मायां मदीयां तरति स्म दुस्त्यजाम् ॥३२॥

पदच्छेद—इति आदिराजेन नुतः सः विश्वदृक् तम् आह राजन् मयि भक्तिः अस्तु ते।
दिष्ट्या ईदृशी धीः मयि ते कृता यया मायाम् मदीयाम् तरति स्म दुस्त्यजाम् ॥

शब्दार्थ—

इति	१.	इस प्रकार	दिष्ट्या	१०.	सौभाग्य से
आदिराजेन	२.	आदिराज पृथु के द्वारा	ईदृशी	१२.	इस प्रकार की
नुतः	३.	स्तुति करने पर	धीः मयि	१३.	बुद्धि मुझमें
सः विश्वदृक्	४.	वे सर्वदर्शी श्रीहरि	ते	११.	आपकी
तम् आह	५.	उनसे बोले (कि)	कृता यया	१४.	हुई है जिससे मनुष्य
राजन्	६.	हे राजन्	मायाम्	१७.	माया को
मयि भक्तिः	८.	मुझमें भक्ति	मदीयाम्	१५.	मेरी
अस्तु	९.	होवे	तरति स्म	१८.	पार कर लेता है
ते।	७.	आपकी	दुस्त्यजाम् ॥	१६.	अपार

श्लोकार्थ—इस प्रकार आदिराज पृथु के द्वारा स्तुति करने पर वे सर्वदर्शी श्री हरि उनसे बोले कि हे राजन् ! आपकी मुझमें भक्ति होवे। सौभाग्य से आपकी इस प्रकार की बुद्धि मुझमें हुई है। जिससे मनुष्य मेरी अपार माया को पार कर लेता है ॥

त्रयस्त्रिंशः श्लोकः

तत्त्वं कुरु मयाऽऽदिष्टमप्रमत्तः प्रजापते।
मदादेशकरो लोकः सर्वत्राप्नोति शोभनम् ॥३३॥

पदच्छेद—

तत् त्वम् कुरु मया आदिष्टम् अप्रमत्तः प्रजापते ।
मद् आदेशकरः लोकः सर्वत्र आप्नोति शोभनम् ॥

शब्दार्थ—

तत्	५.	उसका	मद्	७.	मेरे
त्वम्	३.	तुम	आदेशकरः	८.	आदेश का पालक
कुरु	६.	पालन करो	लोकः	९.	मनुष्य
मया आदिष्टम्	२.	मैंने जो आदेश दिया है	सर्वत्र	१०.	सब जगह
अप्रमत्तः	४.	सावधान होकर	आप्नोति	१२.	प्राप्त करता है
प्रजापते ।	१.	हे राजन्	शोभनम् ॥	११.	कल्याण को

श्लोकार्थ—हे राजन् ! मैंने जो आदेश दिया है; तुम सावधान होकर उसका पालन करो। मेरे आदेश का पालक मनुष्य सब जगह कल्याण को प्राप्त करता है ॥

चतुस्त्रिंशः श्लोकः

मैत्रेय उवाच—इति वैन्यस्य राजर्षेः प्रतिनन्द्यार्थवद्वचः ।
पूजितोऽनुगृहीत्वैनं गन्तुं चक्रेऽच्युतो मतिम् ॥३४॥

पदच्छेद—

इति वैन्यस्य राजर्षेः प्रतिनन्द्य अर्थवद् वचः ।
पूजितः अनुगृहीत्वा एनम् गन्तुम् चक्रे अच्युतः मतिम् ॥

शब्दार्थ—

इति	१.	इस प्रकार (श्री हरि ने)	पूजितः	७.	श्री हरि की पूजा की
वैन्यस्य	२.	वेन पुत्र	अनुगृहीत्वा	१०.	कृपा करके
राजर्षेः	३.	राजर्षि पृथु के	एनम्	९.	उन पर
प्रतिनन्द्य	६.	स्वागत किया (और उन्होंने)	गन्तुम्	११.	जाने का
अर्थवद्	४.	सार गर्भित	चक्रे	१३.	किया
वचः ।	५.	वचनों का	अच्युतः	८.	भगवान् श्री हरि ने
			मतिम् ॥	१२.	विचार

श्लोकार्थ—इस प्रकार श्री हरि ने वेन पुत्र राजर्षि पृथु के सार गर्भित वचनों का स्वागत किया। और उन्होंने श्री हरि की पूजा की। तदनन्तर भगवान् श्री हरि ने उन पर कृपा करके जाने का विचार किया ॥

पञ्चत्रिंशः श्लोकः

देवर्षिपितृगन्धर्वसिद्धचारणपन्नगाः ।
किन्नराप्सरसो मर्त्याः खगा भूतान्यनेकशः ॥३५॥

पदच्छेद—

देवर्षि पितृ गन्धर्व सिद्ध चारण पन्नगाः ।
किन्नर अप्सरसः मर्त्याः खगाः भूतानि अनेकशः ॥

शब्दार्थ—

देवर्षि	१.	राजा पृथु ने देवर्षि	किन्नर	७.	किन्नर
पितृ	२.	पितर	अप्सरसः	८.	अप्सरा
गन्धर्व	३.	गन्धर्व	मर्त्याः	९.	मनुष्य
सिद्ध	४.	सिद्ध	खगाः	१०.	पक्षी
चारण	५.	चारण	भूतानि	१२.	प्राणियों का (सत्कार किया)
पन्नगाः ।	६.	नाग	अनेकशः ॥	११.	अनेक प्रकार के

श्लोकार्थ—राजा पृथु ने देवर्षि, पितर, गन्धर्व, सिद्ध, चारण, नाग, किन्नर अप्सरा, मनुष्य, पक्षी, अनेक प्रकार के प्राणियों का स्वागत किया ॥

षट्त्रिंशः श्लोकः

यज्ञेश्वरधिया राज्ञा वाग्वित्ताञ्जलिभक्तितः ।
सभाजिता ययुः सर्वे वैकुण्ठानुगतास्ततः ॥३६॥

पदच्छेद—

यज्ञेश्वर धिया राज्ञा वाग्वित्त अञ्जलि भक्तितः ।
सभाजिताः ययुः सर्वे वैकुण्ठ अनुगताः ततः ॥

शब्दार्थ—

यज्ञेश्वर	२.	सब में भगवान्	सभाजिताः	७.	सत्कार किया (तदनन्तर)
धिया	३.	बुद्धि करके (सबका)	ययुः	१२.	चले गये
राज्ञा	१.	राजा पृथु ने	सर्वे	८.	वे सभी
वाग्वित्त	६.	वाणी (और) धन से	वैकुण्ठ	९.	भगवान् श्री हरि के
अञ्जलि	५.	हाथ जोड़कर	अनुगतः	१०.	सेवक
भक्तितः ।	४.	भक्ति पूर्वक	ततः ॥	११.	वहाँ से

श्लोकार्थ—राजा पृथु ने सबमें भगवद् बुद्धि करके सबका भक्ति पूर्वक हाथ जोड़ कर वाणी और धन से सत्कार किया । तदनन्तर वे सभी भगवान् श्री हरि के सेवक वहाँ से चले गये ॥

सप्तत्रिंशः श्लोकः

भगवानपि राजर्षेः सोपाध्यायस्य चाच्युतः ।
हरन्निव मनोऽमुष्य स्वधाम प्रत्यपद्यत ॥३७॥

पदच्छेद—

भगवान् अपि राजर्षेः स उपाध्यायस्य च अच्युतः ।
हरन् इव मनः अमुष्य स्व धाम प्रत्यपद्यत ॥

शब्दार्थ—

भगवान्	१. भगवान्		हरन्	१०.	चुराते हुये
अपि	३. भी		इव	११.	से
राजर्षेः	६. राजा पृथु		मनः	९.	मन
स	५. साथ		अमुष्य	८.	उन सबका
उपाध्यायस्य	४. पुरोहितों के		स्व	१२.	अपने
च	७. तथा		धाम	१३.	लोक को
अच्युतः ।	२. श्री हरि		प्रत्यपद्यत ॥	१४.	पधारे

श्लोकार्थ—भगवान् श्री हरि भी पुरोहितों के साथ राजा पृथु तथा उन सबका मन चुराते हुये से अपने लोक को पधारे ॥

अष्टात्रिंशः श्लोकः

अदृष्टाय नमस्कृत्य नृपः सन्दर्शितात्मने ।
अव्यक्ताय च देवानां देवाय स्वपुरं ययौ ॥३८॥

पदच्छेद—

अदृष्टाय नमस्कृत्य नृपः सन्दर्शित आत्मने ।
अव्यक्ताय च देवानाम् देवाय स्व पुरम् ययौ ॥

शब्दार्थ—

अदृष्टाय	३. अन्तर्धान हुये		च	९.	भी
नमस्कृत्य	७. नमस्कार करके		देवानाम्	५	देवों के
नृपः	८. राजा पृथु		देवाय	६.	देव भगवान् को
सन्दर्शित	२. दिखाकर		स्व	१०.	अपनी
आत्मने ।	१. अपना स्वरूप		पुरम्	११.	राजधानी में
अव्यक्ताय	४. अव्यक्त स्वरूप		ययौ ॥	१२.	चले गये

श्लोकार्थ—तदनन्तर अपना स्वरूप दिखाकर अन्तर्धान हुये अव्यक्त स्वरूप देवों के देव भगवान् को नमस्कार करके राजा पृथु भी अपनी राजधानी में चले गये ॥

श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे विंशोऽध्यायः ॥२०॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

चतुर्थः स्कन्धः

एकविंशः अध्यायः

प्रथमः श्लोकः

मैत्रेय उवाच—मौक्तिकैः कुसुमस्रग्भिर्दुकूलैः स्वर्णतोरणैः ।
महासुरभिभिर्धूपैर्मण्डितं तत्र तत्र वै ॥१॥

पदच्छेद— मौक्तिकैः कुसुम स्रग्भिः दुकूलैः स्वर्ण तोरणैः ।
महा सुरभिभिः धूपैः मण्डितम् तत्र तत्र वै ॥

शब्दार्थ—

मौक्तिकैः	३.	मोती की झालरें	महा	९.	अत्यन्त
कुसुम	४.	फूलों की	सुरभिभिः	१०.	सुगन्धित
स्रग्भिः	५.	मालायें	धूपैः	११.	धूपों से
दुकूलैः	६.	रंग-बिरंगे वस्त्रों	मण्डितम्	१२.	सजाया गया था
स्वर्ण	७.	सोने की	तत्र तत्र	२.	स्थान-स्थान पर
तोरणैः ।	८.	बन्दन वारों (और)	वै ॥	१.	निश्चित ही पृथु का नगर

श्लोकार्थ—निश्चित ही पृथु का नगर स्थान-स्थान पर मोती की झालरों, फूलों की मालाओं, रंग-बिरंगे वस्त्रों और सोने की बन्दन वारों और अत्यन्त सुगन्धित धूपों से सजाया गया है ॥

द्वितीयः श्लोकः

चन्दनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् ।
पुष्पाक्षतफलैस्तोक्मैर्लाजैरर्चिभिरर्चितम् ॥२॥

पदच्छेद— चन्दन अगुरु तोय आर्द्र रथ्या चत्वार मार्गवत् ।
पुष्प अक्षत फलैः तोक्मैः लाजैः अर्चिभिः अर्चितम् ॥

शब्दार्थ—

चन्दन	४.	चन्दन (और)	पुष्प	८.	(उन्हें) फूल
अगुरु	५.	अगर के	अक्षत	९.	चावल
तोय	६.	जल से	फलैः	१०.	फल
आर्द्र	७.	सींची गई थीं (तथा)	तोक्मैः	११.	अङ्कुर
रथ्या	१.	(उस नगर की) गलियाँ	लाजैः	१२.	खील और
चत्वार	२.	चौराहे (और)	अर्चिभिः	१३.	दीपकों से
मार्गवत् ।	३.	सड़कें	अर्चितम् ॥	१४.	सजाया गया था

श्लोकार्थ—उस नगर की गलियाँ, चौराहे और सड़कें चन्दन और अगुरु के जल से सींचीं गई थीं। तथा उन्हें फूल, चावल, फल, अङ्कुर, खील और दीपकों से सजाया गया था ॥

तृतीयः श्लोकः

सवृन्दैः कदलीस्तम्भैः पूगपोतैः परिष्कृतम् ।
तरुपल्लवमालाभिः सर्वतः समलंकृतम् ॥३॥

पदच्छेद—

सवृन्दैः कदली स्तम्भैः पूगपोतैः परिष्कृतम् ।
तरु पल्लव मालाभिः सर्वत्रः सम्‌अलंकृतम् ॥

शब्दार्थ—

सवृन्दैः	१. (वह नगर) फल के गुच्छों के साथ	तरु	७. आम्र वृक्ष के
कदली	२. केले के	पल्लव	८. पत्तों की
स्तम्भैः	३. खम्भों से (और)	मालाभिः	९. बन्दनवारों से
पूगपोतैः	४. सुपारी के गुच्छों से	सर्वत्रः	६. चारों ओर
परिष्कृतम् ।	५. सुसज्जित था (तथा)	सम्‌अलंकृतम् ॥	१०. अलंकृत था

श्लोकार्थ—वह नगर फल के गुच्छों के साथ केले के खम्भों से और सुपारी के गुच्छों से सुसज्जित था तथा चारों ओर आम्र वृक्ष के पत्तों की बन्दनवारों से अलंकृत था ॥

चतुर्थः श्लोकः

प्रजास्तं दीपबलिभिः सम्भृताशेषमङ्गलैः ।
अभीयुर्मृष्टकन्याश्च मृष्टकुण्डलमण्डिताः ॥४॥

पदच्छेद—

प्रजाः तम् दीप बलिभिः सम्भृत अशेष मङ्गलैः ।
अभीयुः मृष्ट कन्याः च मृष्ट कुण्डल मण्डिताः ॥

शब्दार्थ—

प्रजाः	६. जनता ने	अभीयुः	१४. अगवानी की
तम्	१३. उन महाराज पृथु की	मृष्ट	११. सुन्दरी
दीप	४. दीप	कन्याः	१२. कन्याओं ने
बलिभिः	५. मालाओं के साथ	च	७. और
सम्भृत	३. उपहार (और)	मृष्ट	८. सुन्दर
अशेष	१. सम्पूर्ण	कुण्डल	९. कुण्डलों से
मङ्गलैः ।	२. मांगलिक	मण्डिताः ॥	१०. विभूषित

श्लोकार्थ—सम्पूर्ण मांगलिक उपहार और दीप मालाओं के साथ जनता ने और सुन्दर कुण्डलों से विभूषित सुन्दरी कन्याओं ने उन महाराज पृथु की अगवानी की ॥

पञ्चमः श्लोकः

शङ्खदुन्दुभिघोषेण ब्रह्मघोषेण चर्त्विजाम् ।
विवेश भवनं वीरः स्तूयमानो गतस्मयः ॥५॥

पदच्छेद—

शङ्ख दुन्दुभि घोषेण ब्रह्म घोषेण च ऋत्विजाम् ।
विवेश भवनम् वीरः स्तूयमानः गत स्मयः ॥

शब्दार्थ—

शङ्ख	२.	शंख (और)	विवेश	१०.	प्रवेश किया (उस समय)
दुन्दुभि	३.	नगाड़ों की	भवनम्	९.	अपने महल में
घोषेण	४.	आवाज	वीरः	१.	महाराज पृथु ने
ब्रह्मघोषेण	७.	वेदध्वनि के साथ	स्तूयमानः	८.	स्तुति सुनते हुये
च	५.	तथा	गत	१२.	नहीं था
ऋत्विजाम् ।	६.	वेद-पाठियों की	स्मयः ॥	११.	(उन्हें) अहंकार

श्लोकार्थ—महाराज पृथु ने शंख और नगाड़ों की आवाज तथा वेदपाठियों की वेदध्वनि के साथ स्तुति सुनते हुये अपने महल में प्रवेश किया । उस समय उन्हें अहंकार नहीं था ॥

षष्ठः श्लोकः

पूजितः पूजयामास तत्र तत्र महायशाः ।
पौराञ्जानपदांस्तांस्तान् प्रीतः प्रियवरप्रदः ॥६॥

पदच्छेद—

पूजितः पूजयामास तत्र तत्र महायशाः ।
पौरान् जानपदान् तान्-तान् प्रीतः प्रिय वर प्रदः ॥

शब्दार्थ—

पूजितः	३.	पूजित होकर	पौरान्	८.	पुरवासियों का (और)
पूजयामास	१०.	सम्मान किया	जानपदान्	९.	देशवासियों का
तत्र	१.	जगह	तान्-तान्	७.	उन-उन
तत्र	२.	जगह पर	प्रीतः प्रिय	४.	प्रसन्न एवम् इच्छित
महायशाः ।	६.	महान् यशस्वी पृथु जी ने	वर प्रदः ॥	५.	वरदान देने वाले

श्लोकार्थ—जगह-जगह पर पूजित होकर प्रसन्न एवम् इच्छित वरदान देने वाले महान् यशस्वी पृथु जी ने उन-उन पुरवासियों का और देशवासियों का सम्मान किया ॥

सप्तमः श्लोकः

स एवमादीन्यनवद्यचेष्टितः कर्माणि भूयांसि महान्महत्तमः ।
कुर्वन् शशासावनिमण्डलं यशः स्फीतं निधायारुरुहे परं पदम् ॥७॥

पदच्छेद— सः एवम् आदीनि अनवद्य चेष्टितः कर्माणि भूयांसि महान् महत्तमः ।
शशास अवनि मण्डलम् यशः स्फीतम् निधाय आरुरुहे परम् पदम् ॥

शब्दार्थ—

सः	५.	उन महाराज पृथु ने	शशास	१२.	शासन किया (तथा)
एवम् आदीनि	६.	इस प्रकार की	अवनि	१०.	पृथ्वी
अनवद्य	१.	पुण्य कर्म	मण्डलम्	११.	मण्डल का
चेष्टितः	२.	करने वाले (और)	यशः	१४.	कीर्ति
कर्माणि	८.	कर्मों को	स्फीतम्	१३.	अपनी निर्मल
भूयांसि	७.	अनेक	निधाय	१५.	स्थापित करके
महान्	४.	श्रेष्ठ	आरुरुहे	१८.	प्राप्त किया
महत्तमः ।	३.	महापुरुषों में	परम्	१६.	भगवान् के उत्तम
कुर्वन्	९.	करते हुये	पदम् ॥	१७.	लोक को

श्लोकार्थ—पुण्यकर्म करने वाले और महापुरुषों में श्रेष्ठ उन महाराज पृथु ने इस प्रकार के अनेक कर्मों को करते हुये पृथ्वी मण्डल का शासन किया तथा अपनी निर्मल कीर्ति स्थापित करके भगवान् के उत्तम लोक को प्राप्त किया ॥

अष्टमः श्लोकः

तदादिराजस्य यशो विजृम्भितं गुणैरशेषैर्गुणवत्सभाजितम् ।
क्षत्ता महाभागवतः सदस्पते कौषारविं प्राह गृणन्तमर्चयन् ॥८॥

पदच्छेद— तद् आदिराजस्य यशः विजृम्भितम् गुणैः अशेषैः गुणवत् सभाजितम् ।
क्षत्ता महा भागवतः सदस्पते कौषारविम् प्राह गृणन्तम् अर्चयन् ॥

शब्दार्थ—

तद्	८.	उस	क्षत्ता	१४.	विदुर जी ने
आदिराजस्य	७.	आदिराज पृथु की	महा	१२.	परम
यशः	९.	कीर्ति का	भागवतः	१३.	भगवत् भक्त
विजृम्भितम्	४.	बढ़ी हुई (तथा)	सदस्पते	१.	हे शौनक जी
गुणैः	३.	सद्‌गुणों से	कौषारविम्	११.	मैत्रेय जी से
अशेषैः	२.	सम्पूर्ण	प्राह	१६.	कहा
गुणवत्	५.	गुणवानों के द्वारा	गृणन्तम्	१०.	वर्णन करते हुये
सभाजितम् ।	६.	प्रशंसित	अर्चयन् ॥	१५.	अभिनन्दन करते हुये

श्लोकार्थ—हे शौनक जी ! सम्पूर्ण सद्‌गुणों से बढ़ी हुई गुणवानों के द्वारा प्रशंसित आदिराज पृथु की उस कीर्ति का वर्णन करते हुये मैत्रेय जी ने परम भगवत् भक्त विदुर जी से अभिनन्दन करते हुये कहा ॥

नवमः श्लोकः

विदुर उवाच—सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः ।
बिभ्रत् स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गाम् ॥९॥

पदच्छेद— सः अभिषिक्तः पृथुः विप्रैः लब्ध अशेष सुर अर्हणः ।
बिभ्रत् सः वैष्णवम् तेजः बाह्वोः याभ्याम् दुदोह गाम् ॥

शब्दार्थ—

सः	२.	उन	बिभ्रत्	१३.	धारण किया
अभिषिक्तः	४.	अभिषेक किया था	सः	५.	(तदनन्तर) उन्होंने
पृथुः	३.	महाराज पृथु का	वैष्णवम्	११.	भगवान् विष्णु के
विप्रैः	१.	ब्राह्मणों ने	तेजः	१२.	तेज को
लब्ध	९.	प्राप्त किया था (तथा)	बाह्वोः	१०.	उन भुजाओं में
अशेष	६.	सम्पूर्ण	याभ्याम्	१४.	जिन भुजाओं से
सुर	७.	देवताओं से	दुदोह	१६.	दोहन किया था
अर्हणः ।	८.	सम्मान	गाम् ॥	१५.	पृथ्वी का

श्लोकार्थ—ब्राह्मणों ने उन महाराज पृथु का अभिषेक किया था। तदनन्तर उन्होंने सम्पूर्ण देवताओं से सम्मान प्राप्त किया था। तथा उन भुजाओं में भगवान् विष्णु के तेज को धारण किया जिन भुजाओं से पृथ्वी का दोहन किया था ॥

दशमः श्लोकः

को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः ।
लोकाः सपाला उपजीवन्ति काममद्यापि तन्मे वद कर्म शुद्धम् ॥१०॥

पदच्छेद—कः नु अस्य कीर्ति न शृणोति अभिज्ञः यद् विक्रम उच्छिष्टम् अशेष भूपाः ।
लोकाः सपालाः उपजीवन्ति कामम् अद्य अपि तद् मे वद कर्म शुद्धम् ॥

शब्दार्थ—

कः	२.	कौन	लोकाः	८.	सारे लोक (और)
नु	१.	भला	सपालाः	७.	लोक पालों के साथ
अस्य	४.	इन महाराज पृथु का	उपजीवन्ति	१३.	भोग करते हैं
कीर्ति	५.	यश	कामम्	१२.	विषय का
न शृणोति	६.	नहीं सुनेगा	अद्य अपि	१५.	अभी कुछ और भी
अभिज्ञः	३.	जानकार	तद्	१४.	उनके
यद् विक्रम	१०.	जिनके पराक्रम का	मे वद	१८.	मुझे सुनावें
उच्छिष्टम्	११.	जूठन रूप	कर्म	१७.	चरित्र
अशेष भूपाः ।	९.	सारे भूपाल	शुद्धम् ॥	१६.	पवित्र

श्लोकार्थ—भला कौन जानकार इन महाराज पृथु का यश नहीं सुनेगा लोकपालों के साथ सारे लोक और सारे भूपाल जिनके पराक्रम का जूठनरूप विषय का भोग करते हैं। उनके अभी कुछ और भी पवित्र चरित्र सुनावें ॥

एकादशः श्लोकः

मैत्रेय उवाच— गङ्गायमुनयोर्नद्योरन्तराक्षेत्रमावसन् ।
आरब्धानेव बुभुजे भोगान् पुण्यजिहासया ।।११।।

पदच्छेद—

गङ्गा यमुनयोः नद्योः अन्तरा क्षेत्रम् आवसन् ।
आरब्धान् एव बुभुजे भोगान् पुण्य जिहासया ।।

शब्दार्थ—

गङ्गा	१.	गंगा और	आरब्धान्	६.	भाग्य से प्राप्त
यमुनयोः	२.	यमुना	एव	१०.	ही
नद्योः	३.	नदी के	बुभुजे	१२.	भोगते रहे
अन्तरा	४.	मध्य	भोगान्	११.	भोगों को
क्षेत्रम्	५	क्षेत्र में	पुण्य	७.	पुण्य कर्मों के
आवसन् ।	६.	निवास करते हुये	जिहासया ।।	८.	क्षय की इच्छा से

श्लोकार्थ—महराज पृथु गंगा और यमुना नदी के मध्य क्षेत्र में निवास करते हुये पुण्य कर्मों के क्षय की इच्छा से भाग्य से प्राप्त ही भोगों को भोगते रहे ।।

द्वादशः श्लोकः

सर्वत्रास्खलितादेशः सप्तद्वीपैकदण्डधृक् ।
अन्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः ।।१२।।

पदच्छेद—

सर्वत्र अस्खलित आदेशः सप्त-द्वीप एक दण्ड धृक् ।
अन्यत्र ब्राह्मण कुलात् अन्यत्र अच्युत गोत्रतः ।।

शब्दार्थ—

सर्वत्र	१०.	सब पर	अन्यत्र	६.	और
अस्खलित	११.	अबाध	ब्राह्मण	४.	विप्र
आदेशः	१२.	शासन था	कुलात्	५.	वंश
सप्त-द्वीप	१.	सातों द्वीपों के	अन्यत्र	६.	छोड़कर
एक दण्ड	२.	अखण्ड शासन के	अच्युत	७.	श्री हरि के
धृक् ।	३.	धारक महाराज पृथु का	गोत्रतः ।।	८.	भक्तों को

श्लोकार्थ—सातों द्वीपों के अखण्ड शासन के धारक महाराज पृथु का विप्र वंश और श्री हरि के भक्तों को छोड़कर सब पर अबाध शासन था ।।

त्रयोदशः श्लोकः

एकदाऽऽसीन्महासत्रदीक्षा तत्र दिवौकसाम् ।
समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम ॥१३॥

पदच्छेद—

एकदा आसीत् महासत्र दीक्षा तत्र दिवौकसाम् ।
समाजः ब्रह्मर्षीणाम् च राजर्षीणाम् च सत्तम ॥

शब्दार्थ—

एकदा	२.	एक बार (उन्होंने)	समाजः	१२.	समाज जुटा
आसीत्	५.	ग्रहण की	ब्रह्मर्षिणाम्	८.	ब्रह्मर्षियों
महासत्र	३.	महासत्र की	च	९.	और
दीक्षा	४.	दीक्षा	राजर्षीणाम्	१०.	राजर्षियों का
तत्र	६.	उसमें	च	११.	भी
दिवौकसाम् ।	७.	देवताओं	सत्तम ॥	१.	साधु श्रेष्ठ हे विदुर जी

श्लोकार्थ—साधु श्रेष्ठ हे विदुर जी ! एक बार उन्होंने महासत्र की दीक्षा ग्रहण की उसमें देवताओं, ब्रह्मर्षियों और राजर्षियों का भी समाज जुटा ॥

चतुर्दशः श्लोकः

तस्मिन्नर्हत्सु सर्वेषु स्वर्चितेषु यथार्हतः ।
उत्थितः सदसो मध्ये ताराणामुडुराडिव ॥१४॥

पदच्छेद—

तस्मिन् अर्हत्सु सर्वेषु सु अर्चितेषु यथा अर्हतः ।
उत्थितः सदसः मध्ये ताराणाम् उडुराट् इव ॥

शब्दार्थ—

तस्मिन्	१.	उस सभा में	उत्थितः	१२.	खड़े हो गये
अर्हत्सु	३.	पूजनीयों की	सदसः	१०.	सभा के
सर्वेषु	२.	सभी	मध्ये	११.	बीच में
सु	५.	भली भाँति	ताराणाम्	७.	नक्षत्रों में
अर्चितेषु	६.	पूजा कर लेने पर (महाराज पृथु)	उडुराट्	८.	चन्द्रमा के
यथा अर्हतः ।	४.	यथा-योग्य	इव ॥	९.	समान

श्लोकार्थ—उस सभा में सभी पूजनीयों की भली-भाँति पूजा कर लेने पर महाराज पृथु नक्षत्रों में चन्द्रमा के समान सभा के बीच में खड़े हो गये ॥

पञ्चदशः श्लोकः

प्रांशुः पीनायतभुजो गौरः कञ्जारुणेक्षणः ।
सुनासः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः ॥१५॥

पदच्छेद—

प्रांशुः पीन आयत भुजः गौरः कञ्ज अरुण ईक्षणः ।
सुनासः सुमुखः सौम्यः पीन अंसः सुद्विज स्मितः ॥

शब्दार्थ—

प्रांशुः	१. उनका ऊँचा शरीर	सुनासः	८. सुन्दर नासिका
पीन	२. मोटी (और)	सुमुखः	९. मनोहर मुख
आयत	३. लम्बी	सौम्यः	१०. मृदु-स्वभाव
भुजः	४. भुजायें	पीन	११. पुष्ट
गौरः	५. गौर वर्ण	अंसः	१२. कन्धे (और)
कञ्ज	६. कमल के समान	सुद्विज	१४. सुन्दर दन्त पंक्ति थी
अरुण ईक्षणः ।	७. लाल नेत्र	स्मितः ॥	१३. मुसकान से युक्त

श्लोकार्थ—उनका ऊँचा शरीर, मोटी और लम्बी भुजायें, गौर वर्ण, कमल के समान लाल नेत्र, सुन्दर नासिका, मनोहर मुख, मृदु-स्वभाव, पुष्ट कन्धे और मुसकान से युक्त सुन्दर दन्त-पंक्ति थी ॥

षोडशः श्लोकः

व्यूढवक्षा बृहच्छ्रोणिर्वलिवल्गुदलोदरः ।
आवर्तनाभिरोजस्वी काञ्चनोरुरुदग्रपात् ॥१६॥

पदच्छेद—

व्यूढ वक्षाः बृहत् श्रोणिः वलि वल्गु दल उदरः ।
आवर्त नाभिः ओजस्वी काञ्चन ऊरुः उदग्रपात् ॥

शब्दार्थ—

व्यूढ	१. (उनकी) चौड़ी	उदरः ।	८. पेट
वक्षाः	२. छाती	आवर्त	९. गहरी
बृहत्	३. विशाल	नाभिः	१०. नाभि
श्रोणिः	४. नितम्ब	ओजस्वी	१२. तेजस्वी
वलि	५. त्रिवलि के कारण	काञ्चन	११. सुवर्ण के समान
वल्गु	६. मनोहर	ऊरुः	१३. जंघायें (और)
दल	७. पीपल पत्ते के समान	उदग्रपात् ॥	१४. उठे हुये पञ्जे थे

श्लोकार्थ—उनकी चौड़ी छाती, विशाल नितम्ब, त्रिवलि के कारण मनोहर पीपल के पत्ते के समान पेट, गहरी नाभि, सुवर्ण के समान तेजस्वी जंघायें और उठे हुये पञ्जे थे ॥

सप्तदशः श्लोकः

सूक्ष्मवक्रासितस्निग्धमूर्धजः कम्बुकन्धरः ।
महाघने दुकूलाग्र्ये परिधायोपवीय च ॥१७॥

पदच्छेद—

सूक्ष्म वक्र असित स्निग्ध मूर्धजः कम्बु कन्धरः ।
महा घने दुकूल अग्र्ये परिधाय उपवीय च ॥

शब्दार्थ—

सूक्ष्म	२.	महीन	महा	८.	(वे) बहु
वक्र	३.	घुंघराले	घने	९.	मूल्य
असित	४.	काले (और)	दुकूल	११.	रेशमी वस्त्र
स्निग्ध	५.	चिकने थे	अग्र्ये	१०.	उत्तम
मूर्धजः	१.	उनके बाल	परिधाय	१२.	(नीचे) पहने थे
कम्बु	६.	शंख के समान	उपवीय	१४.	ऊपर धारण किये थे
कन्धरः ।	७.	गर्दन थी	च ॥	१३.	और

श्लोकार्थ—उनके बाल महीन घुंघराले और काले थे । शंख के समान गर्दन थी । वे बहुमूल्य उत्तम रेशमी वस्त्र नीचे पहने थे और ऊपर धारण किये थे ॥

अष्टादशः श्लोकः

व्यञ्जिताशेषगात्रश्रीर्नियमे न्यस्तभूषणः ।
कृष्णाजिनधरः श्रीमान् कुशपाणिः कृतोचितः ॥१८॥

पदच्छेद—

व्यञ्जित अशेष गात्र श्रीः नियमे न्यस्त भूषणः ।
कृष्ण अजिन धरः श्रीमान् कुशपाणिः कृत उचितः ॥

शब्दार्थ—

व्यञ्जित	७.	झलक रही थी	कृष्ण	९.	कृष्ण वर्ण का
अशेष	४.	उनके सभी	अजिन	१०.	मृग चर्म
गात्र	५.	अंगों से	धरः	११.	धारण करने से
श्रीः	६.	कान्ति	श्रीमान्	१२.	शोभा सम्पन्न थे (और)
नियमे	१.	दीक्षा नियम में	कुशपाणिः	८.	(वे) हाथ में कुशा (और)
न्यस्त	३.	उतार दिये थे	कृत	१३.	कर चुके थे
भूषणः ।	२.	(अपने सारे) आभूषण	उचितः ॥	१३.	नित्य क्रिया

श्लोकार्थ—उन्होंने दीक्षा नियम में अपने आभूषण उतार दिये थे । उनके सभी अंगों से कान्ति झलक रही थी । वे हाथ में कुश और कृष्ण वर्ण का मृग चर्म धारण करने से शोभा सम्पन्न थे । और नित्य क्रिया कर चुके थे ॥

एकोनविंशः श्लोकः

शिशिरस्निग्धताराक्षः समैक्षत समन्ततः ।
ऊचिवानिदमुर्वीशः सदः संहर्षयन्निव ॥१९॥

पदच्छेद—

शिशिर स्निग्ध ताराक्षः समैक्षत समन्ततः ।
ऊचिवान् इदम् उर्वीशः सदः संहर्षयन् इव ॥

शब्दार्थ—

शिशिर	२. शीतल (और)	ऊचिवान्	१०. कहा
स्निग्ध	३. स्नेह युक्त	इदम्	९. यह
ताराक्षः	४. नेत्रों से	उर्वीशः	१. महाराज पृथु ने
समैक्षत	६. देखा (तथा)	सदः	७. सभा को
समन्ततः ।	५. सभा के चारों ओर	संहर्षयन् इव ॥	८. प्रसन्न करते हुये से

श्लोकार्थ—उस समय महाराज पृथु ने शीतल और स्नेह युक्त नेत्रों से सभा के चारों ओर देखा तथा सभा को प्रसन्न करते हुये से यह कहा ॥

विंशः श्लोकः

चारु चित्रपदं श्लक्ष्णं मृष्टं गूढमविक्लवम् ।
सर्वेषामुपकारार्थं तदा अनुवदन्निव ॥२०॥

पदच्छेद—

चारु चित्रपदम् श्लक्ष्णम् मृष्टम् गूढम् अविक्लवम् ।
सर्वेषाम् उपकारार्थम् तदा अनुवदन् इव ॥

शब्दार्थ—

पूजयध्वम् गृणन्तः च ध्यायन्तः च असकृत् हरिम् ॥

शब्दार्थ—

तम्, एव	६.	उसी	पूजयध्वम्	१२.	पूजन करो
आत्मानम्	७.	परमात्मा	गृणन्तः च	९.	स्तुति करते (हुये और)
आत्मस्थम्	५.	आत्मा में स्थित	ध्यायन्तः	११.	ध्यान करते हुये
सर्व	१.	सभी	च	४.	तथा
भूतेषु	२.	प्राणियों में	असकृत्	१०.	बार-बार
अवस्थितम् ।	३.	अन्तर्यामिरूप से व्याप्त	हरिम् ॥	८.	श्री हरि की

श्लोकार्थ—सभी प्राणियों में अन्तर्यामिरूप से व्याप्त तथा आत्मा में स्थित उसी परमात्मा श्री हरि की स्तुति करते हुये बार-बार ध्यान करते हुये पूजन करो ॥

एकसप्ततितम श्लोकः

योगादेशमुपासाद्य धारयन्तो मुनिव्रताः ।
समाहितधियः सर्वं एतदभ्यसताहताः ॥७१॥

पदच्छेद—

योगादेशम् उपासाद्य धारयन्तः मुनिव्रताः ।
समाहित धियः सर्व एतद् अभ्यसत आदृताः ॥

शब्दार्थ—

योगादेशम्	३	योगादेश नाम के	समाहितधियः	६.	एकाग्र बुद्धि में
उपासाद्य	६.	इसे समझें (और)	सर्वे	१	आप सभी लोग
धारयन्तः	१०.	धारण करें	एतद्	४.	इस स्तोत्र का
मुनि	७.	मुनियों के समान	अभ्यसत	५.	जप करें
व्रताः ।	८.	व्रत करते हुये	आदृताः ॥	२.	श्रद्धा के साथ

श्लोकार्थ—आप सभी लोग श्रद्धा के साथ योगादेश नाम के इस स्तोत्र का जप करें । इसे समझें और मुनियों के समान व्रत करते हुये एकाग्र बुद्धि से धारण करें ॥

द्विसप्ततितमः श्लोक

इदमाह पुरास्माकं भगवान् विश्वसृक्पतिः ।
भृग्वादीनामात्मजानां सिसृक्षुःसंसिसृक्षताम् ॥७२॥

पदच्छेद—

इदम् आह पुरा अस्माकम् भगवान् विश्वसृक् पतिः ।
भृगु आदीनाम् आत्मजानाम् सिसृक्षुः संसिसृक्ष ताम् ॥

शब्दार्थ—

इदम्	११.	यह स्तोत्र	पतिः ।	४.	स्वामी
आह	१२.	कहा था	भृगु	७.	महर्षि भृगु
पुरा	१.	पहले	आदीनाम्	८.	इत्यादि
अस्माकम्	९.	हम	आत्मजानाम्	१०.	पुत्रों से
भगवान्	५.	भगवान् ब्रह्मा जी ने	सिसृक्षुः	६.	सृष्टि करने के इच्छुक
विश्वसृक्	३.	प्रजापतियों के	संसिसृक्षताम् ॥	२.	सृष्टि करने की इच्छा वाले

श्लोकार्थ—पहले सृष्टि करने की इच्छा वाले प्रजापतियों के स्वामी भगवान् ब्रह्मा जी ने सृष्टि करने के इच्छुक महर्षि भृगु इत्यादि हम पुत्रों से यह स्तोत्र कहा था ॥

त्रिसप्ततितमः श्लोकः

ते वयं नोदिता: सर्वे प्रजासर्गे प्रजेश्वराः ।
अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः ।।७३।।

पदच्छेद—

ते वयम् नोदिताः सर्वे प्रजा सर्गे प्रजेश्वराः ।
अनेन ध्वस्त तमसः सिसृक्ष्मः विविधाः प्रजाः ।।

शब्दार्थ—

ते	१.	वे	अनेन	७.	इस स्तोत्र के पाठ से
वयम्	२.	हम	ध्वस्त	९.	नष्ट करके (हमने)
नोदिताः	६.	प्रेरित किये गये (तब)	तमसः	८.	अज्ञान को
सर्वे	३.	सभी	सिसृक्ष्मः	१२.	सृष्टि की थी
प्रजा सर्गे	५.	प्रजाओं की सृष्टि के लिये	विविधाः	१०.	अनेकों प्रकार के
प्रजेश्वराः ।	४.	प्रजापति (जब)	प्रजाः ।।	११.	प्राणियों की

श्लोकार्थ—वे हम सभी प्रजापति जब प्रजाओं की सृष्टि के लिये प्रेरित किये गये तब इस स्तोत्र के पाठ से अज्ञान को नष्ट करके हमने अनेकों प्रकार के प्राणियों की सृष्टि की थी ।।

चतुःसप्ततितमः श्लोकः

अथेदं नित्यदा युक्तो जपन्नवहितः पुमान् ।
अचिराच्छ्रेय आप्नोति वासुदेवपरायणः ।।७४।।

पदच्छेद—

अथ इदम् नित्यदा युक्तः जपन् अवहितः पुमान् ।
अचिरात् श्रेयः आप्नोति वासुदेव परायणः ।।

शब्दार्थ—

अथ	१.	इसलिये	पुमान् ।	४.	(जो) मनुष्य
इदम्	७.	इस स्तोत्र का	अचिरात्	१०.	शीघ्र
नित्यदा	८.	प्रतिदिन	श्रेयः	११.	परम कल्याण को
युक्तः	५.	एकाग्र चित्त होकर	आप्नोति	१२.	प्राप्त करता है
जपन्	९.	जप करता है (वह)	वासुदेव	२.	भगवान् श्री हरि का
अवहितः	६.	सावधानी से	परायणः ।।	३.	भक्त

श्लोकार्थ—इसलिये भगवान् श्री हरि का भक्त जो मनुष्य एकाग्र चित्त होकर सावधानी से इस स्तोत्र का प्रतिदिन जप करता है । वह शीघ्र परम कल्याण को प्राप्त करता है ।।

पञ्चसप्ततितमः श्लोकः

श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं परम् ।
सुखं तरति दुष्पारं ज्ञाननौर्व्यसनार्णवम् ।।७५।।

पदच्छेद— श्रेयसाम् इह सर्वेषाम् ज्ञानम् निः श्रेयसम् परम् ।
सुखम् तरति दुष्पारम् ज्ञान नौः व्यसन अर्णवम् ।।

शब्दार्थ—

श्रेयसाम्	३.	कल्याण साधनों में	सुखम्	१२.	अनायास
इह	१.	इस लोक में	तरति	१३.	पार कर लेता है
सर्वेषाम्	२.	सभी	दुष्पारम्	६.	दुस्तर
ज्ञानम्	४.	अध्यात्मक ज्ञान ही	ज्ञान	७.	(मनुष्य) ज्ञानरूपी
निः श्रेयसाम्	६.	कल्याण का साधन है अतः	नौः	८.	नौका के द्वारा
परम् ।	५.	परम	व्यसन	१०.	दुःखरूपी संसार
			अर्णवम् ।।	११.	सागर को

श्लोकार्थ—इस लोक में सभी कल्याण साधनों में आध्यात्मिक ज्ञान ही परम कल्याण का साधन है । अतः मनुष्य ज्ञानरूपी नौका के द्वारा दुस्तर दुःख रूपी संसार सागर को अनायास ही पर कर लेता है ।।

षट्सप्ततितमः श्लोकः

य इमं श्रद्धया युक्तो मद्गीतं भगवत्स्तवम् ।
अधीयानो दुराराध्यं हरिमाराधयत्यसौ ।।७६।।

पदच्छेद— यः इमम् श्रद्धया युक्तः मद् गीतम् भगवत् स्तवम् ।
अधीयानः दुराराध्यम् हरिम् आराधयति असौ ।।

शब्दार्थ—

यः	३.	जो प्राणी	स्तवम् ।	१०.	स्तोत्र का
इमम्	६.	इस	अधीयानः	११.	पाठ करता है
श्रद्धया	४.	श्रद्धा के	दुराराध्यम्	२.	आराधना कठिन है (किन्तु)
युक्तः	५.	साथ	हरिम्	१.	भगवान् श्री हरि की
मद्	६.	मेरे द्वारा	आराधयति	१३.	प्रसन्न कर लेता है
गीतम्	७.	कहे गये	असौ ।।	१२.	वह प्राणी (उन्हें)
भगवत्	८.	भगवान् के			

श्लोकार्थ—भगवान् श्री हरि की आराधना कठिन है; किन्तु जो प्राणी श्रद्धा के साथ मेरे द्वारा कहे गये भगवान् के इस स्तोत्र का पाठ करता है वह प्राणी उन्हें प्रसन्न कर लेता है ।।

सप्तसप्ततितमः श्लोकः

विन्दते पुरुषोऽमुष्माद्यद्यदिच्छत्यसंत्वरन् ।
मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात् ॥७७॥

पदच्छेद—

विन्दते पुरुषः अमुष्मात् यद्-यद् इच्छति असंत्वरन् ।
मद् गीत गीतात् सुप्रीतात् श्रेयसाम् एक वल्लभात् ॥

शब्दार्थ—

विन्दते	१२.	प्राप्त कर लेता है	यद्	४.	मेरे द्वारा
पुरुषः	३.	(जो) पुरुष	गीत	५.	कहे गये स्तोत्र का
अमुष्मात्	९.	उस परमात्मा से	गीतात्	७.	पाठ करने से
यद्-यद्	१०.	जिन-जिन वस्तुओं की	सुप्रीतात्	८.	परम प्रसन्न हुये
इच्छति	११.	इच्छा करता है (वह सब)	श्रेयसाम्	१.	भगवान् सभी कल्याण साधनों के
असंत्वरन् ।	६.	स्थिर भाव से	एकवल्लभात् ॥	२.	एक मात्र प्रिय (हैं अतः)

श्लोकार्थ— भगवान् सभी कल्याण-साधनों के एक मात्र प्रिय हैं। जो पुरुष अतः मेरे द्वारा कहे गये स्तोत्र का स्थिर भाव से पाठ करने से परम प्रसन्न हुये उस परमात्मा से जिन-जिन वस्तुओं की इच्छा करता है। वह सब प्राप्त कर लेता है ॥

अष्टसप्ततितमः श्लोकः

इदं यः कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः ।
शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबन्धनैः ॥७८॥

पदच्छेद—

इदम् यः कल्ये उत्थाय प्राञ्जलिः श्रद्धया अन्वितः ।
शृणुयात् श्रावयेत् मर्त्यः मुच्यते कर्म बन्धनैः ॥

शब्दार्थ—

इदम्	६.	इस स्तोत्र का	शृणुयात्	७.	श्रवण करता है
यः	१.	जो मनुष्य	श्रावयेत्	८.	(अथवा) सुनाता है
कल्येउत्थाय	२.	प्रातः काल उठकर	मर्त्यः	९.	(वह) मनुष्य
प्राञ्जलिः	३.	हाथ जोड़ कर	मुच्यते	१२.	मुक्त हो जाता है
श्रद्धया	४.	श्रद्धा के	कर्म	१०.	सांसारिक कर्मों के
अन्वितः ।	५.	साथ	बन्धनैः ॥	११.	बन्धनों से

श्लोकार्थ— जो मनुष्य प्रातः काल उठकर हाथ जोड़कर श्रद्धा के साथ श्रवण करता है अथवा सुनाता है वह मनुष्य सांसारिक कर्मों के बन्धनों से मुक्त हो जाता है ॥

एकोनाशीतितमः श्लोकः

गीतं मयेदं नरदेवनन्दनाः परस्य पुंसः परमात्मनः स्तवम् ।
जपन्त एकाग्रधियस्तपो महत् चरध्वमन्ते तत आप्स्यथेप्सितम् ॥७९॥

पदच्छेद—

गीतम् मया इदम् नरदेव नन्दनाः परस्य पुंसः परमात्मनः स्तवम् ।
जपन्तः एकाग्र धियः तपः महत्, चरध्वम् अन्ते ततः आप्स्यथ ईप्सितम् ॥

शब्दार्थ—

गीतम्	३.	कहे गये	एकाग्र	९.	शान्त
मया	२.	मेरे द्वारा	धियः	१०.	बुद्धि से
इदम्	७.	इस	तपः	१३.	तपस्या
नरदेवनन्दनाः	१.	हे राज कुमारों	महत्	१२.	कठिन
परस्य	४.	परम	चरध्वम्	१४.	करो
पुंसः	५.	पुरुष	अन्ते	१६.	तपस्या के अन्त में
परमात्मनः	६.	भगवान् श्री हरि के	ततः	१५.	तदनन्तर
स्तवम् ।	८.	स्तोत्र का	आप्स्यथ	१८.	प्राप्त करोगे
जपन्तः	११.	पाठ करते हुये	ईप्सितम् ॥	१७.	अपने मनोरथ को

श्लोकार्थ—हे राज कुमारों ! मेरे द्वारा कहे गये परम पुरुष भगवान् श्री हरि के इस स्तोत्र का शान्त, बुद्धि से पाठ करते हुये कठिन तपस्या करो। तदनन्तर तपस्या के अन्त में अपने मनोरथ को प्राप्त करोगे ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे रुद्रगीतं नाम चतुर्विशोऽध्यायः ॥२४॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

चतुर्थः स्कन्धः

पञ्चविंशः अध्यायः

प्रथमः श्लोकः

मैत्रेय उवाच—इति सन्दिश्य भगवान् बार्हिषदैरभिपूजितः।
पश्यतां राजपुत्राणां तत्रैवान्तर्दधे हरः ॥१॥

पदच्छेद—

इति सन्दिश्य भगवान् बार्हिषदैः अभिपूजितः।
पश्यताम् राजपुत्राणाम् तत्र एव अन्तर्दधे हरः ॥

शब्दार्थ—

इति	२.	इस प्रकार	पश्यताम्	७.	देखते-देखते
सन्दिश्य	३.	उपदेश देने पर	राजपुत्राणाम्	६.	राज कुमारों को
भगवान्	१.	भगवान् शिव के	तत्र-एव	८.	वहीं पर
बार्हिषदैः	४.	प्रचेताओं ने	अन्तर्दधे	१०.	अन्तर्ध्यान हो गये
अभिपूजितः।	५.	उनका पूजन किया	हरः ॥	९.	भगवान् महादेव

श्लोकार्थ— भगवान् शिव के इस प्रकार उपदेश देने पर प्रचेताओं ने उनका पूजन किया। तदनन्तर राज कुमारों को देखते-देखते वहीं पर भगवान् महादेव अन्तर्धान हो गये ॥

द्वितीयः श्लोकः

रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः।
जपन्तस्ते तपस्तेपुर्वर्षाणामयुतं जले ॥२॥

पदच्छेद—

रुद्र गीतम् भगवतः स्तोत्रम् सर्वे प्रचेतसः।
जपन्तः ते तपः तेपुः वर्षाणाम् अयुतम् जले ॥

शब्दार्थ—

रुद्र	१.	भगवान् महादेव के द्वारा	जपन्तः ते	५.	जप करते हुये वे
गीतम्	२.	कहे गये	तपः	११.	तपस्या का
भगवतः	३.	भगवान् श्री हरि की	तेपुः	१२.	अनुष्ठान किया
स्तोत्रम्	४.	स्तुति की	वर्षाणाम्	१०.	वर्षों तक
सर्वे	६.	सारी	अयुतम्	९.	दस हजार
प्रचेतसः।	७.	प्रचेतागण	जले ॥	८.	जल में रहकर

श्लोकार्थ—भगवान् महादेव के द्वारा कहे गये भगवान् श्री हरि की स्तुति की जप करते हुये वे सभी प्रचेतागण जल में रहकर दस हजार वर्षों तक तपस्या का अनुष्ठान किया ॥

तृतीयः श्लोकः

प्राचीनबर्हिषं क्षत्तः कर्मस्वासक्तमानसम् ।
नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥३॥

पदच्छेद—

प्राचीन बर्हिषम् क्षत्तः कर्मसु आसक्त मानसम् ।
नारदः अध्यात्म तत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥

शब्दार्थ—

प्राचीनबर्हिषम्	२.	राजा प्राचीन बर्हि का	नारदः	९.	देवर्षि नारद ने (उन्हें)
क्षत्तः	१.	हे विदुर जी उधर	अध्यात्म	६.	परमात्मा के
कर्मसु	४.	कर्मों में (ही)	तत्त्वज्ञः	७.	स्वरूप को जानने वाले
आसक्त	५.	रत हो गया था	कृपालुः	८.	दयालु
मानसम् ।	३.	मन	प्रत्यबोधयत् ॥	१०.	उपदेश किया

श्लोकार्थ—हे विदुर जी ! उधर राजा प्राचीन बर्हि का मन कर्मों में ही रत हो गया था । परमात्मा के स्वरूप को जानने वाले दयालु देवर्षि नारद ने उन्हें उपदेश किया ॥

चतुर्थः श्लोकः

श्रेयस्त्वं कतमद्राजन् कर्मणाऽऽत्मन ईहसे ।
दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥४॥

पदच्छेद—

श्रेयः त्वम् कतमद् राजन् कर्मणा आत्मनः ईहसे ।
दुःख हानिः सुख अवाप्तिः श्रेयः तत् न इह च इष्यते ॥

शब्दार्थ—

श्रेयः	६.	कल्याण	सुख	९.	सुख की
त्वम्	२.	तुम	अवाप्तिः	१०.	प्राप्ति (ही)
कतमद्	५.	कौन सा	श्रेयः	११.	कल्याण (है)
राजन्	१.	हे राजन्	तत्	१३.	वह
कर्मणा	४.	कर्मों से	न	१५.	नहीं
आत्मनः	३.	अपने	इह	१४.	इन कर्मों से
ईहसे ।	७.	चाहते हो	च	१२.	किन्तु
दुःखहानिः	८.	दुःख का नाश (और	इष्यते ॥	१६.	मिल सकता है

श्लोकार्थ—हे राजन् ! तुम अपने कर्मों से कौन सा कल्याण चाहते हो ? दुःख का नाश और सुख की प्राप्ति ही कल्याण है । किन्तु वह इन कर्मों से नहीं मिल सकता है ॥

पञ्चमः श्लोकः

राजोवाच— न जानामि महाभाग परं कर्मापविद्धधीः ।
ब्रूहि मे विमलं ज्ञानं येन मुच्येय कर्मभिः ॥५॥

पदच्छेद—

न जानामि महाभाग परम् कर्म अपविद्ध धीः ॥
ब्रूहि मे विमलम् ज्ञानम् येन मुच्येय कर्मभिः ॥

शब्दार्थ—

न	६.	नहीं	ब्रूहि	११.	बतावें
जानामि	७.	जानता हूँ	मे	८.	मुझे
महाभाग	१.	हे देवर्षे	विमलम्	९.	निर्मल
परम्	५.	मैं मोक्ष को	ज्ञानम्	१०.	अध्यात्म ज्ञान
कर्म	३.	कर्मों से	येन	१२.	जिससे मैं
अपविद्ध	४.	अशान्त है (अतः)	मुच्येय	१४.	मुक्त हो सकूँ
धीः ।	२.	मेरी बुद्धि	कर्मभिः ॥	१३	कर्मों से

श्लोकार्थ—राजा ने कहा; हे देवर्षे ! मेरी बुद्धि कर्मों से अशान्त है; अतः मैं मोक्ष को नहीं जानता हूँ । मुझे निर्मल अध्यात्म ज्ञान बतावें; जिससे मैं कर्मों से मुक्त हो जाऊँ ॥

षष्ठः श्लोकः

गृहेषु कूटधर्मेषु पुत्रदारधनार्थधीः ।
न परं विन्दते मूढो भ्राम्यन् संसारवर्त्मसु ॥६॥

पदच्छेद—

गृहेषु कूटधर्मेषु पुत्रदार धनार्थधीः ।
न परम् विन्दते मूढः भ्राम्यन् संसार वर्त्मसु ॥

शब्दार्थ—

गृहेषु	२.	गृहस्थ आश्रम में	न	१३.	नहीं
कूटधर्मेषु	१.	कपट धर्म वाले	परम्	१२.	मोक्ष को
पुत्र	३.	मनुष्य पुत्र	विन्दते	१४.	प्राप्त करता है
दार	४.	पत्नी (और)	मूढः	११.	अज्ञानी प्राणी
धन	५.	सम्पत्ति (को ही)	भ्रामयन्	१०.	घूमता हुआ
अर्थ	६.	पुरुषार्थ	संसार	८.	संसार के
धीः ।	७.	समझता है (इसीलिये)	वर्त्मसु ॥	९.	मार्ग में

श्लोकार्थ—हे राजन् ! कपटधर्म वाले मनुष्य पुत्र, पत्नी और सम्पत्ति को ही पुरुषार्थ समझता है। इसीलिये संसार के मार्ग में घूमता हुआ अज्ञानी प्राणी मोक्ष को नहीं प्राप्त करता है ॥

सप्तमः श्लोकः

नारद उवाच—भो भोः प्रजापते राजन् पशून् पश्य त्वयाध्वरे ।
संज्ञापिताञ्जीवसङ्घान्निर्घृणेन सहस्रशः ॥७॥

पदच्छेद—

भो भोः प्रजापते राजन् पशून् पश्य त्वया अध्वरे ।
संज्ञापितान् जीव सङ्घान् निर्घृणेन सहस्रशः ॥

शब्दार्थ—

भोः भोः	२.	हे	अध्वरे	५.	यज्ञ में
प्रजापते	१.	प्रजाओं के पालक	संज्ञापितान्	१०.	मारा था
राजन्	३.	राजन्	जीव	७.	जीवों के
पशून्	११.	(उन) पशुओं को	सङ्घान्	८.	समूह को
पश्य	१२.	(सामने) देखो	निर्घृणेन	६.	निर्दयता पूर्वक
त्वया	४.	तुमने	सहस्रशः ॥	९.	हजारों की संख्या में

श्लोकार्थ—प्रजाओं के पालक हे राजन् ! तुमने यज्ञ में निर्दयता पूर्वक जीवों के समूह को हजारों की संख्या में मारा था । उन पशुओं को सामने देखो ॥

अष्टमः श्लोकः

एते त्वां सम्प्रतीक्षन्ते स्मरन्तो वैशसं तव ।
सम्परेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः ॥८॥

पदच्छेद—

एते त्वाम् सम्प्रतीक्षन्ते स्मरन्तः वैशसम् तव ।
सम्परेतम् अयः कूटैः छिन्दन्ति उत्थित मन्यवः ॥

शब्दार्थ—

एते	१.	ये सब पशु	सम्परेतम्	७.	मरकर परलोक में जाने पर (तुम्हें)
त्वाम्	५.	तुम्हारी	अयः	१०.	लोहे की
सम्प्रतीक्षन्ते	६.	बाट देख रहे हैं	कूटैः	११.	सींगों से
स्मरन्तः	४.	स्मरण करते हुये	छिन्दन्ति	१२.	छेदेंगे
वैशसम्	३.	दी गई पीड़ा का	उत्थित	९.	भर कर (ये सब)
तव ।	२.	तुम्हारे द्वारा	मन्यवः ॥	८.	क्रोध में

श्लोकार्थ—ये सब पशु तुम्हारे द्वारा दी गई पीड़ा का स्मरण करते हुये तुम्हारी बाट देख रहे हैं । मर कर परलोक में जाने पर तुम्हें क्रोध में भर कर ये सब लोहे की सींगों छेदेंगे ॥

नवमः श्लोकः

अत्र ते कथयिष्येऽमुमितिहासं पुरातनम् ।
पुरञ्जनस्य चरितं निबोध गदतो मम ॥९॥

पदच्छेद—

अत्र ते कथयिष्ये अमुम् इतिहासम् पुरातनम् ।
पुरञ्जनस्य चरितम् निबोध गदतः मम ॥

शब्दार्थ—

अत्र	१.	इस विषय में मैं	पुरञ्जनस्य	७.	राजा पुरञ्जन का
ते	२.	तुम्हें	चरितम्	८	चरित है (तुम)
कथयिष्ये	६.	कहता हूं (जो)	निबोध	११.	समझो
अमुम्	३	एक	गदतः	१०.	कथन को
इतिहासम्	५.	कथानक	मम ॥	९.	मेरे इस
पुरातनम् ।	४.	पुराना			

श्लोकार्थ—इस विषय में तुम्हें एक पुराना कथानक कहता हूं, जो राजा पुरञ्जन का चरित है। तुम मेरे इस कथन को समझो ॥

दशमः श्लोकः

आसीत्पुरञ्जनो नाम राजा राजन् बृहच्छ्रवाः ।
तस्याविज्ञातनामाऽऽसीत्सखाविज्ञातचेष्टितः ॥१०॥

पदच्छेद—

आसीत् पुरञ्जनः नाम राजा राजन् बृहच्छ्रवाः ।
तस्य अविज्ञात नामा आसीत् सखा अविज्ञात चेष्टितः ॥

शब्दार्थ—

आसीत्	६.	था	तस्य	७.	उसका
पुरञ्जनः	२.	पुरञ्जन	अविज्ञात	८.	अविज्ञात
नामा	३.	नाम का	नामा	९.	नाम का
राजा	५.	एक राजा	आसीत्	११.	था
राजन्	१.	हे राजन्	सखा	१०.	एक मित्र
बृहच्छ्रवाः ।	४.	यशस्वी	अविज्ञात	१३.	रहस्यमय थीं
			चेष्टितः ॥	१२.	उस राजा की सारी क्रियायें

श्लोकार्थ—हे राजन् ! पुरञ्जन नाम का यशस्वी एक राजा था। उसका अविज्ञात नाम का एक मित्र था। उस राजा की सारी क्रियायें रहस्यमय थीं ॥

एकादशः श्लोकः

सोऽन्वेषमाणः शरणं बभ्राम पृथिवीं प्रभुः ।
नानुरूपं यदाविन्ददभूत्स विमना इव ॥११॥

पदच्छेद—

स: अन्वेषमाणः शरणम् बभ्राम पृथिवीम् प्रभुः ।
न अनुरूपम् यदा अविन्दत् अभूत् सः विमनाः इव ॥

शब्दार्थ—

सः	१.	वह	अनुरूपम्	८.	अपने योग्य स्थान
अन्वेषमाणः	४.	ढूंढ़ता हुआ	यदा	७.	जब
शरणम्	३.	रहने का स्थान	अविन्दत्	१०.	पाया (तब)
बभ्राम	६	घूमने लगा (किन्तु)	अभूत्	१४.	हो गया
पृथिवीम्	५.	पृथ्वी पर	सः	११.	वह
प्रभुः ।	२.	राजा अपने	विमनाः	१२.	उदास के
न	९.	नहीं	इव ॥	१३.	समान

श्लोकार्थ—वह राजा अपने रहने का स्थान ढूंढ़ता हुआ पृथ्वी पर घूमने लगा। किन्तु जब अपने योग्य स्थान नहीं पाया तब वह उदास के समान हो गया ॥

द्वादशः श्लोकः

न साधु मेने ताः सर्वा भूतले यावतीः पुरः ।
कामान् कामयमानोऽसौ तस्य तस्योपपत्तये ॥१२॥

पदच्छेद—

न साधु मेने ताः सर्वाः भूतले यावतीः पुरः ।
कामान् कामयमानः असौ तस्य तस्य उपपत्तये ॥

शब्दार्थ—

न	११.	नहीं	यावतीः पुरः ।	५.	जितनी। नगरियाँ (देखीं)
साधु	१०.	ठीक	कामान्	१.	कामनाओं को
मेने	१२.	समझा	कामयमानः	२.	भोगने की इच्छा से
ताः	६.	उन	असौ	३.	उन्होंने
सर्वाः	७.	सब को	तस्य तस्य	८.	उन-उन सभी भोगों की
भूतले	४.	पृथ्वी पर	उपपत्तये ॥	९.	प्राप्ति के लिये

श्लोकार्थ—कामनाओं को भोगने की इच्छा से उन्होंने पृथ्वी पर जितनी नगरियाँ देखीं, उन सबको उन-उन सभी भोगों की प्राप्ति के लिये ठीक नहीं समझा ॥

त्रयोदशः श्लोकः

स एकदा हिमवतो दक्षिणेष्वथ सानुषु ।
ददर्श नवभिर्द्वार्भिः पुरं लक्षितलक्षणाम् ॥१३॥

पदच्छेद—

सः एकदा हिमवतः दक्षिणेषु अथ सानुषु ।
ददर्श नवभिः द्वार्भिः पुरम् लक्षित लक्षणाम् ॥

शब्दार्थ—

सः	२.	उन्होंने	ददर्श	१०.	देखी (जो)
एकदा	३.	एक दिन	नवभिः	७.	नव
हिमवतः	४.	हिमालय पर्वत के	द्वार्भिः	८.	दरवाजों से युक्त
दक्षिणेषु	५.	दक्षिण भाग के	पुरम्	९.	एक नगरी
अथ	१.	तदनन्तर	लक्षित	१२.	दिखाई पड़ती थी
सानुषु ।	६.	शिखरों पर	लक्षणाम् ॥	११.	शुभ लक्षणों से युक्त

श्लोकार्थ—तदनन्तर उन्होंने एक दिन हिमालय पर्वत के दक्षिण भाग के शिखरों पर नव दरवाजों से युक्त एक नगरी देखी जो शुभ लक्षणों से युक्त दिखाई पड़ती थी ॥

चतुर्दशः श्लोकः

प्राकारोपवनाट्टालपरिखैरक्षतोरणैः ।
स्वर्णरौप्यायसैः शृङ्गैः संकुलां सर्वतो गृहैः ॥१४॥

पदच्छेद—

प्राकार उपवन अट्टाल परिखैः अक्ष तोरणैः ।
स्वर्ण रौप्य आयसैः शृङ्गैः संकुलाम् सर्वतो गृहैः ॥

शब्दार्थ—

प्राकार	२.	परकोटे	स्वर्ण	८.	सोने
उपवन	३.	बगीचे	रौप्य	९.	चाँदी (और)
अट्टाल	४.	अट्टालिकाओं	आयसैः	१०.	लोहे से बने
परिखैः	५.	खाई	शृङ्गैः	११.	शिखरों वाले
अक्ष	६.	झरोखे (और)	संकुलाम्	१३.	व्याप्त थी
तोरणैः ॥	७.	राज द्वारों से (तथा)	सर्वतो	१.	वह नगरी चारों ओर
			गृहैः ॥	१२.	भवनों से

श्लोकार्थ—वह नगरी चारों ओर परकोटे, बगीचे, अट्टालिकाओं, खाई, झरोखे और राजद्वारों से तथा सोने-चाँदी और लोहे से बने शिखरों वाले भवनों से व्याप्त था ॥

पञ्चदशः श्लोकः

नीलस्फटिकवैदूर्यमुक्तामरकतारुणैः ।
क्लृप्तहर्म्यस्थलीं दीप्तां श्रिया भोगवतीमिव ॥१५॥

पदच्छेद—

नील स्फटिक वैदूर्य मुक्ता मरकत अरुणैः ।
क्लृप्तहर्म्य स्थलीम् दीप्ताम् श्रिया भोगवतीम् इव ॥

शब्दार्थ—

नील	२.	नीलम	क्लृप्त	८.	बनी हुई थीं (अतः)
स्फटिक	३.	स्फटिक	हर्म्यस्थलीम्	१.	उन महलों की फर्शं
वैदूर्य	४.	मूंगा	दीप्ताम्	१२.	चमक रही थी
मुक्ता	५.	मोती	श्रिया	९.	शोभा में
मरकत	६.	पन्ना और	भोगवतीम्	१०.	नागों की भोग पुरी के
अरुणैः ।	७.	माणिक्य मणियों से	इव ॥	११.	समान

श्लोकार्थ—उन महलों की फर्श नीलम, स्फटिक, मूंगा, मोती, पन्ना और मणिक्य मणियों से बनी थी । अतः शोभा में नागों की भोगपुरी के समान चमक रही थी ॥

षोडशः श्लोकः

सभाचत्वररथ्याभिराक्रीडायतनापणैः ।
चैत्यध्वजपताकाभिर्युक्तां विद्रुमवेदिभिः ॥१६॥

पदच्छेद—

सभा चत्वर रथ्याभिः आक्रीड आयतन आपणैः ।
चैत्यध्वज पताकाभिः युक्ताम् विद्रुम वेदिभिः ॥

शब्दार्थ—

सभा	१.	(वह नगरी) सभा भवन	चैत्य	७.	विश्राम स्थान
चत्वर	२.	चौराहे (और)	ध्वज	८.	ध्वजाओं और
रथ्याभिः	३.	राज मार्गों से	पताकाभिः	९.	झण्डियों से (तथा)
आक्रीड	४	क्रीडा	युक्ताम्	१२.	सुशोभित थी
आयतन	५.	भवन (और)	विद्रुम	१०.	मूंगे के
आपणैः ।	६.	बाजारों से	वेदिभिः ॥	११.	चबूतरों से

श्लोकार्थ—वह नगरी सभाभवन, चौराहे और राजमार्गों से, क्रीडाभवन और बाजारों से, विश्राम-स्थल, ध्वजाओं और मूंगे के चबूतरों से सुशोभित थी ॥

सप्तदशः श्लोकः

पुर्यास्तु बाह्योपवने दिव्यद्रुमलताकुले ।
नदद्विहङ्गालिकुलकोलाहलजलाशये ॥१७॥

पदच्छेद—

पुर्याः तु बाह्य उपवने दिव्य द्रुमलता आकुले ।
नदत् विहङ्ग अलिकुल कोलाहल जल आशये ॥

शब्दार्थ—

पुर्याः	२.	उस नगरी के	आकुले।	७	पूर्ण था (उसके)
तु	१.	तथा	नदत्	१०.	कलरव कर रहे थे (और)
बाह्य	३.	बाहर का	विहङ्ग	९.	पक्षीगण
उपवने	४.	बगीचा	अलिकुल	११.	भौंरों का समूह
दिव्य	५.	अलौकिक	कोलाहल	१२.	गुञ्जार कर रहा था
द्रुम-लता	६.	वृक्ष-लताओं से	जल-आशये ॥	८.	सरोवर पर

श्लोकार्थ—तथा उस नगरी के बाहर का बगीचा अलौकिक वृक्ष-लताओं से पूर्ण था। उसके सरोवर पर पक्षीगण कलरव कर रहे थे और भौंरों का समूह गुञ्जार कर रहा था ॥

अष्टादशः श्लोकः

हिमनिर्झरविप्रुष्मत्कुसुमाकरवायुना ।
चलत्प्रवालविटपनलिनीतटसम्पदि ॥१८॥

पदच्छेद—

हिम निर्झर विप्रुष्मत् कुसुमाकर वायुना ।
चलत् प्रवाल विटपनलिनी तट सम्पदि ॥

शब्दार्थ—

हिम	१.	शीतल	चलत्	६.	हिलते हुये
निर्झर	२.	झरनों की	प्रवाल	७.	पत्तों (और)
विप्रुष्मत्	३.	बूंदों से युक्त	विटप	८.	शाखाओं वाले वृक्षों से
कुसुमाकर	४.	वसन्त ऋतु की	नलिनी	९.	सरोवर के किनारे पर
वायुनः।	५.	हवा से	सम्पदि ॥	१०.	बहुत शोभा हो रही थी

श्लोकार्थ—शीतल झरनों की बूंदों से युक्त वसन्त ऋतु की हवा से हिलते हुये पत्तों और शाखाओं वाले वृक्षों से सरोवर के किनारे पर बहुत शोभा हो रही थी ॥

एकोनविंशः श्लोकः

नानारण्यमृगव्रातैरनाबाधे मुनिव्रतैः ।
आहूतं मन्यते पान्थो यत्र कोकिलकूजितैः ॥१९॥

पदच्छेद—

नाना अरण्य मृग व्रातैः अनाबाधे मुनिव्रतैः ।
आहूतम् मन्यते पान्थः यत्र कोकिल कूजितैः ॥

शब्दार्थ—

नाना	३.	उनके	आहूतम्	१०.	(हमें) बुला रहा है
अरण्य	४.	जंगली	मन्यते	१२.	ऐसा समझते थे
मृग	५.	पशुओं के	पान्थः	११.	बटोही जन
व्रातैः	६.	झुन्डों से (कोई)	यत्र	१.	जहाँ
अना बाधे	७.	बाधा नहीं थी	कोकिल	८.	कोयल की
मुनिव्रतैः ।	२.	मुनियों के समान अहिंसादि व्रत वाले	कूजितैः ॥	९.	कूक से (यह)

श्लोकार्थ—जहाँ मुनियों के समान अहिंसादि व्रत वाले अनेक जंगली पशुओं के झुन्डों से कोई बाधा नहीं थी। कोयल की कूक से यह हमें बुला रहा है, बटोही जन ऐसा समझते थे ॥

विंशः श्लोकः

यदृच्छयाऽऽगतां तत्र ददर्श प्रमदोत्तमाम् ।
भृत्यैर्दशभिरायान्तीमेकैकशतनायकैः ॥२०॥

पदच्छेद—

यदृच्छया आगताम् तत्र ददर्श प्रमदा उत्तमाम् ।
भृत्यैः दशभिः आयान्तीम् एकैक शत नायकैः ॥

शब्दार्थ—

यद्	२.	अपनी	भृत्यैः	९.	सेवकों के साथ
इच्छया	३.	इच्छा से	दशभिः	८.	दश
आगताम्	४.	आती हुई (एक)	आयान्तीम्	१०.	आ रही थी
तत्र	१.	वहाँ पर (उन्होंने)	एकैक	११.	जिनमें से प्रत्येक सेवक
ददर्श	७.	देखा (वह)	शत	१२	एक सौ
प्रमदा	६.	युवती	नायकैः ॥	१३.	स्त्रियों का पति था
उत्तमाम् ।	५.	सुन्दरी			

श्लोकार्थ—वहाँ पर उन्होंने अपनी इच्छा से आती हुई एक सुन्दरी युवती को देखा। वह दस सेवकों के साथ आ रही थी। जिनमें से प्रत्येक सेवक एक सौ स्त्रियों का पति था ॥

एकविंशः श्लोकः

पञ्चशीर्षाहिना गुप्तां प्रतीहारेण सर्वतः ।
अन्वेषमाणामृषभमप्रौढां कामरूपिणीम् ॥२१॥

पदच्छेद—

पञ्चशीर्ष अहिना गुप्ताम् प्रतीहारेण सर्वतः ।
अन्वेषमाणाम् ऋषभम् अप्रौढाम् काम रूपिणीम् ॥

शब्दार्थ—

पञ्चशीर्ष	१.	पाँच फन वाला	अन्वेषमाणाम्	१०.	ढूंढ़ रही थी
अहिना	२.	(एक) सांप	ऋषभम्	९	अपने लिये श्रेष्ठपति
गुप्ताम्	५.	रक्षा कर रहा था	अप्रौढाम्	६.	वह भोली-भाली
प्रतीहारेण	३.	द्वार पाल के समान	काम	७.	सुन्दरी
सर्वतः ।	४.	चारों ओर से उसकी	रूपिणीम् ॥	८.	किशोरी

श्लोकार्थ—पांच फन वाला एक सांप द्वारपाल के समान चारों ओर से उसकी रक्षा कर रहा था। वह भोली-भाली सुन्दरी किशोरी अपने लिये श्रेष्ठ पति ढूंढ़ रही थी ॥

द्वाविंशः श्लोकः

सुनासां सुदतीं बालां सुकपोलां वराननाम् ।
समविन्यस्तकर्णाभ्यां बिभ्रतीं कुण्डलश्रियम् ॥२२॥

पदच्छेद—

सुनासाम् सुदतीम् बालाम् सुकपोलाम् वराननाम् ।
सम विन्यस्त कर्णाभ्याम् बिभ्रतीम् कुण्डल श्रियम् ॥

शब्दार्थ—

सुनासाम्	२.	सुन्दर नासिका	सम	७.	उसके सामने रूप से
सुदतीम्	३.	सुन्दर दन्त पंक्ति	विन्यस्त	८.	बनाये गये
बालाम्	१.	वह किशोरी	कर्णाभ्याम्	९.	कानों में
सुकपोलाम्	४.	सुन्दर कपोल (और)	बिभ्रतीम्	१२.	झलक रही थी
वर	५.	सुन्दर	कुण्डल	१०.	कुण्डलों की
आननाम् ।	६.	मुख (वाली थी)	श्रियम् ॥	११.	शोभा

श्लोकार्थ—वह किशोरी सुन्दर नासिका, सुन्दर दन्त पंक्ति, सुन्दर कपोल और सुन्दर मुखवाली थी। उसके समान रूप से बनाये गये कानों में कुण्डलों की शोभा झलक रही थी ॥

त्रयोविंशः श्लोकः

पिशङ्गनीवीं सुश्रोणीं श्यामां कनकमेखलाम् ।
पद्भ्यां क्वणद्भ्यां चलन्तीं नूपुरैर्देवतामिव ॥२३॥

पदच्छेद—

पिशङ्ग नीवीम् सुश्रोणीम् श्यामाम् कनक मेखलाम् ।
पद्भ्याम् क्वणद्भ्याम् चलन्तीम् नूपुरैः देवताम् इव ॥

शब्दार्थ—

पिशङ्ग	२.	पीले रंग की	पद्भ्याम्	८.	पैरों में
नीवीम्	४.	साड़ी (तथा)	क्वणद्भ्याम्	१०.	झंकार हो रही थी (वह)
सुश्रोणीम्	३.	अपने सुन्दर (कटिभाग में)	चलन्तीम्	७.	चलते समय
श्यामाम्	१.	वह सुन्दरी	नूपुरैः	९.	नूपुरों की
कनक	५.	सोने की	देवताम्	११.	साक्षात् देवी के
मेखलाम् ।	६.	करधनी (पहने थी)	इव ॥	१२.	समान लग रही थी

श्लोकार्थ—वह सुन्दरी पीले रंग की अपने सुन्दर कटिभाग में साड़ी तथा सोने की करधनी पहने थी। चलते समय पैरों में नूपुरों की झन्कार हो रही थी। वह साक्षात् देवी के समान लग रही थी ॥

चतुर्विंशः श्लोकः

स्तनौ व्यञ्जितकैशोरौ समवृत्तौ निरन्तरौ ।
वस्त्रान्तेन निगूहन्तीं व्रीडया गजगामिनीम् ॥२४॥

पदच्छेद—

स्तनौ व्यञ्जित कैशोरौ सम वृत्तौ निरन्तरौ ।
वस्त्र अन्तेन निगूहन्तीम् व्रीडया गजगामिनीम् ॥

शब्दार्थ—

स्तनौ	४.	दोनों स्तन (उसकी)	वस्त्र	१०.	साड़ी के
व्यञ्जित	६.	प्रकट कर रहे थे	अन्तेन	११.	छोर से (उन्हें)
कैशोरौ	५.	किशोरावस्था को	निगूहन्तीम्	१२.	ढक रही थी
सम	१.	समान	व्रीडया	९.	(वह) लज्जा वश
वृत्तौ	२.	गोल (और)	गज	७.	हाथी के समान
निरंतरौ ।	३.	सटे हुये	गामिनीम् ॥	८.	धीरे-धीरे चलने वाली

श्लोकार्थ—समान, गोल और सटे हुये दोनों स्तन उसकी किशोरावस्था को प्रकट कर रहे थे। हाथी के समान धीरे-धीरे चलने वाली वह लज्जा वश उन्हें साड़ी के छोर से ढक रही थी ॥

पञ्चविंशः श्लोकः

तामाह ललितं वीरः सव्रीडस्मितशोभनाम् ।
स्निग्धेनापाङ्गपुङ्खेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा ॥२५॥

पदच्छेद—

ताम् आह ललितम् वीरः सव्रीड स्मित शोभनाम् ।
स्निग्धेन अपाङ्ग पुङ्खेन स्पृष्टः प्रेम उद्भ्रमद् भ्रुवा ॥

शब्दार्थ—

ताम्	१२.	उस (युवती से)	स्निग्धेन	४.	भोली
आह	१४.	बोला	अपाङ्ग	५.	तिरछी चितवन रूपी
ललितम्	१३.	मधुर वाणी में	पुङ्खेन	६.	बाण से
वीरः	८.	राजा पुरञ्जन	स्पृष्टः	७.	घायल हुआ
सव्रीड	९.	लज्जा (और)	प्रेम	१.	प्रेम के साथ
स्मित	१०.	मुसकान से	उद्भ्रमद्	३.	मटकन (और)
शोभनाम् ।	११.	अधिक सुन्दर लगने वाली	भ्रुवा ॥	२.	भौंहों की

श्लोकार्थ—प्रेम के साथ भौंहों की मटकन और भोली चितवन रूपी बाण से घायल हुआ राजा पुरञ्जन लज्जा और मुसकान से अधिक सुन्दर लगने वाली उस युवती से मधुर वाणी में बोला ॥

षड्विंशः श्लोकः

का त्वं कञ्जपलाशाक्षि कस्यासीह कुतः सति ।
इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे ॥२६॥

पदच्छेद—

का त्वम् कञ्ज पलाश अक्षि कस्य असि इह कुतः सति ।
इमाम् उपपुरीम् भीरु किम् चिकीर्षसि शंस मे ॥

शब्दार्थ—

का	६.	कौन हो	सति ।	४.	हे सति
त्वम्	५.	तुम	इमाम्	११.	इस
कञ्ज	१.	कमल	उपपुरीम्	१२.	नगरी के पास (तुम)
पलाश	२.	दल के समान विशाल	भीरु	१०.	हे भीरु
अक्षि	३.	नेत्रों वाली	किम्	१३.	क्या
कस्य असि	७.	किसकी कन्या हो (और)	चिकीर्षसि	१४.	करना चाहती हो
इह	९.	यहाँ पर आई हो	शंस	१६.	बताओ
कुतः	८.	कहाँ से	मे ॥	१५.	यह मुझे

श्लोकार्थ—कमल दल के समान विशाल नेत्रों वाली हे सति ! तुम कौन हो ? किसकी कन्या हो और कहाँ से यहाँ पर आई हो ? हे भीरु ! इस नगरी के पास तुम क्या करना चाहती हो, यह मुझे बताओ ॥

सप्तविंशः श्लोकः

क एतेऽनुपथा ये त एकादश महाभटाः ।
एता वा ललनाः सुभ्रु कोऽयं तेऽहिः पुरःसरः ॥२७॥

पदच्छेद— के एते अनुपथाः ये ते एकादश महाभटाः ।
एताः वा ललनाः सुभ्रु कः अयम् ते अहिः पुरः सरः ॥

शब्दार्थ—

के	९.	कौन हैं	एताः	१०.	ये
एते	८.	ये	वा	१३.	तथा
अनुपथाः	७.	सेवक हैं	ललनाः	११.	सुन्दरियाँ
ये	२.	जो	सुभ्रु	१.	हे सुन्दरि
ते	६.	आपके	कः	१२.	कौन हैं
एकादश	३.	ग्यारह	अयम्	१६.	यह
महा	४.	महान्	ते	१४.	आपके
भटाः ।	५.	वीर	अहिः	१७.	सर्प (कौन हैं)
			पुरः सरः ॥	१५.	आगे चलने वाला

श्लोकार्थ—हे सुन्दरि ! जो ग्यारह महान् वीर आपके सेवक हैं ये कौन हैं ? ये सुन्दरियाँ कौन हैं ? तथा आपके आगे चलने वाला यह सर्प कौन है ॥

अष्टाविंशः श्लोकः

त्वं ह्रीर्भवान्यस्यथ वाग्रमा पतिं विचिन्वती किं मुनिवद्रहो वने ।
त्वदङ्घ्रिकामाप्तसमस्तकामं क्व पद्मकोशः पतितः कराग्रात् ॥२८॥

पदच्छेद—त्वम् ह्रीः भवानी असि अथ वाक् रमा पतिम् विचिन्वती किम् मुनिवत् रहः वने ।
त्वद्‌अङ्घ्रिकाम आप्त समस्त कामम् क्व पद्मकोशः पतितः कराग्रात् ॥

शब्दार्थ—

त्वम् ह्रीः	१.	तुम साक्षात् लज्जा	त्वद्	१०.	तुम (पति के)
भवानी	३.	उमा	अङ्घ्रि	११.	चरणों की
असि अथ	२.	हो अथवा	काम	१२.	कामना करती हो,इसी से वह
वाक् रमा	४.	ब्राह्मणी और लक्ष्मी हो	आप्त	१४.	प्राप्त कर लिया है
पतिम्	८.	अपने पति को	समस्त कामम्	१३.	सम्पूर्ण कामनाओं को
विचिन्वती	९.	खोज रही हो	क्व	१७.	कहाँ
किम्	७.	क्या	पद्मकोशः	१६.	क्रीड़ाकमल
मुनिवत्	५.	मुनियों के समान	पतितः	१८.	गिर गया है
रहः वने ।	६.	एकान्त जंगल में	कराग्रात् ॥	१५.	तुम्हारे हाथ से

श्लोकार्थ—तुम साक्षात् लज्जा हो अथवा उमा, ब्राह्मणी और लक्ष्मी में से कोई हो ! मुनियों के समान एकान्त जंगल में क्या अपने पति को खोज रही हो ? तुम पति के चरणों की कामना करती हो इसी से वह सम्पूर्ण कामनाओं को प्राप्त कर लिया है, यदि तुम लक्ष्मी हो तो तुम्हारे हाथ से क्रीड़ा कमल कहाँ गिर गया है ॥

एकोनत्रिंशः श्लोकः

नासां वरोर्वन्यतमा भुविस्पृक् पुरीमिमां वीरवरेण साकम् ।
अर्हस्यलङ्कर्तुमदभ्रकर्मणा लोकं परं श्रीरिव यज्ञपुंसा ॥२९॥

पदच्छेद— न आसाम् वरोरु अन्यतमा भुवि स्पृक् पुरीम् इमाम् वीर वरेण साकम् ।
अर्हसि अलङ्कर्तुम् अदभ्र कर्मणा लोकम् परम् श्रीः इव यज्ञ पुंसा ॥

शब्दार्थ—

न	४.	नहीं (हो क्योंकि)	वरेण साकम् ।	९.	प्रधान मेरे साथ
आसाम्	२.	इनमें से	अर्हसि	१३.	कर सकती हो
वरोरु	१.	हे सुभगे तुम	अलङ्कर्तुम्	१२.	सुशोभित
अन्यतमा	३.	कोई	अदभ्र कर्मणा	७.	बहुत कर्म करने वाले
भुवि	५.	पृथ्वी का	लोकम्	१८.	लोक का सुशोभित करती हैं
स्पृक्	६.	स्पर्श कर रही हो अतः	परम्	१७.	वैकुण्ठ
पुरीम्	११.	नगरी को	श्रीः	१६.	लक्ष्मी जी
इमाम्	१०.	इस	इव यज्ञ	१४.	जैसे यज्ञ पुरुष
वीर	८.	(तथा) वीरों में	पुंसा ॥	१५.	श्री हरि के साथ

श्लोकार्थ— हे सुभगे ! तुम इनमें से कोई नहीं हो । क्योंकि पृथ्वी का स्पर्श कर रही हो । अतः बहुत कर्म करने वाले तथा वीरों में प्रधान मेरे साथ इस नगरी को सुशोभित कर सकती हो । जैसे यज्ञ पुरुष श्री हरि के साथ लक्ष्मी जी वैकुण्ठ लोक को सुशोभित करती हैं ॥

त्रिंशः श्लोकः

यदेष मापाङ्गविखण्डितेन्द्रियं सव्रीडभावस्मितविभ्रमद्भ्रुवा ।
त्वयोपसृष्टो भगवान्मनोभवः प्रबाधतेऽथानुगृहाण शोभने ॥३०॥

पदच्छेद—यद् एषः मा अपाङ्ग विखण्डित इन्द्रियम् सव्रीड भावस्मित विभ्रमद् भ्रुवा ।
त्वया उपसृष्टः भगवान् मनोभवः प्रबाधते अथ अनुगृहाण शोभने ॥

शब्दार्थ—

यद्	१.	क्योंकि	भ्रुवा	७.	भौहों को
एषः	१२.	यह	त्वया	९.	तुम से
मा	१४.	मुझे	उपसृष्टः	१०.	प्रेरित होकर
अपाङ्ग	२.	(तुम्हारे) कटाक्ष से	भगवान्	११.	बलवान्
विखण्डित	४.	घायल (हो गया है इसलिये)	मनोभवः	१३.	कामदेव
इन्द्रियम्	३.	(मेरा) मन	प्रबाधते	१५.	पीड़ित कर रहा है
सव्रीड	५.	लज्जा पूर्वक	अथ	१६.	इसलिये
भावस्मित	६.	मधुर मुसकान के साथ	अनुगृहाण	१८.	कृपा करो
बिभ्रमद्	८.	चलाने वाली	शोभने ।	१७.	हे सुन्दरि मुझ पर

श्लोकार्थ—क्योंकि तुम्हारे कटाक्ष से मेरा मन घायल हो गया है । इसलिये लज्जा पूर्वक मधुर मुसकान के साथ भौहों को चलाने वाली तुमसे प्रेरित होकर बलवान् यह कामदेव मुझे पीड़ित कर रहा है । इसलिये हे सुन्दरि ! मुझ पर कृपा करो ॥

एकत्रिंशः श्लोकः

त्वदाननं सुभ्रु सुतारलोचनं व्यालम्बिनीलालकवृन्दसंवृतम् ।
उन्नीय मे दर्शय वल्गुवाचकं यद्व्रीडया नाभिमुखं शुचिस्मिते ॥३१॥

पदच्छेद—

त्वद् आननम् सुभ्रु सुतार लोचनम् व्यालम्बि नील अलक वृन्द संवृतम् ।
उन्नीय मे दर्शय वल्गु वाचकम्, यद् व्रीडया न अभिमुखम् शुचिस्मिते ॥

शब्दार्थ—

त्वद्	२.	तुम्हारा	उन्नीय	१६.	ऊपर उठाकर
आननम्	३.	मुख	मे	१७.	मुझे
सुभ्रु	४.	सुन्दर भौहों	दर्शय	१८.	दिखाओ
सुतार	५.	विशाल	वल्गु	१४.	मनोहर
लोचनम्	६.	नेत्रों (और)	वाचकम्	१५.	वचन बोलने वाले मुख को
व्यालम्बि	७	लम्बी	यद्व्रीडया	११.	जो लज्जा वश
नील	८.	काली	न	१३.	नहीं (देख रहा है)
अलकवृन्द	९.	अलकावलियों से	अभिमुखम्	१२.	सामने
संवृतम् ।	१०.	घिरा हुआ है	शुचिस्मिते ॥	१.	हे सुन्दरि

श्लोकार्थ—हे सुन्दरि ! तुम्हारा मुख, सुन्दर भौंहों, विशाल नेत्रों और लम्बी काली अलकावलियों से घिरा हुआ है, जो लज्जा वश सामने नहीं देख रहा है । मनोहर वचन बोलने वाले मुख को ऊपर उठाकर मुझे दिखाओ ॥

द्वात्रिंशः श्लोकः

नारद उवाच—इत्थं पुरञ्जनं नारी याचमानमधीरवत् ।
अभ्यनन्दत तं वीरं हसन्ती वीर मोहिता ॥३२॥

पदच्छेद—

इत्थम् पुरञ्जनं नारी याचमानम् अधीरवत् ।
अभ्यनन्दत तम् वीरम् हसन्ती वीर मोहिता ॥

शब्दार्थ—

इत्थम्	२	इस प्रकार	अभ्यनन्दत	१०.	स्वागत करने लगी
पुरञ्जनम्	३.	राजा पुरञ्जन	तम् वीरम्	९.	उन वीर का
नारी	६.	(वह) सुन्दरी भी (उन पर)	हसन्ती	८.	हँसती हुई
याचमानम्	५.	याचना करने लगे	वीर	१.	हे राजन्
अधीरवत् ।	४.	अधीर होकर	मोहिता ॥	७.	मोहित हो गयी (और)

श्लोकार्थ—हे राजन् ! इस प्रकार राजा पुरञ्जन अधीर होकर याचना करने लगे । वह सुन्दरी भी उन पर मोहित हो गई और हँसती हुई उन वीर का स्वागत करने लगी ॥

त्रयस्त्रिंशः श्लोकः

न विदाम वयं सम्यक्कर्तारं पुरुषर्षभ।
आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतम् ॥३३॥

पदच्छेद—

न विदाम वयम् सम्यक् कर्तारम् पुरुषर्षभ।
आत्मनः च परस्य अपि गोत्रम् नाम च यत् कृतम् ॥

शब्दार्थ—

न	१३.	नहीं	च	४.	और
विदाम	१४.	जानते हैं	परस्य	५.	दूसरे को
वयम्	२.	हम	अपि	६.	भी
सम्यक्	१२.	भली-भाँति	गोत्रम्	९.	गोत्र को (तथा)
कर्तारम्	७.	उत्पन्न करने वाले को	नाम	१०.	नाम
पुरुषर्षभ।	१.	हे पुरुष श्रेष्ठ	च यत्	८.	और जो
आत्मनः	३.	अपने	कृतम्	११.	रक्खा गया है (उसे भी)

श्लोकार्थ—हे पुरुषश्रेष्ठ ! हम अपने और दूसरे को भी उत्पन्न करने वाले को और जो गोत्र तथा नाम रक्खा गया है; उसे भी भली-भाँति नहीं जानते हैं ॥

चतुस्त्रिंशः श्लोकः

इहाद्य सन्तमात्मानं विदाम न ततः परम्।
येनेयं निर्मिता वीर पुरी शरणमात्मनः ॥३४॥

पदच्छेद—

इह अद्य सन्तम् आत्मानम् विदाम न ततः परम्।
येन इयम् निर्मिता वीर पुरी शरणम् आत्मनः ॥

शब्दार्थ—

इह	२.	यहाँ पर	येन	८.	जिसने
अद्य	३.	इस समय	इयम्	११.	इस
सन्तम्	४.	विद्यमान	निर्मिता	१३.	बनाया है (उसे भी)
आत्मानम्	५.	केवल अपने को	वीर	१.	हे राजन् हम
विदाम	६.	जानते हैं	पुरी	१२.	पुरी को
न	१४.	नहीं जानते हैं	शरणम्	१०.	रहने के लिये
ततः परम्।	७.	उसके अतिरिक्त	आत्मनः ॥	९.	हमारे

श्लोकार्थ—हे राजन् ! हम यहाँ पर इस समय विद्यमान केवल अपने को जानते हैं। उसके अतिरिक्त जिसने हमारे रहने के लिये इस पुरी को बनाया है उसे भी नहीं जानते हैं ॥

पञ्चत्रिंशः श्लोकः

एते सखायः सख्यो मे नरा नार्यश्च मानद ।
सुप्तायां मयि जागर्ति नागोऽयं पालयन् पुरीम् ॥३५॥

पदच्छेद—

एते सखायः सख्यः मे नराः नार्यः च मानद ।
सुप्तायाम् मयि जागर्ति नागः अयम् पालयन् पुरीम् ॥

शब्दार्थ—

एते	२.	ये	सुप्तायाम्	११.	सोने पर
सखायः सख्यः	७.	मित्र और सहेलियाँ (तथा)	मयि	१०.	मेरे
मे	६.	मेरे	जागर्ति	१४.	जागता है
नराः	३.	पुरुष	नागः	९.	सर्प
नार्यः	५.	स्त्रियाँ	अयम्	८.	यह
च	४.	और	पालयन्	१३.	रक्षा करता हुआ
मानद ।	१.	हे प्रिय	पुरीम् ॥	१२.	इस नगरी की

श्लोकार्थ—हे प्रिय ! ये पुरुष और स्त्रियाँ मेरे मित्र और सहेलियाँ हैं, तथा यह सर्प मेरे सोने पर इस पुरी की रक्षा करता हुआ जागता है ॥

षट्त्रिंशः श्लोकः

दिष्ट्याऽऽगतोऽसि भद्रं ते ग्राम्यान् कामानभीप्ससे ।
उद्वहिष्यामि तांस्तेऽहं स्वबन्धुभिररिन्दम ॥३६॥

पदच्छेद—

दिष्ट्या आगतः असि भद्रम् ते ग्राम्यान् कामान् अभीप्ससे ।
उद्वहिष्यामि तान् ते अहम् स्व बन्धुभिः अरिन्दम ॥

शब्दार्थ—

दिष्ट्या	२.	सौभाग्य से	उद्वहिष्यामि	१४.	प्रस्तुत करूँगी ।
आगतः असि	३.	आये हो	तान्	१३.	उन विषयों को
भद्रम्	५.	मङ्गल (हो तुम)	ते	१२.	तुम्हारे लिये
ते	४.	आपका	अहम्	९.	मैं
ग्राम्यान्	६.	विषय	स्व	१०.	अपने
कामान्	७.	सुख	बन्धुभिः	११.	सहायकों के साथ
अभीप्ससे ।	८.	चाहते हो	अरिन्दम ॥	१.	हे शत्रुदमन तुम

श्लोकार्थ—हे शत्रुदमन ! तुम सौभाग्य से आये हो ! आपका मङ्गल हो, तुम विषय सुख चाहते हो । मैं अपने सहायकों के साथ तुम्हारे लिये उन विषयों को प्रस्तुत करूँगी ॥

सप्तत्रिंशः श्लोकः

इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो ।
मयोपनीतान् गृह्णानः कामभोगान् शतं समाः ॥३७॥

पदच्छेद—

इमाम् त्वम् अधितिष्ठस्व पुरीम् नव मुखीम् विभो ।
मया उपनीतान् गृह्णानः काम भोगान् शतम् समाः ॥

शब्दार्थ—

इमाम्	६.	इस	मया	२.	मेरे द्वारा
त्वम्	११.	तुम	उपनीतान्	३.	दिये गये
अधितिष्ठस्व	१२.	निवास करो	गृह्णानः	५.	भोग करते हुये
पुरीम्	१०.	नगरी में	कामभोगान्	४.	यथेच्छ भोगों का
नव मुखीम्	८.	नौ दरवाजों वाली	शतम्	६.	एक सौ
विभो	१.	हे स्वामिन्	समाः ॥	७	वर्षों तक

श्लोकार्थ—हे स्वामिन् ! मेरे द्वारा दिये गये यथेच्छ भोगों का भोग करते हुये एक सौ वर्षों तक नौ दरवाजों वाली इस नगरी में तुम निवास करो ॥

अष्टात्रिंशः श्लोकः

कं नु त्वदन्यं रमये ह्यरतिज्ञमकोविदम् ।
असम्परायाभिमुखमश्वस्तनविदं पशुम् ॥३८॥

पदच्छेद—

कम् नु त्वद् अन्यम् रमये हि अरतिज्ञम् अकोविदम् ।
असम्पराये अभिमुखम् अश्वस्तन विदम् पशुम् ॥

शब्दार्थ—

कम्	३.	किसके साथ	अकोविदम् ।	७.	अपण्डित
नु	२.	भला (और)	असम्पराये	८.	परलोक से
त्वद् अन्यम्	१.	तुमसे भिन्न	अभिमुखम्	६.	विमुख (और)
रमये	४.	रमण करूँगी	अश्वस्तन	१०.	भविष्य को नहीं
हि	५.	क्योंकि दूसरे	विदम्	११.	सोचने वाले
अरतिज्ञम्	६.	रति सुख के अज्ञानी	पशुम् ॥	१२.	पशु के समान हैं

श्लोकार्थ—हे राजन् ! तुमसे भिन्न भला और किसके साथ रमण करूँगी । क्योंकि दूसरे रति-सुख के अज्ञानी, अपण्डित, परलोक से विमुख और भविष्य को नहीं सोचने वाले पशु के समान हैं ॥

एकोनचत्वारिंशः श्लोकः

धर्मो ह्यत्रार्थकामौ च प्रजानन्दोऽमृतं यशः ।
लोका विशोका विरजा यान् न केवलिनो विदुः ॥३९॥

पदच्छेद—

धर्मो हि अत्र अर्थकामौ च प्रजा आनन्द अमृतं यशः ।
लोकाः विशोकाः विरजाः यान् न केवलिनो विदुः ॥

शब्दार्थ—

धर्मः	३.	धर्म	यशः	८.	कीर्ति
हि	२.	ही	लोकाः	१२.	स्वर्गादि लोक (मिलते हैं)
अत्र	१.	गृहस्थ आश्रम में	विशोकाः	११.	शोक रहित
अर्थ कामौ	४.	अर्थ-काम	विरजाः	१०.	शुद्ध
च	९.	और	यान्	१४	जिन्हें
प्रजा	५.	पुत्र	न	१५	नहीं
आनन्द	६.	सुख	केवलिनः	१३.	यति लोग
अमृतम्	७.	मोक्ष	विदुः ॥	१६.	जानते हैं

श्लोकार्थ—गृहस्थ आश्रम में ही धर्म, अर्थ, काम, पुत्र, सुख, मोक्ष, कीर्ति और शुद्ध शोक रहित स्वर्गादिलोक मिलते हैं । यति लोग जिन्हें नहीं जानते हैं ॥

चत्वारिंशः श्लोक

पितृदेवर्षिमर्त्यानां भूतानामात्मनश्च ह ।
क्षेम्यं वदन्ति शरणं भवेऽस्मिन् यद् गृहाश्रमः ॥४०॥

पदच्छेद—

पितृ देवर्षि मर्त्यानां भूतानाम् आत्मनः च ह ।
क्षेम्यम् वदन्ति शरणम् भवे अस्मिन् यद् गृहाश्रमः ॥

शब्दार्थ—

पितृ	६.	पितर	क्षेम्यम्	१२.	कल्याणकारी
देव ऋषि	७.	देवता-ऋषिगण	वदन्ति	१४.	कहते हैं
मर्त्यानाम्	८.	मनुष्य	शरणम्	१३.	आश्रम
भूतानाम्	१०.	प्राणी	भवे	२.	संसार में
आत्मनः	११.	अपने लिये	अस्मिन्	१.	इस
च	९.	और	यद्	३.	जो
ह ।	५.	उसी को	गृहाश्रमः ॥	४.	गृहस्थाश्रम है

श्लोकार्थ—इस संसार में जो गृहस्थाश्रम है उसी को पितर, देवता, ऋषिगण मनुष्य और प्राणी अपने लिये कल्याणकारी आश्रम कहते हैं ॥

एकचत्वारिंशः श्लोकः

का नाम वीर विख्यातं वदान्यं प्रियदर्शनम् ।
न वृणीत प्रियं प्राप्तं मादृशी त्वादृशं पतिम् ॥४१॥

पदच्छेद—

का नाम वीर विख्यातम् वदान्यम् प्रियदर्शनम् ।
न वृणीत प्रियम् प्राप्तम् मादृशी त्वादृशम् पतिम् ॥

शब्दार्थ—

का	३.	कौन स्त्री (होगी)	न वृणीत	१२.	नहीं वरण करेगी
नाम	४.	जो भला	प्रियम्	६.	अत्यन्त प्रिय
वीर	१.	हे राजन्	प्राप्तम्	११.	पाकर भी
विख्यातम्	६.	प्रसिद्ध	मादृशी	२.	मेरे जैसी
वदान्यम्	७.	उदार चरित	त्वादृशम्	५.	आप जैसे
प्रियदर्शनम् ।	८.	सुन्दर	पतिम् ॥	१०	पति को

श्लोकार्थ—हे राजन् ! मेरे जैसी कौन स्त्री होगी जो भला आप जैसे प्रसिद्ध उदार चरित सुन्दर अत्यन्त प्रिय पति को पाकर भी नहीं वरण करेगी ॥

द्विचत्वारिंशः श्लोकः

कस्या मनस्ते भुवि भोगिभोगयोः स्त्रिया न सज्जेद्भुजयोर्महाभुज ।
योऽनाथवर्गाधिमलं घृणोद्धतस्मितावलोकेन चरत्यपोहितुम् ॥४२॥

पदच्छेद—

कस्याः मनः ते भुवि भोगिभोगयोः स्त्रियाः न सज्जेत् भुजयोः महाभुज ।
यः अनाथवर्ग अधिमलम् घृणा उद्धत स्मित अवलोकेन चरति अपोहितुम् ॥

शब्दार्थ—

कस्याः	६.	किस	यः	१०.	जो (आप)
मनः	८.	मन	अनाथवर्ग	१५.	दीन जनों के
ते	४.	आपकी	अधिमलम्	१६.	मानसिक दुःख को
भुवि	२.	संसार में	घृणा	१२.	कृपा वश
भोगि भोगयोः	३.	सर्प के समान गोलाकार	उद्धत	११.	अगाध
स्त्रियाः	७.	स्त्री का	स्मित	१३.	मुसकानभरी
न सज्जते	९.	नहीं, रमेगा	अवलोकेन	१४.	चितवन से
भुजयोः	५.	भुजाओं में	चरति	१८.	विचारण कर रहे हैं
महाभुजः ।	१.	हे महाबाहो	अपोहितुम् ॥	१७.	दूर करने के लिये

श्लोकार्थ—हे महाबाहो ! संसार में सर्प के समान गोलाकार आपकी भुजाओं में किस स्त्री का मन नहीं रमेगा । जो आप अगाध कृपा वश मुसकानभरी चितवन से दीन जनों के मानसिक दुःख को दूर करने के लिये विचरण कर रहे हैं ॥

त्रिचत्वारिंशः श्लोकः

नारद उवाच—इति तौ दम्पती तत्र समुद्य समयं मिथः ।
तां प्रविश्य पुरीं राजन्मुमुदाते शतं समाः ॥४३॥

पदच्छेद—

इति तौ दम्पती तत्र समुद्य समयम् मिथः ।
ताम् प्रविश्य पुरीम् राजन् मुमुदाते शतम् समाः ॥

शब्दार्थ—

इति	२.	इस प्रकार	ताम्	९.	उस
तौ	३.	वे दोनों	प्रविश्य	१०.	प्रवेश (किया और)
दम्पती	४.	स्त्री पुरुष	पुरीम्	१०.	नगरी में
तत्र	५.	वहाँ पर	राजन्	१.	हे राजन्
समुद्य	८.	स्वीकार करके	मुमुदाते	१४.	आनन्द किया
समयम्	७.	बात को	शतम्	१२.	एक सौ
मिथः ।	६.	एक दूसरे की	समाः ॥	१३.	वर्षों तक

श्लोकार्थ—हे राजन् ! इस प्रकार उन दोनों स्त्री-पुरुषों ने वहाँ पर एक दूसरे की बात को स्वीकार करके उस नगरी में प्रवेश किया और एक सौ वर्षों तक आनन्द किया ॥

चतुश्चत्वारिंशः श्लोकः

उपगीयमानो ललितं तत्र तत्र च गायकैः ।
क्रीडन् परिवृतः स्त्रीभिर्ह्रदिनीमाविशच्छुचौ ॥४४॥

पदच्छेद—

उपगीयमानः ललितम् तत्र तत्र च गायकैः ।
क्रीडन् परिवृतः स्त्रीभिः ह्रदिनीम् आविशत् शुचौ ॥

शब्दार्थ—

उपगीयमानः	५.	यशोगान करते थे	क्रीडन्	८.	जल क्रीडा करने के लिये
ललितम्	४.	मधुर स्वर में (उनका)	परिवृतः	१०.	साथ
तत्र	१.	जगह	स्त्रीभिः	९.	स्त्रियों के
तत्र	२.	जगह पर	ह्रदिनीम्	११.	सरोवर में
च	६.	तदनन्तर	आविशत्	१२.	प्रवेश करता था
गायकैः ।	३.	गायक वृन्द	शुचौ ॥	७.	ग्रीष्म ऋतु में (वह राजा)

श्लोकार्थ—जगह-जगह पर गायक वृन्द मधुर स्वर में उसका यशोगान करते थे । तदनन्तर ग्रीष्म ऋतु में वह राजा जल क्रीडा करने के लिये स्त्रियों के साथ सरोवर में प्रवेश करता था ॥

पञ्चचत्वारिंशः श्लोकः

सप्तोपरि कृता द्वारः पुरस्तस्यास्तु द्वे अधः ।
पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः ॥४५॥

पदच्छेद—

सप्त उपरि कृताः द्वारः पुरः तस्याः तु द्वे अधः ।
पृथग् विषय गत्यर्थम् तस्याम् यः कश्चन ईश्वरः ॥

शब्दार्थ—

सप्त	११.	सात	अधः ।	१३.	नीचे
उपरि	१०.	ऊपर	पृथग्	५.	भिन्न-भिन्न
कृताः	१६.	बनाये गये थे	विषय	६.	देशों में
द्वारः	१५.	दरवाजे	गत्यर्थम्	७.	जाने के लिये
पुरः	९.	नगरी के	तस्याम्	१.	उस नगरी में
तस्याः	८.	उस	यः	२.	जो
तु	१२.	तथा	कश्चन	३.	कोई
द्वे	१४.	दो	ईश्वरः ॥	४.	राजा हो (उसे)

श्लोकार्थ—उस नगरी में जो कोई राजा हो उसे भिन्न-भिन्न देशों में जाने के लिये उस नगरी के ऊपर सात तथा नीचे दो दरवाजे बनाये गये थे ॥

षट्चत्वारिंशः श्लोकः

पञ्च द्वारस्तु पौरस्त्या दक्षिणैका तथोत्तरा ।
पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये ॥४६॥

पदच्छेद— पञ्च द्वारः तु पौरस्त्याः दक्षिणाः एका तथा उत्तरा ।
पश्चिमे द्वे अमूषाम् ते नामानि नृप वर्णये ॥

शब्दार्थ—

पञ्च द्वारः	२.	पाँच दरवाजे	पश्चिमे	८.	पश्चिम दिशा में
तु	३.	तथा	द्वे	९.	दो (दरवाजे थे)
पौरस्त्याः	१.	पूर्व दिशा में	अमूषाम्	११.	उनके
दक्षिण	४.	दक्षिण दिशा में (और)	ते	१३.	तुम्हें
एका	६.	एक-एक	नामानि	१२.	नाम
तथा	७.	तथा	नृप	१०.	हे राजन्
उत्तरा ।	५.	उत्तर दिशा में	वर्णये ॥	१४.	सुनाता हूँ

श्लोकार्थ—उनमें से पूर्व दिशा में पाँच दरवाजे तथा दक्षिण दिशा में और उत्तर दिशा में एक-एक तथा पश्चिम दिशा में दो दरवाजे थे। हे राजन् ! उनके नाम तुम्हें सुनाता हूँ ॥

सप्तचत्वारिंशः श्लोकः

खद्योताऽऽविर्मुखी च प्राग्द्वारावेकत्र निर्मिते ।
विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः ॥४७॥

पदच्छेद—

खद्योत आविर्मुखी च प्राक् द्वारौ एकत्र निर्मिते ।
विभ्राजितम् जनपदम् याति ताभ्याम् द्युमत् सखः ॥

शब्दार्थ—

खद्योत	२.	खद्योत	विभ्राजितम्	१०.	विभ्राजित नाम के
आविर्मुखी	४.	आविर्मुखी (नाम के)	जनपदम्	११.	देश में
च	३.	और	याति	१२.	जाता है
प्राक्	१.	पूर्व दिशा में	ताभ्याम्	७.	उन दरवाजों से
द्वारौ एकत्र	५.	दो दरवाजे एक जगह	द्युमत्	८.	द्युमत् नाम के
निर्मिते ।	६.	बनाये गये हैं	सखः ॥	९.	मित्र के साथ

श्लोकार्थ—पूर्व दिशा में खद्योत और आविर्मुखी नाम के दो दरवाजे एक जगह बनाये गये हैं । उन दरवाजों से वह राजा पुरञ्जन द्युमत् नाम के मित्र के साथ विभ्राजित नाम के देश में जाता है ॥

अष्टचत्वारिंशः श्लोकः

नलिनी नालिनी च प्राग्द्वारावेकत्र निर्मिते ।
अवधूतसखस्ताभ्यां विषयं याति सौरभम् ॥४८॥

पदच्छेद—

नलिनी नालिनी च प्राक् द्वारौ एकत्र निर्मिते ।
अवधूत सखः ताभ्याम् विषयम् याति सौरभम् ॥

शब्दार्थ—

नलिनी	२.	नलिनी	अवधूत	८.	अवधूत नाम के
नालिनी	४.	नालिनी नाम के	सखः	९.	मित्र के साथ
च	३.	और	ताभ्याम्	७.	उन दोनों दरवाजों से वह
प्राक्	१.	पूर्व दिशा में	विषयम्	११.	देश को
द्वारौ एकत्र	५.	दो दरवाजे एक जगह	याति	१२.	जाता है
निर्मिते ।	६.	बनाये गये थे	सौरभम् ॥	१०.	सौरभ नाम के

श्लोकार्थ—पूर्व दिशा में नलिनी और नालिनी नाम के दो दरवाजे एक जगह बनाये गये थे । उन दोनों दरवाजों से वह राजा पुरञ्जन अवधूत नाम के मित्र के साथ सौरभ नाम के देश को जाता है ॥

एकोनपञ्चाशः श्लोकः

मुख्या नाम पुरस्ताद् द्वास्तयाऽऽपणबहूदनौ ।
विषयौ याति पुरराड्रसज्ञविपणान्वितः ॥४९॥

पदच्छेद—

मुख्या नाम पुरस्ताद् द्वाः तया आपण बहूदनौ ।
विषयौ याति पुरराट् रसज्ञ विपण अन्वितः ॥

शब्दार्थ—

मुख्यानाम	२.	मुख्या नाम का	विषयौ	११.	देशों में
पुरस्ताद्	१.	पूर्व दिशा में ही	याति	१२.	जाता है
द्वाः	३.	दरवाजा है	पुरराट्	५.	राजा पुरञ्जन
तया	४.	उस दरवाजे से	रसज्ञ	६.	रसज्ञ (और)
आपण	१०.	आपण नाम के	विपण	७.	विपण नाम के
बहूदनौ ।	९.	बहूदन और	अन्वितः ॥	८.	मित्र के साथ (क्रमशः)

श्लोकार्थ—पूर्व दिशा में ही मुख्या नाम का दरवाजा है । उस दरवाजे से राजा पुरञ्जन रसज्ञ और विपण नाम के मित्र के साथ क्रमशः बहूदन और आपण नाम के देशों में जाता है ॥

पञ्चाशः श्लोकः

पितृहूर्नृप पुर्या द्वार्दक्षिणेन पुरञ्जनः ।
राष्ट्रं दक्षिणपञ्चालं याति श्रुतधरान्वितः ॥५०॥

पदच्छेद—

पितृहूः नृप पुर्याः द्वाः दक्षिणेन पुरञ्जनः ।
राष्ट्रम् दक्षिण पञ्चालं याति श्रुतधर अन्वितः ॥

शब्दार्थ—

पितृहूः	४.	पितृहू नाम का	राष्ट्रम्	११.	श्रुतधर नाम के
नृप	१.	हे राजन्	दक्षिण	९.	दक्षिण
पुर्याः	२.	उस नगरी के	पञ्चालम्	१०.	पाञ्चाल देश को
द्वाः	५.	दरवाजा है (जिससे)	याति	१२.	जाता है
दक्षिणेन	३.	दक्षिण दिशा की ओर	श्रुतधर	७.	श्रुतधर नाम के
पुरञ्जनः ।	६.	राजा पुरञ्जन	अन्वितः ॥	८.	मित्र के साथ

श्लोकार्थ—हे राजन् ! उस नगरी के दक्षिण दिशा की ओर पितृहू नाम का दरवाजा है जिससे राजा पुरञ्जन श्रुतधर नाम के मित्र के साथ दक्षिण पाञ्चाल देश को जाता है ॥

एकपञ्चाशः श्लोकः

देवहूर्नाम पुर्या द्वा उत्तरेण पुरञ्जनः ।
राष्ट्रमुत्तरपञ्चालं याति श्रुतधरान्वितः ॥५१॥

पदच्छेद—

देवहूः नाम पुर्याः द्वाः उत्तरेण पुरञ्जनः ।
राष्ट्रम् उत्तर पञ्चालम् याति श्रुतधर अन्वितः ॥

शब्दार्थ—

देवहूः	३. देवहू		राष्ट्रम्	११. देश को	
नाम	४. नाम का		उत्तर	९. उत्तर	
पुर्याः	१. उस नगरी के		पञ्चालम्	१०. पाञ्चाल	
द्वाः	५. दरवाजा है (जिससे)		याति	१२. जाता है	
उत्तरेण	२. उत्तर दिशा की ओर		श्रुतधर	७. श्रुतधर नाम के	
पुरञ्जनः ।	६. राजा पुरञ्जन		अन्वितः ॥	८. मित्र के साथ	

श्लोकार्थ—उस नगरी के उत्तर दिशा की ओर देवहू नाम का दरवाजा है। जिससे राजा पुरञ्जन श्रुतधर नाम के मित्र के साथ उत्तर पाञ्चाल देश को जाता है ॥

द्विपञ्चाशः श्लोकः

आसुरी नाम पश्चाद् द्वास्तया याति पुरञ्जनः ।
ग्रामकं नाम विषयं दुर्मदेन समन्वितः ॥५२॥

पदच्छेद—

आसुरी नाम पश्चात् द्वाः तया याति पुरञ्जनः ।
ग्रामकं नाम विषयम् दुर्मदेन समन्वितः ॥

शब्दार्थ—

आसुरी	२. आसुरी	पुरञ्जनः	६. राजा पुरञ्जन
नाम	३. नाम का	ग्रामकम्	९. ग्रामक
पश्चात्	१. पश्चिम दिशा में	नाम	१०. नाम के
द्वाः	४. दरवाजा है	विषयम्	११. देश को
तया	५. उस दरवाजे से	दुर्मदेन	७. दुर्मदनाम के
याति	१२. जाता है	समन्वितः ॥	८. मित्र के साथ

श्लोकार्थ—उस नगरी के पश्चिम दिशा में आसुरी नाम का दरवाजा है, उस दरवाजे से राजा पुरञ्जन दुर्मद नाम के मित्र के साथ ग्रामक नाम के देश को जाता है ॥

त्रिपञ्चाशः श्लोकः

निर्ऋतिर्नाम पश्चाद् द्वास्तया याति पुरञ्जनः ।
वैशसं नाम विषयं लुब्धकेन समन्वितः ॥५३॥

पदच्छेद—

निर्ऋतिः नाम पश्चाद् द्वाः तया याति पुरञ्जनः ।
वैशसम् नाम विषयम् लुब्धकेन समन्वितः ॥

शब्दार्थ—

निर्ऋतिः	२.	निर्ऋति	पुरञ्जनः ।	६.	राजा पुरञ्जन
नाम	३.	नाम का	वैशसम्	९.	वैशस
पश्चाद्	१.	पश्चिम दिशा में	नाम	१०.	नाम के
द्वाः	४.	दरवाजा है	विषयम्	११.	देश को
तया	५.	उस दरवाजे से	लुब्धकेन	७.	लुब्धक नाम के
याति	१२.	जाता है	समन्वितः ॥	८.	मित्र के साथ

श्लोकार्थ—पश्चिम दिशा में निर्ऋति नाम का दरवाजा है । उस दरवाजे से राजा पुरञ्जन लुब्धक नाम के मित्र के साथ वैशस नाम के देश को जाता है ॥

चतुःपञ्चाशः श्लोकः

अन्धावमीषां पौराणां निर्वाक्पेशस्कृतावुभौ ।
अक्षण्वतामधिपतिस्ताभ्यां याति करोति च ॥५४॥

पदच्छेद—

अन्धौ अमीषाम् पौराणाम् निर्वाक्पेशस्कृतौ उभौ ।
अक्षण्वताम् अधिपतिः ताभ्याम् याति करोति च ॥

शब्दार्थ—

अन्धौ	६.	अन्धे हैं (राजा पुरञ्जन)	अक्षण्वताम्	७.	आँख वालों का
अमीषाम्	१.	उन	अधिपतिः	८.	शासक होकर भी वह
पौराणाम्	२.	नागरिकों में	ताभ्याम्	९.	उन दोनों के परामर्श से
निर्वाक्	३.	निर्वाक् और	याति	१०.	जाता है
पेशस्कृतौ	४.	पेशस्कृत नाम के	करोति	१२.	करता है
उभौ ।	५.	दो	च ॥	११.	और

श्लोकार्थ—उन नागरिकों में निर्वाक् और पेशस्कृत नाम के दो अन्धे हैं । राजा पुरञ्जन आँख वालों का शासक होकर भी वह उन दोनों के परामर्श से जाता है और करता है ॥

पञ्चपञ्चाशः श्लोकः

स यर्ह्यन्तःपुरगतो विषूचीनसमन्वितः।
मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवम् ॥५५॥

पदच्छेद—

सः यर्हि अन्तः पुर गतः विषूचीन समन्वितः।
मोहम् प्रसादम् हर्षम् वा याति जाया आत्मज उद्भवम् ॥

शब्दार्थ—

सः	१.	वह राजा पुरञ्जन	प्रसादम्	११.	प्रसन्नता
यर्हि	४.	जब	हर्षम्	१३.	हर्ष को
अन्तः पुर	५.	महल में	वा	१२.	अथवा
गतः	६.	जाता है (तब)	याति	१४.	प्राप्त करता है
विषूचीन	२.	विषूचीन के	जाया	७.	अपनी पत्नी (और)
समन्वितः	३.	साथ	आत्मज	८.	पुत्रों के
मोहम्	१०.	मोह	उद्भवम् ॥	९.	कारण

श्लोकार्थ—वह राजा पुरञ्जन विषूचीन के साथ जब महल में जाता है। तब अपनी पत्नी और पुत्रों के कारण मोह, प्रसन्नता अथवा हर्ष को प्राप्त करता है।

षट्पञ्चाशः श्लोकः

एवं कर्मसु संसक्तः कामात्मा वञ्चितोऽबुधः।
महिषी यद्यदीहेत तत्तदेवान्ववर्तत ॥५६॥

पदच्छेद—

एवम् कर्मसु संसक्तः कामात्मा वञ्चितः अबुधः।
महिषी यद्-यद् ईहेत तत् तद् एव अनुअवर्तत ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	महिषी	७.	उसकी पत्नी
कर्मसु	२.	कर्म जाल में	यद्-यद्	८.	जो-जो
संसक्तः	३.	फँसा हुआ (राजा पुरञ्जन)	ईहेत	९.	चाहती थी
कामात्मा	४.	कामुक	तद्	१०.	वह (वही)
वञ्चितः	६.	ठगा गया था	तद्-एव	११.	वही
अबुधः।	५.	अज्ञानी	अनुअवर्तत ॥	१२.	करता था

श्लोकार्थ—इस प्रकार कर्म जाल में फंसा हुआ राजा पुरञ्जन कामुक और अज्ञानी होकर ठगा गया था। उसकी पत्नी जो-जो चाहती थी वह वही-वही करता था ॥

सप्तपञ्चाशः श्लोकः

क्वचित्पिबन्त्यां पिबति मदिरां मदविह्वलः ।
अश्नन्त्यां क्वचिदश्नाति जक्षत्यां सह जक्षिति ॥५७॥

पदच्छेद—

क्वचित् पिबन्त्याम् पिबति मदिराम् मद विह्वलः ।
अश्नन्त्याम् क्वचित् अश्नाति जक्षत्याम् सह जक्षिति ॥

शब्दार्थ—

क्वचित्	१.	जब (उनकी पत्नी)	अश्नन्त्याम्	८.	खाती थी (तब वह भी)
पिबन्त्याम्	३.	पीती थी (वह भी)	क्वचित्	७.	जब वह
पिबति	४.	पीता था (ततः)	अश्नाति	९.	खाता था
मदिराम्	२.	मदिरा	जक्षत्याम्	१०.	जब चबाती (तब वह भी)
मद	५.	मद से	सह	११.	उसके साथ
विह्वलः ।	६.	उन्मत्त होकर	जक्षिति ॥	१२.	चबाता था

श्लोकार्थ—जब उसकी पत्नी मदिरा पीती थी वह भी पीता था । ततः मद से उन्मत्त होकर जब वह खाती थी तब वह भी खाता था; जब चबाती तब वह भी चबाता था ॥

अष्टपञ्चाशः श्लोकः

क्वचिद्गायति गायन्त्यां रुदत्यां रुदति क्वचित् ।
क्वचिद्धसन्त्यां हसति जल्पन्त्यामनु जल्पति ॥५८॥

पदच्छेद—

क्वचित् गायति गायन्तीम् रुदत्याम् रुदति क्वचित् ।
क्वचित् हसन्त्याम् हसति जल्पन्त्याम् अनुजल्पति ॥

शब्दार्थ—

क्वचित्	१.	जब (वह)	क्वचित्	७.	जब
गायति	३.	गाता था	हसन्त्याम्	८.	बोलती थी (तब)
गायन्त्याम्	२.	गाती थी (तब)	हसति	९.	हंसता था (और जब)
रुदत्याम्	५.	रोती थी (तब वह भी)	जल्पन्त्याम्	१०.	बोलती थी (तब)
रुदति	६.	रोता था	अनुजल्पति ॥	११.	बोलता था
क्वचित् ।	४.	जब			

श्लोकार्थ—जब वह गाती थी तब वह गाता था, जब रोती थी तब वह भी रोता था । जब हंसती थी तब वह हंसता था और जब बोलती थी तब वह भी बोलता था ॥

एकोनषष्टितमः श्लोकः

क्वचिद्धावति धावन्त्यां तिष्ठन्त्यामनु तिष्ठति ।
अनु शेते शयानायामन्वास्ते क्वचिदासतीम् ॥५९॥

पदच्छेद—

क्वचित् धावति धावन्त्याम् तिष्ठन्त्याम् अनुतिष्ठति ।
अनुशेते शयानायाम् अन्वास्ते क्वचिद् आसतीम् ॥

शब्दार्थ—

क्वचित्	१.	जब	अनुशेते	७.	सोता था (और)
धावति	३.	दौड़ता था	शयानायाम्	६.	जब सोती थी (तब)
धावन्त्याम्	२.	दौड़ती थी (तब)	अन्वास्ते	१०.	बैठता था
तिष्ठन्त्याम्	४.	जब खड़ी होती थी (तब)	क्वचित्	८.	जब
अनुतिष्ठति ।	५.	खड़ा होता था	आसतीम् ॥	९	बैठती थी (तब)

श्लोकार्थ—जब दौड़ती थी तब दौड़ता था, जब खड़ी होती थी तब खड़ा होता था, जब सोती थी तब सोता था, जब बैठती थी तब बैठता था ॥

षष्टितमः श्लोकः

क्वचिच्छृणोति शृण्वन्त्यां पश्यन्त्यामनु पश्यति ।
क्वचिज्जिघ्रति जिघ्रन्त्यां स्पृशन्त्यां स्पृशति क्वचित् ॥६०॥

पदच्छेद—

क्वचित् शृणोति शृण्वन्त्याम् पश्यन्त्याम् अनुपश्यति ।
क्वचित् जिघ्रति जिघ्रन्त्याम् स्पृशन्त्याम् स्पृशति क्वचित् ॥

शब्दार्थ—

क्वचित्	१.	जब (वह)	क्वचित्	६.	जब (कुछ)
शृणोति	३.	सुनता था	जिघ्रति	८.	सूंघता था
शृण्वन्त्याम्	२.	सुनती थी (तब)	जिघ्नन्त्याम्	७.	सूंघती थी (तब)
पश्यन्त्याम्	४.	जब देखती थी (तब)	स्पृशन्त्याम्	१०.	छूती थी
अनुपश्यति ।	५.	देखता था	स्पृशति	११.	छूता था
			क्वचित् ॥	९.	जब (कुछ)

श्लोकार्थ—जब वह सुनती थी तब सुनता था, जब देखती थी तब देखता था, जब कुछ सूंघती थी तब सूंघता था, जब कुछ छूती थी तब छूता था ॥

एकषष्टितमः श्लोकः

क्वचिच्च शोचतीं जायामनुशोचति दीनवत् ।
अनुहृष्यति हृष्यन्त्यां मुदितामनु मोदते ॥६१॥

पदच्छेद—

क्वचित् च शोचतीम् जायाम् अनुशोचति दीनवत् ।
अनुहृष्यति हृष्यन्त्याम् मुदिताम् अनु मोदते ॥

शब्दार्थ—

क्वचित्	१.	जब	दीनवत् ।	४.	(वह) अनाथ के समान
च	८.	और (उसके)	अनुहृष्यति	७.	प्रसन्न होता था
शोचतीम्	३.	शोक करती थी (तब)	हृष्यन्त्याम्	६.	प्रसन्न होती थी (तब)
जायाम्	२.	उसकी पत्नी	मुदिताम्	९.	आनन्दित होने पर
अनुशोचति	५.	शोक करता था (जब)	अनुमोदते ॥	१०.	आनन्दित होता था

श्लोकार्थ—जब उसकी पत्नी शोक करती थी, तब वह अनाथ के समान शोक करता था। जब प्रसन्न होती थी तब प्रसन्न होता था। और उसके आनन्दित होने पर आनन्दित होता था ॥

द्वाषष्टितमः श्लोकः

विप्रलब्धो महिष्यैवं सर्वप्रकृतिवञ्चितः ।
नेच्छन्ननुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा ॥६२॥

पदच्छेद—

विप्रलब्धः महिष्या एवम् सर्व प्रकृति वञ्चितः ।
न इच्छन् अनुकरोति अज्ञः क्लैब्यात् क्रीडा मृगः यथा ॥

शब्दार्थ—

विप्रलब्धः	६.	ठगा गया था	इच्छन्	१३.	चाहता हुआ भी
महिष्या	५.	पत्नी के द्वारा	अनुकरोति	१४.	करता था
एवम्	१.	इस प्रकार (वह)	अज्ञः	११.	वह अज्ञानी
सर्व	२.	अपने सारे	क्लैब्यात्	१०.	परवश होने से
प्रकृति	३.	स्वभाव से	क्रीडा	७.	खेल के लिये
वञ्चितः ।	४.	विरुद्ध होने पर भी	मृग	८.	पालतू बन्दर के
न	१२.	नहीं	यथा ॥	९.	समान

श्लोकार्थ—इस प्रकार वह अपने सारे स्वभाव से विरुद्ध होने पर भी पत्नी के द्वारा ठगा गया था। खेल के लिये पालतू बन्दर के समान परवश होने से वह अज्ञानी नहीं चाहता हुआ भी करता था ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पुरञ्जनोपाख्याने
पञ्चविंशोऽध्यायः ॥२५॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

चतुर्थः स्कन्धः

षड्विंशः अध्यायः

प्रथमः श्लोकः

नारद उवाच—स एकदा महेष्वासो रथं पञ्चाश्वमाशुगम् ।
द्वीषं द्विचक्रमेकाक्षं त्रिवेणुं पञ्चबन्धुरम् ॥१॥

पदच्छेद—

सः एकदा महेष्वासः रथम् पञ्चाश्वम् आशुगम् ।
द्वीषम् द्विचक्रम् एकाक्षम् त्रिवेणुम् पञ्चबन्धुरम् ॥

शब्दार्थ—

सः	२.	वे (महाराज पुरञ्जन)	द्वीषम्	७.	(उसमें) दो ईषा दण्ड
एकदा	१.	एक बार	द्विचक्रम्	८.	दो पहिये
महेष्वासः	३.	बड़ा धनुष लेकर	एकाक्षम्	९.	एक धुरी
रथम्	६.	रथ से (वन को गये)	त्रिवेणुम्	१०.	तीन ध्वज दण्ड (और)
पञ्चाश्वम्	४.	पाँच घोड़ों वाले	पञ्च	११.	पाँच
आशुगम् ।	५.	शीघ्रगामी	बन्धुरम् ॥	१२.	डोरियाँ थीं

श्लोकार्थ—एक बार वे महाराज पुरञ्जन बड़ा धनुष लेकर पाँच घोड़ोंवाले शीघ्र गामी रथ से वन को गये । उसमें दो ईषा दण्ड, दो पहिये, तीन ध्वजदण्ड और पाँच डोरियाँ थीं ॥

द्वितीयः श्लोकः

एकरश्म्येकदमनमेकनीडं द्विकूबरम् ।
पञ्चप्रहरणं सप्तवरूथं पञ्चविक्रमम् ॥२॥

पदच्छेद—

एकरश्मि एकदमनम् एकनीडम् द्विकूबरम् ।
पञ्चप्रहरणम् सप्तवरूथम् पञ्च विक्रमम् ॥

शब्दार्थ—

एक	१.	उस रथ में एक	पञ्च	६.	पाँच
रश्मि	२.	लगाम	प्रहरणम्	७.	आयुध (और)
एकदमनम्	३.	एक सारथी	सप्तवरूथम्	८.	सात आवरण थे (तथा वह)
एकनीडम्	४.	एक बैठने का स्थान	पञ्च	९.	पाँच प्रकार से
द्विकूबरम् ।	५.	दो जुये	विक्रमम् ॥	१०.	चलता था

पदच्छेद— प्रबोधयति मा अविज्ञम् व्युषिते शोक कर्शिता ।
वर्त्म एतद् गृहमेधीयम् वीरसूः अपि नेष्यति ॥

शब्दार्थ—

प्रबोधयति	३.	समझाती है	वर्त्म	११.	व्यवहार को
मा	२.	(यह) मुझे	एतद्	९.	इस
अविज्ञम्	१.	भूल हो जाने पर	गृहमेधीयम्	१०.	गृहस्थ धर्म के
व्युषिते	४.	परदेश चले जाने पर	वीरसूः	७.	वीर माता होने पर
शोक	५.	विरह-व्यथा में	अपि	८.	भी (क्या यह)
कर्शिता ।	६.	सूख जाती है	नेष्यति ॥	१२.	चला पायेगी

श्लोकार्थ—भूल हो जाने पर यह मुझे समझाती है, परदेश चले जाने पर विरह व्यथा में सूख जाती है । वीर माता होने पर भी क्या यह इस गृहस्थ धर्म के व्यवहार को चला पायेगी ॥

एकविंशः श्लोकः

कथं नु दारका दीना दारकीर्वापरायणाः ।
वर्तिष्यन्ते मयि गते भिन्ननाव इवोदधौ ॥२१॥

पदच्छेद—

कथम् दारकाः दीनाः दारकीः वा परायणाः ।
वर्तिष्यन्ते मयि गते भिन्न नाव इव उदधौ ॥

शब्दार्थ—

कथम्	१३.	कैसे	वर्तिष्यन्ते	१४.	निर्वाह करेंगे
नु	१२.	भला	मयि	१.	मेरे
दारकाः	६.	पुत्र	गते	२.	परलोक चले जाने पर
दीनाः	८.	अनाथ	भिन्न	६.	टूट जाये (उसी प्रकार)
दारकीः	११.	पुत्रियाँ	नाव	५.	नौका
वा	१०.	अथवा	इव	३.	जैसे
परायणाः ।	७.	केवल मेरे आश्रित (रहने वाले)	उदधौ ॥	४.	समुद्र के बीच में

श्लोकार्थ—मेरे परलोक चले जाने पर जैसे समुद्र के बीच में नौका टूट जाये उसी प्रकार केवल मेरे आश्रित रहने वाले अनाथ पुत्र अथवा पुत्रियाँ भला कैसे निर्वाह करेंगी ॥

द्वाविंशः श्लोकः

एवं कृपणया बुद्ध्या शोचन्तमतदर्हणम् ।
ग्रहीतुं कृतधीरेनं भयनामाभ्यपद्यत ॥२२॥

पदच्छेद—

एवम् कृपणया बुद्ध्या शोचन्तम् अतदर्हणम् ।
ग्रहीतुम् कृत धीः एनम् भयनामा अभ्यपद्यत ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	कृत धीः	८.	निश्चय करके
कृपणया	३.	दीन	एनम्	६.	उस राजा पुरञ्जन को
बुद्ध्या	४.	बुद्धि के कारण	भय	९.	भय
शोचन्तम्	५.	शोक करते हुये	नामा	१०.	नाम का यवनराज
अतदर्हणम् ।	२.	शोचनीय न होने पर भी	अभ्य	११.	सामने
ग्रहीतुम्	७.	पकड़ने का	पद्यत ॥	१२.	आ पहुँचा

श्लोकार्थ—इस प्रकार शोचनीय न होने पर भी दीन बुद्धि के कारण शोक करते हुये उस राजा पुरञ्जन को पकड़ने का निश्चय करके भय नाम का यवनराज सामने आ पहुँचा ॥

त्रयोविंशः श्लोकः

पशुवद्यवनैरेष नीयमानः स्वकं क्षयम् ।
अन्वद्रवन्ननुपथाः शोचन्तो भृशमातुराः ॥२३॥

पदच्छेद—

पशुवत् यवनैः एषः नीयमानः स्वकम् क्षयम् ॥
अन्व द्रवन् अनुपथाः शोचन्तः भृशम् आतुराः ॥

शब्दार्थ—

पशुवत्	३.	पशु के समान	अन्व	११.	पीछे-पीछे
यवनैः	१.	(जब) यवन लोग	द्रवन्	१२.	दौड़े
एषः	२.	इसे	अनुपथाः	७.	उसके अनुचर
नीयमानः	६.	ले जा रहे थे (तब)	शोचन्तः	१०.	शोक करते हुये
स्वकम्	४.	अपने	भृशम्	८.	बहुत
क्षयम् ।	५.	स्थान को	आतुराः ॥	९.	व्याकुल होकर

श्लोकार्थ—जब यवन लोग इसे पशु के समान अपने स्थान को ले जा रहे थे, तब उसके अनुचर बहुत व्याकुल होकर शोक करते हुये पीछे-पीछे दौड़े ॥

चतुर्विंशः श्लोकः

पुरीं विहायोपगत उपरुद्धो भुजङ्गमः ।
यदा तमेवानु पुरी विशीर्णा प्रकृतिं गता ॥२४॥

पदच्छेद—

पुरीम् विहाय उपगतः उपरुद्धः भुजङ्गमः ।
यदा तम् एव अनुपुरी विशीर्णा प्रकृतिं गता ॥

शब्दार्थ—

पुरीम्	३.	पुरी को	तम् एव	७.	पुरञ्जन के ही
विहाय	४.	छोड़कर	अनु	८.	पीछे-पीछे जाने लगा(तब)
उपगतः	५.	पास चला गया (तथा)	पुरी	९.	वह नगरी
उपरुद्धः ।	१.	रोका गया	विशीर्णा	१०.	नष्ट होकर
भुजङ्गमः	२	सर्प भी	प्रकृतिम्	१२.	अपने कारणों में
यदा	६.	जब	गताः ॥	१२.	मिल गई

श्लोकार्थ—रोका गया सर्प भी पुरी को छोड़कर पास चला गया तथा जब पुरञ्जन के ही पीछे-पीछे जाने लगा तब वह नगरी नष्ट होकर अपने कारणों में मिल गई ॥

पञ्चविंशः श्लोकः

विकृष्यमाणः प्रसभं यवनेन बलीयसा ।
नाविन्दत्तमसाऽऽविष्टः सखायं सुहृदं पुरः ॥२५॥

पदच्छेद—

विकृष्यमाणः प्रसभम् यवनेन बलीयसा ।
न अविन्दत् तमसा आविष्टः सखायम् सुहृदम् पुरः ॥

शब्दार्थ—

विकृष्यमाणः	४.	खिंचने पर भी (पुरञ्जन ने)	तमसा	५.	अज्ञान में
प्रसभम्	३.	बलपूर्वक	आविष्ट	६.	स्थित रहने से
यवनेन	२.	यवनराज के द्वारा	सखायम्	९.	मित्र (अविज्ञात को)
बलीयसा ।	१.	महाबली	सुहृदम्	८.	हितैषी (और)
न अविन्दत्	१०.	नहीं स्मरण किया	पुरः ॥	७.	अपने पुराने

श्लोकार्थ—महाबली यवनराज के द्वारा बलपूर्वक खिंचने पर भी पुरञ्जन ने अज्ञान में स्थित रहने से अपने पुराने हितैषी और मित्र अविज्ञात को स्मरण नहीं किया ॥

षड्विंशः श्लोकः

तं यज्ञपशवोऽनेन संज्ञप्ता येऽदयालुना ।
कुठारैश्चिच्छिदुः क्रुद्धाः स्मरन्तोऽमीवमस्य तत् ॥२६॥

पदच्छेद—

तम् यज्ञपशवः अनेन संज्ञप्ताः ये अदयालुना ।
कुठारैः चिच्छिदुः क्रुद्धाः स्मरन्तः अमीवम् अस्य तत् ॥

शब्दार्थ—

तम्	१३.	उसे	कुठारैः	१२.	फरसे से
यज्ञ	५.	यज्ञ	चिच्छिदुः	१४.	काटने लगे
पशवः	६.	पशु थे (वे सब)	क्रुद्धाः	११.	क्रोध पूर्वक
अनेन	२.	पुरञ्जन के द्वारा	स्मरन्तः	१०.	स्मरण करके
संज्ञप्ताः	३.	यज्ञ में मारे गये	अमीवम्	९.	अपराध का
ये	४.	जो	अस्य	७.	(उस समय) उसके
अदयालुना ।	१.	कठोर हृदय	तत् ॥	८.	उस पूर्व

श्लोकार्थ—कठोर हृदय पुरञ्जन के द्वारा यज्ञ में मारे गये जो यज्ञ पशु थे, वे सब उस समय उसके उस पूर्व अपराध का स्मरण करके क्रोध पूर्वक फरसे से उसे काटने लगे ।

सप्तविंशः श्लोकः

अनन्तपारे तमसि मग्नो नष्टस्मृतिः समाः ।
शाश्वतीरनुभूयार्तिं प्रमदासङ्गदूषितः ॥२७॥

पदच्छेद—

अनन्तपारे तमसि मग्नः नष्ट स्मृतिः समाः ।
शाश्वतीः अनुभूय आर्तिम् प्रमदा सङ्ग दूषितः ॥

शब्दार्थ—

अनन्तपारे	१.	अपार	शाश्वतीः	६.	बहुत
तमसि	२.	अन्ध लोक में	अनुभूय	९.	अनुभव किया
मग्नः	३.	पड़े रहने से (उसका)	आर्तिम्	८.	कष्ट का
नष्ट	५.	समाप्त हो गया (उसने)	प्रमदा	१०.	स्त्री में
स्मृतिः	४.	विवेक	सङ्ग	११.	आसक्ति होने से (उसकी)
समाः ।	७.	वर्षों तक	दूषितः ॥	१२.	दुर्गति हुई थी

श्लोकार्थ—अपार अन्ध लोक में पड़े रहने से उसका विवेक समाप्त हो गया । उसने बहुत वर्षों तक कष्ट का अनुभव किया । स्त्री में आसक्ति होने से उसकी दुर्गति हुई ॥

अष्टाविंशः श्लोकः

तामेव मनसा गृह्णन् बभूव प्रमदोत्तमा ।
अनन्तरं विदर्भस्य राजसिंहस्य वेश्मनि ॥२८॥

पदच्छेद—

ताम् एव मनसा गृह्णन् बभूव प्रमदा उत्तमा ।
अनन्तरम् विदर्भस्य राज सिंहस्य वेश्मनि ॥

शब्दार्थ—

ताम् एव	१.	मरते समय उस पत्नी का ही	अनन्तरम्	५.	अगले जन्म में
मनसा	२	मन से	विदर्भस्य	८.	विदर्भराज के
गृह्णन्	३.	स्मरण करता रहा	राज	६	राजाओं में
बभूव	१२.	उत्पन्न हुआ	सिंहस्य	७.	श्रेष्ठ
प्रमदा	११.	कन्या के रूप में	वेश्मनि ॥	९.	घर में
उत्तमा ।	१०.	एक सुन्दरी			

श्लोकार्थ—मरते समय उस पत्नी का ही मन से स्मरण करता रहा । अगले जन्म में राजाओं में श्रेष्ठ विदर्भ राज के घर में एक सुन्दरी कन्या के रूप में उत्पन्न हुआ ॥

एकोनत्रिंशः श्लोकः

उपयेमे वीर्यपणां वैदर्भीं मलयध्वजः ।
युधि निर्जित्य राजन्यान् पाण्ड्यः परपुरञ्जयः ॥२९॥

पदच्छेद—

उपयेमे वीर्यपणाम् वैदर्भीम् मलयध्वजः ।
युधि निर्जित्य राजन्यान् पाण्ड्यः परपुरञ्जयः ॥

शब्दार्थ—

उपयेमे	१०.	विवाह किया	युधि	४.	युद्ध में
वीर्य	७.	सर्वश्रेष्ठ पराक्रम की	निर्जित्य	६.	जीतकर
पणाम्	८.	शर्त पूरी की और	राजन्यान्	५.	सभी राजाओं को
वैदर्भीम्	९.	विदर्भ पुत्री के साथ	पाण्ड्यः	२.	पाण्ड्य देश के
मलयध्वजः ।	३.	राजा मलयध्वज ने	पर पुरञ्जयः ॥	१.	शत्रुओं के नगर को जीतने वाले

श्लोकार्थ—शत्रुओं के नगर को जीतने वाले पाण्ड्य देश के राजा मलयध्वज ने युद्ध में सभी राजाओं को जीत कर सर्वश्रेष्ठ पराक्रम की शर्त पूरी की और विदर्भपुत्री के साथ विवाह किया ॥

त्रिंशः श्लोकः

तस्यां स जनयाञ्चक्रे आत्मजामसितेक्षणाम् ।
यवीयसः सप्त सुतान् सप्त द्रविडभूभृतः ॥३०॥

पदच्छेद—

तस्याम् सः जनयांचक्रे आत्मजाम् असित ईक्षणाम् ।
यवीयसः सप्त सुतान् सप्त द्रविड भूभृतः ॥

शब्दार्थ—

तस्याम्	२.	उस सुन्दरी से	यवीयसः	६.	उससे छोटे
सः	१.	उन्होंने	सप्त	७.	सात
जनयांचक्रे	९.	उत्पन्न किये	सुतान्	८.	पुत्र
आत्मजाम्	५.	एक पुत्री (तथा)	सप्त	१०.	(उन्होंने) सातों को
असित	३.	श्याम	द्रविड	११.	द्रविड़ देश का
ईक्षणाम् ।	४.	लोचना	भूभृतः ॥	१२.	राजा बनाया

श्लोकार्थ—उन्होंने उस सुन्दरी से श्यामलोचना एक पुत्री तथा उससे छोटे सात पुत्र उत्पन्न किये। उन्होंने उन सातों को द्रविड़ देश का राजा बनाया ॥

एकत्रिंशः श्लोकः

एकैकस्याभवत्तेषां राजन्नर्बुदमर्बुदम् ।
भोक्ष्यते यद्वंशधरैर्मही मन्वन्तरं परम् ॥३१॥

पदच्छेद—

एकैकस्य अभवत् तेषाम् राजन् अर्बुदम् अर्बुदम् ।
भोक्ष्यते यद् वंशधरैः मही मन्वन्तरम् परम् ॥

शब्दार्थ—

एकैकस्य	३.	एक-एक के	भोक्ष्यते	१२.	शासन करेंगे
अभवत्	६.	उत्पन्न हुये	यद्	७.	जिनके
तेषाम्	२.	उनमें से	वंशधरैः	८.	वंशधर
राजन्	१.	हे बर्हिष्मन्	मही	११.	पृथ्वी का
अर्बुदम्	४.	बहुत	मन्वन्तरम्	९.	मन्वन्तर तक (और)
अर्बुदम् ।	५.	बहुत से पुत्र	परम् ॥	१०.	उसके बाद भी

श्लोकार्थ—हे बर्हिष्मन् ! उनमें से एक-एक के बहुत-बहुत से पुत्र उत्पन्न हुये; जिनके वंशधर मन्वन्तर तक और उसके बाद भी शासन करेंगे ॥

द्वात्रिंशः श्लोकः

अगस्त्यः प्राग्दुहितरमुपयेमे धृतव्रताम् ।
यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः ॥३२॥

पदच्छेद—

अगस्त्यः प्राग् दुहितरम् उपयेमे धृत व्रताम् ।
यस्याम् दृढच्युतः जातः इध्मवाह आत्मजः मुनिः ॥

शब्दार्थ—

अगस्त्यः	१.	अगस्त्य ऋषि ने	यस्याम्	७.	जिससे
प्राग्	४.	प्रथम उत्पन्न	दृढच्युतः	८.	दृढच्युत नाम का पुत्र
दुहितरम्	५.	उस पुत्री के साथ	जातः	९.	उत्पन्न हुआ (उनके)
उपयेमे	६.	विवाह किया	इध्मवाहः	११.	इध्मवाह
धृत	३.	परायण	आत्मजः	१०.	पुत्र
व्रताम् ।	२.	व्रत	मुनिः ॥	१२.	मुनि (हुये)

श्लोकार्थ—अगस्त्य ऋषि ने व्रत परायण प्रथम उत्पन्न उस पुत्री के साथ विवाह किया । जिससे दृढच्युत नाम का पुत्र उत्पन्न हुआ, जिसके पुत्र इध्मवाह मुनि थे ॥

त्रयस्त्रिंशः श्लोकः

विभज्य तनयेभ्यः क्ष्मां राजर्षिर्मलयध्वजः ।
आरिराधयिषुः कृष्णं स जगाम कुलाचलम् ॥३३॥

पदच्छेद—

विभज्य तनयेभ्यः क्ष्माम् राजर्षिः मलयध्वजः ।
आरिराधयिषुः कृष्णम् सः जगाम कुल अचलम् ॥

शब्दार्थ—

विभज्य	६	विभक्त करके	आरिराधयिषुः	८.	आराधना करने
तनयेभ्यः	५.	पुत्रों में	कृष्णम्	७.	श्री कृष्ण की
क्ष्माम्	४.	राज्य को	सः	१.	वे
राजर्षि	२.	राजर्षिः	जगाम	११.	चले गये
मलयध्वजः ।	३.	मलयध्वज	कुलाचलम् ॥	१०.	श्री शैल पर्वत पर

श्लोकार्थ—वे राजर्षि मलयध्वज राज्य को पुत्रों में विभक्त करके श्री कृष्ण की आराधना करने की इच्छा से श्री शैल पर्वत पर चले गये ॥

चतुस्त्रिंशः श्लोकः

हित्वा गृहान् सुतान् भोगान् वैदर्भी मदिरेक्षणा ।
अन्वधावत पाण्ड्येशं ज्योत्स्नेव रजनीकरम् ॥३४॥

पदच्छेद—

हित्वा गृहान् सुतान् भोगान् वैदर्भी मदिर ईक्षणा ।
अन्वधावत पाण्ड्येशम् ज्योत्स्ना इव रजनीकरम् ॥

शब्दार्थ—

हित्वा	७.	छोड़कर	ईक्षणा ।	२.	लोचना
गृहान्	४.	घर	अन्वधावत	९.	पीछे-पीछे चल पड़ी
सुतान्	५.	पुत्र (और)	पाण्ड्येशम्	८.	पाण्ड्य नरेश के
भोगान्	६.	विषयभोग को	ज्योत्स्ना	११.	चाँदनी
वैदर्भी	३.	विदर्भ पुत्री	इव	१०.	जैसे
मदिर	१.	मत्त	रजनीकरम् ॥	१२.	चन्द्रमा के (पीछे जाती है)

श्लोकार्थ—मत्तलोचना विदर्भपुत्री घर, पुत्र और विषयभोग को छोड़कर पाण्ड्यनरेश मलयध्वज के पीछे-पीछे चल पड़ी, जैसे चाँदनी चन्द्रमा के पीछे जाती है ॥

पञ्चत्रिंशः श्लोकः

तत्र चन्द्रवसा नाम ताम्रपर्णी वटोदका ।
तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् ॥३५॥

पदच्छेद—

तत्र चन्द्रवसा नाम ताम्रपर्णी वटोदका ।
तत् पुण्यसलिलैः नित्यम् उभयत्र आत्मनः मृजन् ॥

शब्दार्थ—

तत्र	१.	वहाँ	पुण्य	७.	पवित्र
चन्द्रवसा	२.	चन्द्रवसा	सलिलैः	८.	जल में
नाम	५.	नाम की (नदी थी)	नित्यम्	९.	प्रतिदिन (स्नान करके)
ताम्रपर्णी	३.	ताम्रपर्णी (और)	उभयत्र	१०.	अन्तःकरण (और)
वटोदका ।	४.	वटोदका	आत्मनः	११.	अपना शरीर
तत्	६.	(वे) उनके	मृजन् ॥	१२.	निर्मल करते थे

श्लोकार्थ—वहाँ चन्द्रवसा, ताम्रपर्णी और वटोदका नाम की नदियाँ थीं । वे राजर्षि उनके पवित्र जल में प्रतिदिन स्नान करके अन्तःकरण और अपना शरीर निर्मल करते थे ॥

षट्त्रिंशः श्लोकः

कन्दाष्टिभिर्मूलफलैः पुष्पपर्णैस्तृणोदकैः ।
वर्तमानः शनैर्गात्रकर्शनं तप आस्थितः ॥३६॥

पदच्छेद—

कन्द अष्टिभिः मूल फलैः पुष्पपर्णैः तृणउदकैः ।
वर्तमानः शनैः गात्र कर्शनम् तपः आस्थितः ॥

शब्दार्थ—

कन्द	१.	(वे) कन्द	उदकैः ।	८.	जल से
अष्टिभिः	२.	बीज	वर्तमानः	९.	आहार करके
मूल	३.	मूल	शनैः	१३.	धीरे-धीरे
फलैः	४.	फल	गात्र	१२.	उनका शरीर
पुष्प	५.	पुष्प	कर्शनम्	१४.	सूख गया
पर्णैः	६.	पत्ते	तपः	१०.	तपस्या में
तृण	७.	घास (और)	आस्थितः ॥	११.	स्थित थे (जिससे)

श्लोकार्थ—वे कन्द, बीज, मूल, फल, पुष्प, पत्ते, घास और जल से आहार करके तपस्या में स्थित रहते थे । जिससे उनका शरीर धीरे-धीरे सूख गया ॥

सप्तत्रिंशः श्लोकः

शीतोष्णवातवर्षाणि क्षुत्पिपासे प्रियाप्रिये ।
सुखदुःखे इति द्वन्द्वान्यजयत्समदर्शनः ॥३७॥

पदच्छेद—

शीत उष्ण वात वर्षाणि क्षुत् पिपासे प्रिय अप्रिये ।
सुख दुःख इति द्वन्द्वानि अजयत् समदर्शनः ॥

शब्दार्थ—

शीत	२.	सर्दी	अप्रिये ।	९.	अप्रिय (और)
उष्ण	३.	गर्मी	सुख	१०.	सुख
वात	४.	हवा	दुःखे	११.	दुःख
वर्षाणि	५.	वर्षा	इति	१२.	इस प्रकार
क्षुत्	६.	भूख	द्वन्द्वानि	१३.	सारे द्वन्द्वों को
पिपासे	७.	प्यास	अजयत्	१४.	वश में कर लिया
प्रिय	८.	प्रिय	समदर्शनः ॥	१	समदर्शी राजर्षि मलयध्वज ने

श्लोकार्थ—समदर्शी राजर्षि मलयध्वज ने सर्दी, गर्मी, हवा, वर्षा, भूख, प्यास, प्रिय, अप्रिय, सुख और दुःख इस प्रकार सारे द्वन्द्वों को वश में कर लिया ॥

अष्टात्रिंशः श्लोकः

तपसा विद्यया पक्वकषायो नियमैर्यमैः ।
युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः ॥३८॥

पदच्छेद—

तपसा विद्यया पक्व कषायः नियमैः यमैः ।
युयुजे ब्रह्मणि आत्मानम् विजित अक्ष अनिल आशयः ॥

शब्दार्थ—

तपसा	१.	तपस्या (और)	युयुजे	१३.	करने लगे
विद्यया	२.	उपासना से (उनकी)	ब्रह्मणि	१२.	ब्रह्मभाव का दर्शन
पक्व	४.	जल गई थी	आत्मानम्	११.	आत्मा में
कषायः	३.	कामादि वासनायें	विजित	८.	वश में कर लिया
नियमैः	१०.	नियम के द्वारा	अक्ष	५.	उन्होंने इन्द्रियाँ
यमैः ।	९.	यम और	अनिल	६.	प्राण और
			आशयः ॥	७.	मन (को)

श्लोकार्थ—तपस्या और उपासना से उनकी कामादि वासनायें जल गई थी । उन्होंने इन्द्रियों, प्राणों और मन को वश में कर लिया तथा यम और नियम के द्वारा आत्मा में ब्रह्मभाव का दर्शन करने लगे ॥

एकोनचत्वारिंशः श्लोकः

आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः ।
वासुदेवे भगवति नान्यद्वेदोद्वहन् रतिम् ॥३९॥

पदच्छेद—

आस्ते स्थाणुः इव एकत्र दिव्यम् वर्ष शतम् स्थिरः ।
वासुदेवे भगवति न अन्यत् वेद उद्वहन् रतिम् ॥

शब्दार्थ—

आस्ते	८.	स्थित थे	वासुदेवे	१०.	वासुदेव में
स्थाणुः	१.	सूखे वृक्ष के	भगवति	९	भगवान्
इव	२.	समान (वे)	न	१४.	नहीं
एकत्र	६.	एक जगह	अन्यत्	१३.	उन्हें देहादि का
दिव्यम्	४.	दिव्य	वेद	१५.	ज्ञान रहा
वर्ष	५.	वर्षों तक	उद्वहन्	१२.	रहने के कारण
शतम्	३.	एक सौ	रतिम् ॥	११.	प्रेम
स्थिरः ।	७.	निश्चलभाव से			

श्लोकार्थ—सूखे वृक्ष के समान वे एक सौ दिव्य वर्षों तक एक जगह निश्चल भाव से स्थित थे। भगवान् वासुदेव में प्रेम रहने के कारण उन्हें देहादि का ज्ञान नहीं रहा ॥

चत्वारिंशः श्लोकः

स व्यापकतयाऽऽत्मानं व्यतिरिक्ततयाऽऽत्मनि ।
विद्वान् स्वप्न इवामर्शसाक्षिणं विरराम ह ॥४०॥

पदच्छेद—

सः व्यापक तया आत्मानम् व्यतिरिक्त तया आत्मनि ।
विद्वान् स्वप्न इव आमर्श साक्षिणम् विरराम ह ॥

शब्दार्थ—

सः	१.	राजर्षिमलयध्वज (अपनी)	स्वप्न	८.	स्वप्न में (भी)
व्यापकतया	१०.	(उसी प्रकार उस) व्यापक से	इव	७.	जैसे
आत्मानम्	५	परमात्मा का	आमर्श	३.	अन्तःकरण के
व्यतिरिक्ततया	११.	भिन्न देहादि के ज्ञान से	साक्षिणम्	४.	प्रकाशक
आत्मनि।	२.	आत्मा में	विरराम	१२	उदासीन हो गये
विद्वान्	६.	दर्शन करने लगे	ह ॥	९.	आत्मा का ज्ञान रहता है

श्लोकार्थ—राजर्षि मलयध्वज अपनी आत्मा में अन्तःकरण के प्रकाशक परमात्मा का दर्शन करने लगे। जैसे स्वप्न में भी आत्मा का ज्ञान रहता है उसी प्रकार उस व्यापक से भिन्न देहादि के ज्ञान से उदासीन हो गये ॥

एकचत्वारिंशः श्लोकः

साक्षाद्भगवतोक्तेन गुरुणा हरिणा नृप।
विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखम् ॥४१॥

पदच्छेद—

साक्षात् भगवता उक्तेन गुरुणा हरिणा नृप।
विशुद्ध ज्ञान दीपेन स्फुरता विश्वतो मुखम् ॥

शब्दार्थ—

साक्षात्	३.	साक्षात्	विशुद्ध	१०.	निर्मल
भगवता	४	भगवान्	ज्ञान	११	ज्ञान
उक्तेन	६.	उपदेश से मिली	दीपेन	१२.	ज्योति (मे वह ज्योति मिल गई)
गुरुणा	२.	जगद् गुरु	स्फुरता	९.	देदीप्यमान
हरिणा	५.	श्री हरि के	विश्वतो	७.	सभी
नृप।	१.	हे राजन्! (उन्हें)	मुखम् ॥	८.	दिशाओं में

श्लोकार्थ—हे राजन्! उन्हें जगद्गुरु साक्षात् भगवान् श्री हरि के आदेश से मिली सभी दिशाओं में देदीप्यमान निर्मल ज्ञान-ज्योति से वह ज्योति मिल गई ॥

द्वाचत्वारिंशः श्लोकः

परे ब्रह्मणि चात्मानं परं ब्रह्म तथाऽऽत्मनि।
वीक्षमाणो विहायेक्षामस्मादुपरराम ह ॥४२॥

पदच्छेद—

परे ब्रह्मणि च आत्मानम् परम् ब्रह्म तथा आत्मनि।
वीक्षमाणः विहाय ईक्षाम् अस्मात् उपरराम ह ॥

शब्दार्थ—

परे	१.	(इस प्रकार वे) पर	आत्मनि।	५.	अपने में
ब्रह्मणि	२.	ब्रह्म में	वीक्षमाणः	८.	दर्शन करते हुये
च	४.	और	विहाय	११.	छोड़कर
आत्मानम्	३.	अपने को	ईक्षाम्	१०.	देखने की भी इच्छा
परम्	६.	परम	अस्मात्	१२.	इस संसार से
ब्रह्म	७.	ब्रह्म का	उपरराम	१४.	शान्त हो गये
तथा	९.	तथा (अन्त में)	ह ॥	१३.	सदा के लिये

श्लोकार्थ—इस प्रकार वे पर ब्रह्म में अपने को और अपने में परम ब्रह्म का दर्शन करने लगे तथा अन्त में देखने की भी इच्छा छोड़कर इस संसार से सदा के लिये शान्त हो गये ॥

त्रिचत्वारिंश श्लोकः

पतिं परमधर्मज्ञं वैदर्भी मलयध्वजम् ।
प्रेम्णा पर्यचरद्धित्वा भोगान् सा पतिदेवता ॥४३॥

पदच्छेद—

पतिम् परमधर्मज्ञं वैदर्भी मलयध्वजम् ।
प्रेम्णा पर्यचरत् हित्वा भोगान् सा पति देवता ॥

शब्दार्थ—

पतिम्	९.	पति	पर्यचरत्	१२.	सेवा की (थी)
परम	७.	अपने महान्	हित्वा	६.	छोड़कर
धर्मज्ञम्	८	धार्मिक	भोगान्	५.	विषयों का भोग
वैदर्भी	४.	विदर्भ पुत्री ने	सा	३.	उस
मलयध्वजम् ।	१०.	राजा मलयध्वज की	पति	१.	पति को
प्रेम्णा	११.	प्रेम से	देवता ॥	२.	देवता मानने वाली

श्लोकार्थ—पति को देवता मानने वाली उस विदर्भ-पुत्री ने विषयों का भोग छोड़कर अपने महान् धार्मिक पति राजा मलयध्वज की प्रेम से सेवा की थी ॥

चतुश्चत्वारिंशः श्लोकः

चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा ।
बभावुपपतिं शान्ता शिखा शान्तमिवानलम् ॥४४॥

पदच्छेद—

चीरवासाः व्रतक्षामा वेणीभूत शिरोरुहा ।
बभौ उपपतिम् शान्ता शिखा शान्तम् इव अनलम् ॥

शब्दार्थ—

चीर	१.	वह चीर	बभौ	१३.	सुशोभित हो रही थी
वासाः	२.	वस्त्र पहनती थी	उपपतिम्	११.	पति के समीप
व्रत	३.	व्रत करने से	शान्ता	१२.	शान्तभाव से
क्षामा	४.	दुर्बल हो गई थी	शिखा	९.	शिखा के
वेणीभूत	६.	लटें पड़ गई थीं (इस प्रकार)	शान्तम्	७.	शान्त भाव को प्राप्त
शिरोरुहा ।	५.	उसके सिर के बालों में	इव	१०.	समान वह
			अनलम् ॥	८.	अग्नि की

श्लोकार्थ—वह चीर वस्त्र पहनती थी, व्रत करने से दुर्बल हो गई थी, उसके सिर के बालों में लटें पड़ गई थीं। इस प्रकार शान्तभाव को प्राप्त अग्नि की शिखा के समान वह पति के समीप शान्तभाव से सुशोभित हो रही थी ॥

पञ्चचत्वारिंशः श्लोकः

अजानती प्रियतमं यदोपरतमङ्गना ।
सुस्थिरासनमासाद्य यथापूर्वमुपाचरत् ॥४५॥

पदच्छेद—

अजानती प्रियतमम् यदा उपरतम् अङ्गना ।
सुस्थिर आसनम् आसाद्य यथापूर्वम् उपाचरत् ॥

शब्दार्थ—

अजानती	५.	नहीं जानती थी (अतः)	सुस्थिर	६.	निश्चल भाव से
प्रियतमम्	३.	अपने पति को	आसनम्	७.	बैठे हुये
यदा	१.	अभी	आसाद्य	८.	उनके पास जाकर
उपरतम्	४.	मरा हुआ	यथा पूर्वम्	९.	पहले जैसी
अङ्गना ।	२.	वह विदर्भ पुत्री	उपाचरत् ॥	१०.	सेवा करने लगी

श्लोकार्थ—वह विदर्भ पुत्री अपने पति को मरा हुआ नहीं जानती थी । अतः निश्चलभाव से बैठे हुये उनके पास जाकर पहले जैसी सेवा करने लगी ॥

षट्चत्वारिंशः श्लोकः

यदा नोपलभेताङ्घ्रावूष्माणं पत्युरर्चती ।
आसीत्संविग्नहृदया यूथभ्रष्टा मृगी यथा ॥४६॥

पदच्छेद—

यदा न उपलभेत अङ्घ्रौ ऊष्माणम् पत्युः अर्चती ।
आसीत् संविग्न हृदया यूथ भ्रष्टा मृगी यथा ॥

शब्दार्थ—

यदा	१.	जब	आसीत्	१४.	हो गई
न	६.	नहीं	संविग्न	१३.	बहुत व्याकुल
उपलभेत	७.	देखी (तब)	हृदया	१२.	चित्त में
अङ्घ्रौ	४.	चरणों में	यूथ	८.	झुण्ड से
ऊष्माणम्	५.	गर्मी	भ्रष्टा	९.	बिछुड़ी हुई
पत्युः	३.	पति के	मृगी	१०.	हरिणी के
अर्चंति ।	२.	सेवा करती हुई	यथा ॥	११.	समान

श्लोकार्थ—जब सेवा करती हुई पति के चरणों में गर्मी नहीं देखी तब झुण्ड से बिछुड़ी हुई हरिणी के समान चित्त में बहुत व्याकुल हो गई ॥

सप्तचत्वारिंशः श्लोकः

आत्मानं शोचती दीनमबन्धुं विक्लवाश्रुभिः ।
स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा ॥४७॥

पदच्छेद —

आत्मानम् शोचती दीनम् अबन्धुम् विक्लव अश्रुभिः ।
स्तनौ आसिच्य विपिने सुस्वरम् प्ररुरोद सा ॥

शब्दार्थ—

आत्मानम्	३.	अपने को	स्तनौ	९.	स्तनो को
शोचती	६.	शोक करती हुई (तथा)	आसिच्य	१०.	भिगोती हुई
दीनम्	५.	अनाथ (समझ कर)	विपिने	२.	उस वन में
अबन्धुम्	४.	असहाय (वे)	सुस्वरम्	११.	यह कह कर
विक्लव	७	विकलता के	प्ररुरोद	१२.	रोने लगी
अश्रुभिः ।	८.	आँसुओं से	सा ॥	१.	वह

श्लोकार्थ—वह उस वन में अपने को असहाय व अनाथ समझ कर शोक करती हुई तथा विकलता के आँसुओं से स्तनों को भिगोती हुई यह कह कर रोने लगी ॥

अष्टचत्वारिंशः श्लोकः

उत्तिष्ठोत्तिष्ठ राजर्षे इमामुदधिमेखलाम् ।
दस्युभ्यः क्षत्रबन्धुभ्यो बिभ्यतीं पातुमर्हसि ॥४८॥

पदच्छेद—

उत्तिष्ठ उत्तिष्ठ राजर्षे इमाम् उदधि मेखलाम् ।
दस्युभ्यः क्षत्रबन्धुभ्यः बिभ्यतीम् पातुम् अर्हसि ॥

शब्दार्थ—

उत्तिष्ठ	२.	उठिये	दस्युभ्यः	६.	लुटेरों (और)
उत्तिष्ठ	३.	उठिये	क्षत्रबन्धुभ्	७.	अधार्मिक क्षत्रियों से
राजर्षे	१.	हे राजर्षे	बिभ्यतीम्	८	डरती हुई
इमाम्	९.	इस पृथ्वी की	पातुम्	१०.	रक्षा
उदधि	४.	समुद्र से	अर्हसि ॥	११.	करें
मेखलाम् ।	५.	घिरी हुई			

श्लोकार्थ --हे राजर्षि ! उठिये-उठिये समुद्र से घिरी हुई तथा लुटेरों और अधार्मिक क्षत्रियों से डरती हुई इस पृथ्वी की रक्षा करें ॥

एकोनपञ्चाशः श्लोकः

एवं विलपती बाला विपिनेऽनुगता पतिम् ।
पतिता पादयोर्भर्तु रुदत्यश्रूण्यवर्तयत् ॥४९॥

पदच्छेद—

एवम् विलपती बाला विपिने अनुगता पतिम् ।
पतिता पादयोः भर्तुः रुदती अश्रूणि अवर्तयत् ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	पतिता	९.	गिर कर
विलपती	६.	विलाप करने लगी	पादयोः	८.	चरणों में
बाला	५.	वह अबला	भर्तुः	७.	पति के
विपिने	३.	वन में	रुदती	१०.	रोती हुई
अनुगता	४.	आई हुई	अश्रूणि	११.	आँसुओं की धारा
पतिम् ।	२.	पति के साथ	अवर्तयत् ॥	१२.	बहाने लगी

श्लोकार्थ—इस प्रकार पति के साथ वन में आई हुई वह अबला विलाप करने लगी तथा पति के चरणों में गिरकर रोती हुई आँसुओं की धारा बहाने लगी ॥

पञ्चाशः श्लोकः

चितिं दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ।
आदीप्य चानुमरणे विलपन्ती मनो दधे ॥५०॥

पदच्छेद—

चितिम् दारुमयीम् चित्वा तस्याम् पत्युः कलेवरम् ।
आदीप्य च अनुमरणे विलपन्ती मनः दधे ॥

शब्दार्थ—

चितिम्	२.	चिता	आदीप्य	८.	आग लगा कर
दारुमयीं	१.	लकड़ी से	च	७.	और (उसमें)
चित्वा	३.	बनाकर	अनुमरणे	११.	सती होने का
तस्याम्	४.	उस पर	विलपन्ती	९.	विलाप करती हुई
पत्युः	५.	पति के	मनः	१०.	मन में
कलेवरम् ।	६.	शव को (रख दिया)	दधे ॥	१२.	निश्चय किया

श्लोकार्थ—लकड़ी से चिता बना कर उस पर पति के शव को रख दिया और उसमें आग लगाकर विलाप करती हुई मन में सती होने का निश्चय किया ॥

एकपञ्चाशः श्लोकः

तत्र पूर्वतरः कश्चित्सखा ब्राह्मण आत्मवान् ।
सान्त्वयन् वल्गुना साम्ना तामाह रुदतीं प्रभो ॥५१॥

पदच्छेद—

तत्र पूर्वतरः कश्चित् सखा ब्राह्मणः आत्मवान् ।
सान्त्वयन् वल्गुना साम्ना ताम् आह रुदतीम् प्रभो ॥

शब्दार्थ—

तत्र	२.	वहाँ पर	सान्त्वयन्	१०.	समझाते हुये
पूर्वतरः	४.	पहले का	वल्गुना	८.	मनोहर
कश्चित्	३.	कोई	साम्ना	९.	वचनों से
सखा	५.	मित्र	ताम्	१२.	उस अबला को
ब्राह्मणः	७.	ब्राह्मण (आया और वह)	आह	१३.	बोला
आत्मवान् ।	६.	आत्मज्ञानी	रुदतीम्	११.	रोती हुई
			प्रभो ॥	१.	हे राजन् !

श्लोकार्थ—हे राजन् ! वहाँ पर उसका कोई पहले का मित्र आत्मज्ञानी ब्राह्मण आया और वह मनोहर वचनों से समझाते हुए रोती हुई उस अबला से बोला ॥

द्विपञ्चाशः श्लोकः

ब्राह्मण उवाच—का त्वं कस्यासि को वायं शयानो यस्य शोचसि ।
जानासि किं सखायं मां येनाग्रे विचचर्थ ह ॥५२॥

पदच्छेद—

का त्वम् कस्य असि कः वा अयम् शयानः यस्य शोचसि ।
जानासि किम् सखायम् माम् येन अग्रे विचचर्थ ह ॥

शब्दार्थ—

का	२.	कौन	जानासि	१२.	जानती हो
त्वम्	१.	तुम	किम्	९.	क्या
कस्य असि	३.	किसकी पुत्री हो	सखायम्	११.	मित्र को
कः	८.	कौन (है)	माम्	१०.	मुझ
वा अयम्	४.	तथा यह	येन	१४.	जिसके साथ
शयानः	५.	सोया हुआ	अग्रे	१५.	पहले
यस्य	६.	जिसके प्रति	विचचर्थ	१६.	विचरण करती
शोचसि ।	७.	शोक कर रही हो	ह ॥	१७.	थी

श्लोकार्थ—तुम कौन हो किसकी पुत्री हो तथा यह सोया हुआ, जिसके प्रति शोक कर रही हो, कौन है ? क्या मुझ मित्र को जानती हो ? जिसके साथ पहले विचरण करती थी ॥

त्रिपञ्चाशः श्लोकः

अपि स्मरसि चात्मानमविज्ञातसखं सखे।
हित्वा मां पदमन्विच्छन् भौमभोगरतो गतः ॥५३॥

पदच्छेद—

अपि स्मरसि च आत्मानम् अविज्ञात सखम् सखे।
हित्वा माम् पदम् अन्विच्छन् भौम भोगरतः गतः ॥

शब्दार्थ—

अपि	२.	क्या	हित्वा	१४.	छोड़ कर
स्मरसि	६.	स्मरण है	माम्	१३.	मुझे
च	७.	जो तुम	पदम्	११.	स्थान
आत्मानम्	४.	अपने	अन्विच्छन्	१२.	खोजते हुये
अविज्ञात	३.	अविज्ञात नाम के	भौम	८.	पृथ्वी के
सखम्	५.	मित्र का	भोगरतः	९.	विषय भोगों में
सखे।	१.	हे मित्र तुम्हें	गतः ॥	१०.	आसक्त होकर
				१५.	चले गये थे

श्लोकार्थ—हे मित्र ! तुम्हें क्या अविज्ञात नाम के अपने मित्र का स्मरण है ? जो तुम पृथ्वी के विषय-भोगों में आसक्त होकर स्थान खोजते हुये मुझे छोड़कर चले गये थे ॥

चतुःपञ्चाशः श्लोकः

हंसावहं च त्वं चार्य सखायौ मानसायनौ।
अभूतामन्तरा वौकः सहस्रपरिवत्सरान् ॥५४॥

पदच्छेद—

हंसौ अहम् च त्वम् च आर्य सखायौ मानस अयनौ।
अभूताम् अन्तरा वा ओकः सहस्र परिवत्सरान् ॥

शब्दार्थ—

हंसौ	७.	हंस थे	अयनौ।	५.	रहने वाले
अहम्	२.	मैं	अभूताम्	१४.	साथ-साथ रहे
च त्वम्	३.	और तुम	अन्तरा	१०.	बिना
च	८.	तथा	वा	११.	ही वहाँ
आर्य	१.	हे आर्य	ओकः	९.	घर के
सखायौ	६.	एक दूसरे के मित्र	सहस्र	१२.	हजारों
मानस	४.	मानसरोवर में	परिवत्सरान् ॥	१३.	वर्षों तक

श्लोकार्थ—हे आर्य ! मैं और तुम मान सरोवर में रहने वाले एक दूसरे के मित्र हंस थे। तथा घर के बिना ही वहाँ हजारों वर्षों तक साथ-साथ रहे ॥

पञ्चपञ्चाशः श्लोकः

स त्वं विहाय मां बन्धो गतो ग्राम्यमतिर्महीम् ।
विचरन् पदमद्राक्षीः कयाचिन्निर्मितं स्त्रिया ॥५५॥

पदच्छेद—

स: त्वम् विहाय माम् बन्धो गतः ग्राम्य मतिः महीम् ।
विचरन् पदम् अद्राक्षीः कयाचित् निर्मितम् स्त्रिया ॥

शब्दार्थ—

स: त्वम्	२.	वह तुम	महीम् ।	८.	पृथ्वी पर
विहाय	४.	छोड़कर	विचरन्	९.	घूमते हुये (तुमने)
माम्	३.	मुझे	पदम्	१०.	एक स्थान
बन्धो	१.	हे मित्र	अद्राक्षीः	१४.	देखा था
गतः	५.	चले गये	कयाचित्	११.	किसी
ग्राम्य	६.	विषयों में (तुम्हारी)	निर्मितम्	१३.	बनाया गया
मतिः	७	आसक्ति होने से	स्त्रिया ।	१२.	स्त्री के द्वारा

श्लोकार्थ—हे मित्र ! वह तुम मुझे छोड़कर चले गये । विषयों में तुम्हारी आसक्ति होने से पृथ्वी पर घूमते हुये तुमने एक स्थान किसी स्त्री के द्वारा बनाया गया देखा था ॥

षट्पञ्चाशः श्लोकः

पञ्चारामं नवद्वारमेकपालं त्रिकोष्ठकम् ।
षट्कुलं पञ्चविपणं पञ्चप्रकृति स्त्रीधवम् ॥५६॥

पदच्छेद—

पञ्च आरामम् नव द्वारम् एक पालम् त्रिकोष्ठकम् ।
षट् कुलम् पञ्चविपणम् पञ्च प्रकृति स्त्रीधवम् ॥

शब्दार्थ—

पञ्च	१.	उस पुरी में पाँच	षट्	८.	छः
आरामम्	२.	बगीचे	कुलम्	९.	वैश्य कुल
नव	३.	नौ	पञ्च	१०.	पाँच
द्वारम्	४.	दरवाजे थे	विपणम्	११.	बाजार
एक	५.	एक	पञ्च	१२.	पाँच
पालम्	६.	रक्षक	प्रकृति	१३.	कारण (और)
त्रिकोष्ठकम् ।	७.	तीन परकोटे	स्त्री	१५.	एक स्त्री थी
			धवम् ॥	१४.	उसकी स्वामिनी

श्लोकार्थ—उस पुरी में पाँच बगीचे नौ दरवाजे थे । एक रक्षक, तीन परकोटे, छः वैश्य कुल, पाँच बाजार, पांच कारण और उसकी स्वामिनी एक स्त्री थी ॥

सप्तपञ्चाशः श्लोकः

पञ्चेन्द्रियार्था आरामा द्वारः प्राणा नव प्रभो ।
तेजोऽबन्नानि कोष्ठानि कुलमिन्द्रियसंग्रहः ॥५७॥

पदच्छेद—

पञ्च इन्द्रिय अर्थाः आरामाः द्वारः प्राणाः नव प्रभो ।
तेजः अप् अन्नानि कोष्ठानि कुलम् इन्द्रिय संग्रहः ॥

शब्दार्थ—

पञ्च	२.	पांच	प्रभो ।	१.	हे महाराज
इन्द्रिय	३.	इन्द्रियों के	तेजः अप्	९.	तेज जल
अर्थाः	४.	विषय ही	अन्नानि	१०.	अन्न (ये)
आरामाः	५.	बगीचे हैं	कोष्ठानि	११.	परकोटे हैं
द्वारः	८.	दरवाजे हैं	कुलम्	१४.	वैश्य कुल हैं
प्राणः	७.	प्राण हैं	इन्द्रिय	१२.	ज्ञानेन्द्रिय और मन का
नव	६.	नव	संग्रह ॥	१३.	समूह ही

श्लोकार्थ—हे महाराज ! पाँच इन्द्रियों के विषय ही बगीचे हैं। नव प्राण दरवाजे हैं। तेज, जल, अन्न ये परकोटे हैं। ज्ञानेन्द्रिय और मन का समूह ही वैश्य कुल है ॥

अष्टपञ्चाशः श्लोकः

विपणस्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया ।
शक्त्यधीशः पुमांस्त्वत्र प्रविष्टो नावबुध्यते ॥५८॥

पदच्छेद—

विपणः तु क्रिया शक्तिः भूत प्रकृतिः अव्यया ।
शक्ति अधीशः पुमान् तु अत्र प्रविष्टः न अवबुध्यते ॥

शब्दार्थ—

विपणः	३.	बाजार है	शक्ति	८.	बुद्धि
तु	४.	तथा	अधीशः	९.	स्वामिनी है
क्रिया	१.	कर्म	पुमान्	१३.	पुरुष (अपने को)
शक्तिः	२.	इन्द्रियां ही	तु	१०.	तथा
भूत	५.	पंच महाभूत	अत्र	११.	इस पुरी में
प्रकृतिः	७.	कारण हैं	प्रविष्टः	१२.	प्रवेश करके
अव्यया ।	६.	अविनाशी	न अवबुध्यते ॥	१४.	भूल जाता है

श्लोकार्थ—कर्मेन्द्रियाँ ही बाजार है; तथा पंच महाभूत अविनाशी कारण है। बुद्धि स्वामिनी है तथा इस पुरी में प्रवेश करके पुरुष अपने को भूल जाता है ॥

एकोनषष्टितमः श्लोकः

तस्मिंस्त्वं रामया स्पृष्टो रममाणोऽश्रुतस्मृतिः ।
तत्सङ्गादीदृशीं प्राप्तो दशां पापीयसीं प्रभो ॥५९॥

पदच्छेद—

तस्मिन् त्वम् रामया स्पृष्टः रममाणः अश्रुत स्मृतिः ।
तत्सङ्गादीदृशीं प्राप्तः दशां पापीयसीम् प्रभो ॥

शब्दार्थ—

तस्मिन्	२. उस पुरी में	तत्	९. उसी के
त्वम्	३. तुम	सङ्गात्	१०. संङ्ग से
रामया	४. स्त्री के	ईदृशीम्	१४. इस प्रकार
स्पृष्टः	५. वश में होकर	प्राप्तः	१४. प्राप्त हुये हो
रममाणः	६. रमण करते हुये	दशाम्	१३. दुर्दशा को
अश्रुत	८. भूल गये थे	पापीयसीम्	१२. कष्टमयी
स्मृतिः ।	७. अपने स्वरूप को	प्रभो ॥	१. हे महाराज

श्लोकार्थ—हे महाराज ! उस पुरी में तुम स्त्री के वश में होकर रमण करते हुये अपने स्वरूप को भूल गये थे । उसी के सङ्ग से इस प्रकार कष्टमयी दुर्दशा को प्राप्त हुये हो ॥

षष्टितमः श्लोकः

न त्वं विदर्भदुहिता नायं वीरः सुहृत्तव ।
न पतिस्त्वं पुरञ्जन्या रुद्धो नवमुखे यया ॥६०॥

पदच्छेद—

न त्वम् विदर्भ दुहिता नायम् वीरः सुहृत् तव ।
न पतिः त्वम् पुरञ्जन्याः रुद्धः नव मुखे यया ॥

शब्दार्थ—

न त्वम्	१. नहीं तुम	न	९. नहीं
विदर्भ	२. विदर्भ राज की	पतिः	१२. पति थे
दुहिता	३. पुत्री हो	त्वम्	१०. तुम
न	४. नहीं	पुरञ्जन्याः	११. पुरञ्जनी के
अयम्	५. यह	रुद्धः	१६. रोक रखा था
वीरः	६. वीर (मलयध्वज)	नव	१४. नौ
सुहृत्	८. पति है	मुखे	१५. दरवाजों वाली पुरी में
तव ।	७. तुम्हारा	यया ॥	१३. जिसने तुम्हें

श्लोकार्थ—नहीं तुम विदर्भ राज की पुत्री हो । नहीं यह वीर मलयध्वज तुम्हारा पति है । नहीं तुम पुरञ्जनी के पति थे, जिसने तुम्हें नौ दरवाजों वाली पुरी में रोक रखा था ॥

एकषष्टितमः श्लोकः

माया ह्येषा मया सृष्टा यत्पुमांसं स्त्रियं सतीम् ।
मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिम् ॥६१॥

पदच्छेद— माया हि एषा मया सृष्टा यत् पुमांसम् स्त्रियम् सतीम् ।
मन्यसे न उभयम् यद् वै हंसो पश्य आवयोः गतिम् ॥

शब्दार्थ—

माया	४.	माया है	मन्यसे	९.	मानते हो (किन्तु)
हि	३.	ही	न	११.	नहीं हो
एषा	१.	यह	उभयम्	१०.	दोनों ही
मया सृष्टा	२.	मेरे द्वारा रचित	यद् वै	१२.	क्योंकि (हम दोनों ही)
यत्	५.	जो तुम अपने को	हंसो	१३.	हस हैं
पुमांसम्	६.	पुरुष (और)	पश्य	१६.	समझो
स्त्रियः	८.	स्त्री	आवयोः	१४.	हम दोनों का
सतीम् ।	७.	श्रेष्ठ	गतिम् ॥	१५.	स्वरूप

श्लोकार्थ—यह मेरे द्वारा रचित ही माया है । जो तुम अपने को पुरुष और श्रेष्ठ स्त्री मानते हो । किन्तु दोनों ही नहीं हो; क्योंकि हम दोनों ही हंस हैं । हम दोनों का स्वरूप समझो ॥

द्विषष्टितमः श्लोकः

अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः ।
न नौ पश्यन्ति कवयश्छिद्रं जातु मनागपि ॥६२॥

पदच्छेद— अहम् भवान् न च अन्यः त्वम् एव अहम् विचक्ष्व भोः ।
न नौ पश्यन्ति कवयः छिद्रम् जातु मनाक् अपि ॥

शब्दार्थ—

अहम्	१.	मैं	भोः ।	९.	ऐ मित्र
भवान्	३.	आप	न	१७.	नहीं
न	५.	नहीं (हैं)	नौ	१२.	हम दोनों में
च	२.	और	पश्यन्ति	१८.	देखते हैं
अन्यः	४.	भिन्न	कवयः	११.	ज्ञानी जन
त्वम्	७.	तुम हो और	छिद्रम्	१६.	भेद
त्वम् एव	८.	तुम ही (मैं हूँ)	जातु	१३.	कभी
अहम्	६.	मैं	मनाक्	१४.	थोड़ा
विचक्ष्व	१०.	ऐसा समझो	अपि ॥	१५.	भी

श्लोकार्थ—मैं और आप भिन्न नहीं हैं । मैं तुम हो और तुम ही मैं हूं । ऐ मित्र ! ऐसा समझो । ज्ञानी जन हम दोनों में कभी थोड़ा भी भेद नहीं देखते हैं ॥

त्रिषष्टितमः श्लोकः

यथा पुरुष आत्मानमेकमादर्शचक्षुषोः
द्विधाभूतमवेक्षेत तथैवान्तरमावयोः ॥६३॥

पदच्छेद—

यथा पुरुषः आत्मानम् एकम् आदर्श चक्षुषोः ।
द्विधा भूतम् अवेक्षेत तथैव अन्तरम् आवयोः ॥

शब्दार्थ—

यथा	१.	जैसे	द्विधा	७.	दो
पुरुषः	२.	पुरुष	भूतम्	८.	प्रकार का
आत्मानम्	४.	अपनी छाया को	अवेक्षेत	९.	देखता है
एकम्	३.	एक	तथैव	१०.	उसी प्रकार
आदर्श	५.	दर्पण में (और)	अन्तरम्	१२.	भेद है
चक्षुषोः ।	६.	दूसरे के नेत्र में	आवयोः ॥	११.	हम दोनों में

श्लोकार्थ—जैसे पुरुष एक अपनी छाया को दर्पण में और दूसरे के नेत्र में दो प्रकार का देखता है । उसी प्रकार हम दोनों में भेद है ॥

चतुःषष्टितमः श्लोकः

एवं स मानसो हंसो हंसेन प्रतिबोधितः ।
स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिम् ॥६४॥

पदच्छेद—

एवम् सः मानसः हंसः हंसेन प्रतिबोधितः ।
स्वस्थः तद् व्यभि चारेण नष्टाम् आप पुनः स्मृतिम् ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	स्वस्थः	७.	अपने में स्थित होकर
सः	३.	उस	तद्	८.	ईश्वर के
मानसः	४.	मन के	व्यभिचारेण	९.	वियोग से
हंसः	५.	हंस (जीव को)	नष्टाम्	१०.	खोई हुई
हंसेन	२.	ईश्वर ने	आप	१३.	प्राप्त कर लिया
प्रतिबोधितः ॥	६.	समझाया (जिससे वह)	पुनः	१२.	फिर
			स्मृतिम् ॥	११.	स्मरण शक्ति को

श्लोकार्थ—इस प्रकार ईश्वर ने उस मन के हंस जीव को समझाया । जिससे वह अपने में स्थित होकर ईश्वर के वियोग से खोई हुई स्मरण शक्ति को प्राप्त कर लिया ॥

पञ्चषष्टितमः श्लोकः

बर्हिष्मन्नेतदध्यात्मं पारोक्ष्येण प्रदर्शितम् ।
यत्परोक्षप्रियो देवो भगवान् विश्वभावनः ॥६५॥

पदच्छेद—

बर्हिष्मन् एतद् अध्यात्मम् पारोक्ष्येण प्रदर्शितम् ।
यत् परोक्षप्रियः देवः भगवान् विश्व भावनः ॥

शब्दार्थ—

बर्हिष्मन्	१. हे प्राचीनबर्हि		परोक्ष	११.	परोक्ष वर्णन के
एतद्	२. इस		प्रियः	१२.	प्रेमी हैं
अध्यात्मम्	३. आत्मज्ञान को		देवः	१०.	श्री हरि
पारोक्ष्येण	४. परोक्ष रूप से		भगवान्	९.	भगवान्
प्रदर्शितम् ।	५. तुम्हें बताया		विश्व	७.	संसार के
यत्	६ क्योंकि		भावनः ॥	८.	रचयिता

श्लोकार्थ—हे प्राचीनबर्हि ! इस आत्मज्ञान को परोक्ष रूप से तुम्हें बताया, क्योंकि संसार के रचयिता भगवान् श्री हरि परोक्ष वर्णन के प्रेमी हैं ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे पुरञ्जनोपाख्याने अष्टाविंशः अध्यायः ॥२८॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

चतुर्थः स्कन्धः

एकोनत्रिंशः अध्यायः

प्रथमः श्लोकः

प्राचीनबर्हिरुवाच—भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते ।
कवयस्तद्विजानन्ति न वयं कर्ममोहिताः ॥१॥

पदच्छेद— भगवन् ते वचः अस्माभिः न सम्यग् अवगम्यते ।
कवयः तद् विजानन्ति नः वयम् कर्म मोहिताः ॥

शब्दार्थ—

भगवन्	१.	हे देवर्षे	कवयः	९.	ज्ञानीजन ही
ते	३.	आपकी	तद्	८.	उसे
वचः	४.	बात को	विजानन्ति	१०.	जानते हैं
अस्माभिः	२.	हम	न	१४.	नहीं (जानते है)
न	६.	नहीं	वयम्	१३.	हम लोग (तो)
सम्यग्	५.	भली प्रकार से	कर्म	११.	सांसारिक कर्मों से
अवगम्यते ।	७.	समझ पा रहे हैं	मोहिताः ॥	१२.	मोहित

श्लोकार्थ—हे देवर्षे ! हम आपकी बात को भली प्रकार से नहीं समझ पा रहे हैं । उसे ज्ञानीजन ही जानते हैं । सांसारिक कर्मों से मोहित हम लोग तो नहीं जानते हैं ॥

द्वितीयः श्लोकः

नारद उवाच—पुरुषं पुरञ्जनं विद्याद्यद् व्यनक्त्यात्मनः पुरम् ।
एकद्वित्रिचतुष्पादं बहुपादमपादकम् ॥२॥

पदच्छेद— पुरुषम् पुरञ्जनम् विद्यात् यत् व्यनक्ति आत्मनः पुरम् ।
एकद्वि त्रि चतुष्पादम् बहु पादम् अपादकम् ॥

शब्दार्थ—

पुरुषम्	१.	जीव को	एक	६.	एक
पुरञ्जनम्	२.	पुरञ्जन	द्वि	७.	दो
विद्यात्	३.	समझना चाहिये	त्रिः	८.	तीन
यत्	४.	जो	चतुष्पादम्	९.	चार पैर का
व्यनक्ति	१४.	स्वीकार करता है	बहु	१०.	अनेक
आत्मनः	५.	अपने लिये	पादम्	११.	पैर का (या)
पुरम् ।	१३.	शरीर	अपादकम् ॥	१२.	बिना पैर का

श्लोकार्थ—जीव को पुरञ्जन समझना चाहिये जो अपने लिये एक, दो, तीन, चार पैर का, अनेक पैर का या बिना पैर का शरीर स्वीकार करता है ॥

तृतीयः श्लोकः

योऽविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः ।
यन्न विज्ञायते पुम्भिर्नामभिर्वा क्रियागुणैः ॥३॥

पदच्छेद—

यः अविज्ञात आहृतः तस्य पुरुषस्य सखा ईश्वरः ।
यत् न विज्ञायते पुम्भिःनामभिः वा क्रिया गुणैः ॥

शब्दार्थ—

यः	४.	जो	यत्	८.	जिसे
अविज्ञात	५.	अविज्ञात नाम से	न	१४.	नहीं
आहृतः	६.	कहा गया है (वह)	विज्ञायते	१५.	जान सकता है
तस्य	१.	उस	पुम्भिः	९.	जीव
पुरुषस्य	२.	जीव का	नामभिः	१३.	नामों से
सखा	३.	मित्र	वा	१२.	अथवा
ईश्वरः।	७.	ईश्वर है	क्रिया	१०.	कर्म से
			गुणैः ॥	११.	गुणों से

श्लोकार्थ—उस जीव का मित्र जो अविज्ञात नाम से कहा गया है; वह ईश्वर है । जिसे जीव कर्म से गुणों से अथवा नामों से नहीं जान सकता है ॥

चतुर्थः श्लोकः

यदा जिघृक्षन् पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान् ।
नवद्वारं द्विहस्ताङ्घ्रि तत्रामनुत साध्विति ॥४॥

पदच्छेद—

यदा जिघृक्षन् पुरुषः कार्त्स्न्येन प्रकृतेः गुणान् ।
नव द्वारम् द्विहस्त अङ्घ्रि तत्र अमनुत साधु इति ॥

शब्दार्थ—

यदा	१.	जब	द्वारम्	९.	दरवाजों वाले
जिघृक्षन्	६.	भोगना चाहा (तब)	द्विहस्तम्	१०.	दो हाथ (और)
पुरुषः	२.	जीव ने	अङ्घ्रिम्	११.	दो पैर वाले शरीर को
कार्त्स्न्येन	३.	सभी प्रकार के	तत्र	७.	उन शरीरों में
प्रकृतेः	४.	प्रकृति के	अमनुत	१४.	माना
गुणान् ।	५.	विषयों को	साधु	१२.	ठीक है
नव	८.	नौ	इति ॥	१३.	ऐसा

श्लोकार्थ—जब जीव ने सभी प्रकार के प्रकृति के विषयों को भोगना चाहा, तब उन शरीरों में नौ दरवाजे वाले तथा दो हाथ और दो पैर वाले शरीर को ठीक है ऐसा माना ॥

पञ्चमः श्लोकः

बुद्धिं तु प्रमदां विद्यान्ममाहमिति यत्कृतम् ।
यामधिष्ठाय देहेऽस्मिन् पुमान् भुङ्क्तेऽक्षभिर्गुणान् ॥५॥

पदच्छेद—

बुद्धिम् तु प्रमदाम् विद्यात् मम अहम् इति यत् कृतम् ।
याम् अधिष्ठाय देहे अस्मिन् पुमान् भुङ्क्ते अक्षभिः गुणान् ॥

शब्दार्थ—

बुद्धिम्	३.	बुद्धि अथवा माया	याम्	१०.	जिसके
तु	२.	तो	अधिष्ठाय	११.	सहारे
प्रमदाम्	१.	उस स्त्री को	देहे	१३.	शरीर में
विद्यात्	४.	जानना चाहिये	अस्मिन्	१२.	इस
मम	७.	मेरा	पुमान्	१४	जीव
अहम्	६	मैं (और)	भुङ्क्ते	१७.	भोगता है
इति	८.	इस प्रकार का भेद	अक्षभिः	१५.	इन्द्रियों से
यत्	५.	जिसके कारण	गुणान् ॥	१६.	विषयों को
कृतम् ।	९.	होता है (तथा)			

श्लोकार्थ—उस स्त्री को तो बुद्धि अथवा माया जानना चाहिये। जिसके कारण, मैं और मेरा इस प्रकार का भेद होता है। तथा जिसके सहारे इस शरीर में जीव इन्द्रियों के विषयो को भोगता है ॥

षष्ठः श्लोकः

सखाय इन्द्रियगणा ज्ञानं कर्म च यत्कृतम् ।
सख्यस्तद्वृत्तयः प्राणः पञ्चवृत्तिर्यथोरगः ॥६॥

पदच्छेद—

सखायः इन्द्रियगणाः ज्ञानम् कर्म च यत् कृतम् ।
सख्यः तद् वृत्तयः प्राणः पञ्चवृत्तिः यथा उरगः ॥

शब्दार्थ—

सखायः	२.	मित्र है	सख्यः	१०.	सखियाँ हैं
इन्द्रियगणः	१.	इन्द्रिय समूह ही	तद्	८.	उन इन्द्रियों की
ज्ञानम्	४.	ज्ञान	वृत्तयः	९.	शक्तियाँ ही
कर्म	६.	कर्म	प्राणः	१३.	प्राण वायु
च	५.	और	पञ्चवृत्तिः	१२.	पांच वृत्ति वाला
यत्	३.	जिसके द्वारा (जीव)	यथा	११.	तथा
कृतम् ।	७.	करता है	उरगः ॥	१४.	पांच फन वाला सर्प है

श्लोकार्थ—इन्द्रिय समूह ही मित्र है जिसके द्वारा जीव ज्ञान और कर्म करता है। उन इन्द्रियों की शक्तियाँ ही सखियाँ हैं। तथा पाँचवृत्ति वाला प्राण वायु ही पाच फन वाला सर्प है ॥

सप्तमः श्लोकः

बृहद्बलं मनो विद्यादुभयेन्द्रियनायकम् ।
पञ्चालाः पञ्च विषया यन्मध्ये नवखं पुरम् ॥७॥

पदच्छेद—

बृहद् बलम् मनः विद्यात् उभय इन्द्रिय नायकम् ।
पञ्चालाः पञ्च विषयाः यद् मध्ये नवखम् पुरम् ॥

शब्दार्थ—

बृहद्	५.	महान्	पञ्चालाः	१४.	पाञ्चाल देश है
बलम्	६.	बली (ग्यारहवाँ योद्धा)	पञ्च	१२.	शब्दादि पाँच
मनः	४.	मन को	विषयाः	१३.	विषय ही
विद्यात्	७.	समझना चाहिये	यद्	८.	जो (मन)
उभय	१.	ज्ञान और कर्म (दोनों प्रकार की)	मध्ये	११.	बीच में रहता है
इन्द्रिय	२.	इन्द्रियों के	नवखम्	९.	नौ द्वारों वाले
नायकम् ।	३.	नेता	पुरम् ॥	१०.	शरीर के

श्लोकार्थ—ज्ञान और कर्म दोनों प्रकार की इन्द्रियों के नेता मन को महान् बली ग्यारहवाँ योद्धा समझना चाहिये । जो मन नौ द्वारों वाले शरीर के बीच में रहता है । शब्दादि पाँच विषय ही पाञ्चाल देश हैं ॥

अष्टमः श्लोकः

अक्षिणी नासिके कर्णौ मुखं शिश्नगुदाविति ।
द्वे द्वे द्वारौ बहिर्याति यस्तदिन्द्रियसंयुतः ॥८॥

पदच्छेद—

अक्षिणी नासिके कर्णौ मुखम् शिश्न गुदौ इति ।
द्वे द्वे द्वारौ बहिः याति यः तद् इन्द्रिय संयुतः ॥

शब्दार्थ—

अक्षिणी	१.	दोनों आँख	द्वे-द्वे	४.	दो-दो
नासिके	२.	दोनों नाक	द्वारौ	५.	दरवाजे हैं (तथा)
कर्णौ	३.	दोनों कान (ये)	बहिः	१३.	बाहर
मुखम्	६.	मुख	याति	१४.	जाता है
शिश्न	७.	जननेन्द्रिय (और)	यः तद्	१०.	जिससे जीव उस मन
गुदौ	८.	गुदा	इन्द्रिय	११.	इन्द्रिय के
इति ।	९.	ये (तीन दरवाजे हैं)	संयुतः ॥	१२.	साथ

श्लोकार्थ—दोनों आँख, दोनों नाक, दोनों कान ये दो-दो दरवाजे हैं, तथा मुख, जननेन्द्रिय और गुदा ये तीन दरवाजे हैं । जिससे जीव उस मन इन्द्रिय के साथ बाहर जाता है ॥

नवमः श्लोकः

अक्षिणी नासिके आस्यमिति पञ्च पुरः कृताः ।
दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः ॥९॥

पदच्छेद— अक्षिणी नासिके आस्यम् इति पञ्च पुरः कृताः ।
दक्षिणा दक्षिणः कर्णः उत्तरा च उत्तरः स्मृतः ॥

शब्दार्थ—

अक्षिणी	१.	दोनों आंख	दक्षिणा	१०.	दक्षिण दिशा का
नासिके	२.	दोनों नाक (और)	दक्षिणः	८.	दाहिना
आस्यम्	३	मुख	कर्णः	९.	कान
इति	४	ये	उत्तरा	१३.	उत्तर दिशा का दरवाजा
पञ्च	५.	पांच	च	११.	और
पुरः	६.	पूर्व दिशा के	उत्तरः	१२.	बांया कान
कृताः ।	७	दरवाजे हैं	स्मृतः ॥	१४.	कहा गया है

श्लोकार्थ—दोनों आंख, दोनों नाक और मुख ये पूर्व दिशा के दरवाजे हैं । दाहिना कान दक्षिण दिशा का और बांया कान उत्तर दिशा का दरवाजा कहा गया है ॥

दशमः श्लोकः

पश्चिमे इत्यधोद्वारौ गुदं शिश्नमिहोच्यते ।
खद्योताऽऽविर्मुखी चात्र नेत्रे एकत्र निर्मिते ।
रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः ॥१०॥

पदच्छेद— पश्चिमे इति अधः द्वारौ गुदम् शिश्नम् इह उच्यते ।
खद्योता आविर्मुखी च अत्र नेत्रे एकत्र निर्मिते ।
रूपम् विभ्राजितम् ताभ्याम् विचष्टे चक्षुषा ईश्वरः ॥

शब्दार्थ—

पश्चिमे	५.	पश्चिम दिशा में	अत्र	७.	इसमें
इति अधः	३.	ये नीचे के	नेत्रे	१२.	दोनों आंखें हैं
द्वारौ	४.	दो दरवाजे	एकत्र निर्मिते	११.	एक जगह बनाई गई
गुदम् शिश्नम्	२.	गुदा (और) जननेन्द्रिय	रूपम्	१०.	(वह) रूप
इह	१.	यहां	विभ्राजितम्	१८.	विभ्राजित देश है
उच्यते ।	६.	बताये गये हैं	ताभ्याम्	१४.	उन दोनों
खद्योता	८.	खद्योता	विचष्टे	१६.	देखता है
आविर्मुखी	१०.	आविर्मुखी (नाम से)	चक्षुषा	१५.	नेत्रों से
च	९.	और	ईश्वरः ॥	१३.	जिसे जीव

श्लोकार्थ—यहां गुदा और जननेन्द्रिय दो नीचे के दरवाजे पश्चिम दिशा में बताये गये हैं । इसमें खद्योता और आविर्मुखी नाम से एक जगह बनाई गयी दोनों आंखें हैं । जिसे जीव उन दोनों नेत्रों से देखता है । रूप विभ्राजित देश है ॥

एकादशः श्लोकः

नलिनी नालिनी नासे गन्धः सौरभ उच्यते ।
घ्राणोऽवधूतो मुख्यास्यं विपणो वाग्रसविद्रसः ॥११॥

पदच्छेद—

नलिनी नालिनी नासे गन्धः सौरभः उच्यते ।
घ्राणः अवधूतः मुख्य आस्यम् विपणः वाक् रसवित् रसः ॥

शब्दार्थ—

नलिनी	२.	नलिनी (और)	अवधूत	८.	अवधूत नामक मित्र है
नालिनी	३.	नालिनी नाम से (तथा)	मुख्य	१०.	प्रधान है
नासे	१.	दोनों नासा छिद्र	आस्यम्	९.	उसमें मुख
गन्धः	४.	गन्ध को	विपणः	१२.	विपण नाम का (तथा)
सौरभः	५.	सौरभ देश	वाक्	११.	वाणी
उच्यते ।	६.	कहा गया है	रसवित्	१४.	रसज्ञ नाम का मित्र है
घ्राणः	७.	घ्राणेन्द्रिय	रसः॥	१३.	रसनेन्द्रिय

श्लोकार्थ—दोनों नासा छिद्र नलिनी और नालिनी नाम से तथा गन्ध को सौरभ देश कहा गया है। घ्राणेन्द्रिय अवधूत नामक मित्र है। उसमें मुख प्रधान है वाणी विपण नाम का मित्र है। तथा रसनेन्द्रिय रसज्ञ नाम का मित्र है ॥

द्वादशः श्लोकः

आपणो व्यवहारोऽत्र चित्रमन्धो बहूदनम् ।
पितृहूर्दक्षिणः कर्ण उत्तरो देवहूः स्मृतः ॥१२॥

पदच्छेद—

आपणः व्यवहारः अत्र चित्रम् अन्धः बहूदनम् ।
पितृहूः दक्षिणः कर्णः उत्तरः देवहूः स्मृतः ॥

शब्दार्थ—

आपणः	३.	बाजार है (तथा)	पितृहूः	८.	पितृहू नाम से
व्यवहारः	२.	वाणी का व्यवहार ही	दक्षिणः	७.	दाहिना
अत्र	१.	यहाँ	कर्णः	८.	कान
चित्रम्	४.	अनेक प्रकार का	उत्तरः	१०.	बाँया कान
अन्धः	५.	अन्न	देवहूः	११.	देवहू नाम से
बहूदनम् ।	६.	बहूदन देश है	स्मृतः॥	१२.	कहा गया है

श्लोकार्थ—यहाँ वाणी का व्यवहार ही बाजार है तथा अनेक प्रकार का अन्न बहूदन देश है। दाहिना कान पितहू नाम से बाँया कान देवहू नाम से कहा गया है ॥

त्रयोदशः श्लोकः

प्रवृत्तं च निवृत्तं च शास्त्रं पञ्चालसंज्ञितम् ।
पितृयानं देवयानं श्रोत्राच्छ्रुतधराद्व्रजेत् ॥१३॥

पदच्छेद—

प्रवृत्तम् च निवृत्तम् च शास्त्रम् पञ्चाल संज्ञितम् ।
पितृयानं देवयानम् श्रोत्रात् श्रुतधरात् व्रजेत् ॥

शब्दार्थ—

प्रवृत्तम्	१.	कर्म काण्ड	संज्ञितम् ।	६.	कहा गया है
च	२.	और	पितृयानम्	१०.	पितृ लोक (और)
निवृत्तम्	३.	संन्यास	देवयानम्	११.	देव लोक को
च	७.	जिनसे जीव	श्रोत्रात्	८.	कर्णेन्द्रिय रूप
शास्त्रम्	४.	शास्त्र	श्रुतधरात्	९.	श्रुतधर नाम के मित्र के साथ
पञ्चाल	५.	पाञ्चाल देश नाम से	व्रजेत् ॥	१२.	जाता है

श्लोकार्थ—कर्मकाण्ड और संन्यास शास्त्र पाञ्चाल देश नाम से कहा गया है । जिनसे जीव कर्णेन्द्रिय रूप श्रुतधर नाम के मित्र के साथ पितृलोक और देवलोक को जाता है ॥

चतुर्दशः श्लोकः

आसुरी मेढ्रमर्वाग्द्वार्व्यवायो ग्रामिणां रतिः ।
उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते ॥१४॥

पदच्छेद—

आसुरीम् मेढ्रम् अर्वाक् द्वाः व्यवायः ग्रामिणाम् रतिः ।
उपस्थः दुर्मदः प्रोक्तः निर्ऋतिः गुदः उच्यते ॥

शब्दार्थ—

आसुरी	२.	आसुरी नाम का	उपस्थः	८.	जननेन्द्रिय शक्ति
मेढ्रम्	१.	जननेन्द्रिय	दुर्मदः	९.	दुर्मद नाम से
अर्वाक्	३.	पश्चिमी	प्रोक्तः	१०.	कही गयी है (तथा)
द्वाः	४.	द्वार है	निर्ऋतिः	११.	निर्ऋति
व्यवायः	७.	देश है	गुदः	१२.	गुदा को
ग्रामिणाम्	६.	ग्रामक	उच्यते ॥	१३.	कहते हैं
रतिः ।	५.	स्त्री प्रसङ्ग			

श्लोकार्थ—जननेन्द्रिय आसुरी नाम का पश्चिमी द्वार है । स्त्री प्रसङ्ग ग्रामक देश है । जननेन्द्रिय शक्ति दुर्मद नाम से कही गयी है । तथा निर्ऋति गुदा को कहते हैं ॥

पञ्चदशः श्लोकः

वैशसं नरकं पायुर्लुब्धकोऽन्धौ तु मे शृणु।
हस्तपादौ पुमांस्ताभ्यां युक्तो याति करोति च ॥१५॥

पदच्छेद— वैशसम् नरकम् पायुः लुब्धकः अन्धौ तु मे शृणु।
हस्तपादौ पुमान् ताभ्याम् युक्तः याति करोति च ॥

शब्दार्थ—

वैशसम्	१. वैशस नाम का देश	हस्त	९. (वे) हाथ (और)
नरकम्	२. नरक है	पादौ	१०. पैर हैं
पायुः	३. गुदा इन्द्रिय	पुमान्	११. जीव
लुब्धकः	४. लुब्धक नाम मित्र है	ताभ्याम्	१२. उन्हीं के
अन्धौ	५. दोनों अन्धों का रहस्य	युक्त	१३. सहारे
तु	६. अब	याति	१४. कहीं जाता है
मे	७. मुझसे	करोति	१६. काम करता है
शृणु।	८. सुनो	च ॥	१५. और

श्लोकार्थ—वैशस नाम का देश नरक है, गुदा इन्द्रिय लुब्धक नामक मित्र है। दोनों अन्धों का रहस्य अब मुझसे सुनो। वे हाथ और पैर हैं। जीव उन्हीं के सहारे कहीं जाता है और काम करता है ॥

षोडशः श्लोकः

अन्तःपुरं च हृदयं विषूचिर्मन उच्यते।
तत्र मोहं प्रसादं वा हर्षं प्राप्नोति तद्गुणैः ॥१६॥

पदच्छेद—

अन्तः पुरम् च हृदयम् विषूचिः मनः उच्यते।
तत्र मोहम् प्रसादम् वा हर्षम् प्राप्नोति तद्गुणैः ॥

शब्दार्थ—

अन्तः पुरम्	२. अन्तः पुर	मोहम्	१०. अज्ञान
च	३. और (उसमें रहने वाला)	प्रसादम्	११. प्रसन्नता
हृदयम्	१. हृदय को	वा	१२. अथवा
विषूचिः	४. विषूचि नाम के सेवक को	हर्षम्	१३. हर्ष को
मनः	५. मन	प्राप्नोति	१४. प्राप्त करता है
उच्यते।	६. कहा गया है	तद्	८. जीव मन के
तत्र	७. उस अन्तः पुर में	गुणैः ॥	९. तीनों गुणों के कारण

श्लोकार्थ—हृदय को अन्तः पुर और उसमें रहने वाले विषूचि नाम के सेवक को मन कहा गया है। उस अन्तः पुर में जीव मन के तीनों गुणों के कारण अज्ञान, प्रसन्नता, अथवा हर्ष को प्राप्त करता है ॥

सप्तदशः श्लोकः

यथा यथा विक्रियते गुणाक्तो विकरोति वा।
तथा तथोपद्रष्टाऽऽत्मा तद्वृत्तीरनुकार्यते ॥१७॥

पदच्छेद— यथा यथा विक्रियते गुण आक्तः विकरोति वा।
तथा तथा उपद्रष्टा आत्मा तद् वृत्तीः अनुकार्यते ॥

शब्दार्थ—

यथा	१.	जैसे	तथा	१०.	वैसे
यथा	२.	जैसे बुद्धि	तथा	११.	वैसे
विक्रियते	३.	विकार को प्राप्त होती है	उपद्रष्टा	६.	साक्षी (होने पर भी)
गुण	६.	उसके गुणों में	आत्मा	८.	जीवात्मा
आक्तः	७.	लिप्त हुआ	तद्	१२.	उस बुद्धि के
विकरोति	५.	विकार उत्पन्न करती है	वृत्तीः	१३.	व्यवहार का
वा	४.	अथवा (इन्द्रियों में)	अनुकार्यते ॥	१४.	अनुकरण करता है

श्लोकार्थ—जैसे-जैसे बुद्धि विकार को प्राप्त होती है अथवा इन्द्रियों में विकार उत्पन्न करती है; उसके गुणों में लिप्त हुआ जीवात्मा साक्षी होने पर भी वैसे-वैसे उस बुद्धि के व्यवहार का अनुकरण करता है ॥

अष्टादशः श्लोकः

देहो रथस्त्विन्द्रियाश्वः संवत्सररयोऽगतिः।
द्विकर्मचक्रस्त्रिगुणध्वजः पञ्चासुबन्धुरः ॥१८॥

पदच्छेद— देहः रथः तु इन्द्रिय अश्वः संवत्सर रयः अगतिः।
द्विकर्म चक्रः त्रिगुण ध्वजः पञ्च असु बन्धुरः ॥

शब्दार्थ—

देहः	१.	शरीर	द्विकर्म	८.	पुण्य-पापरूप दोनों कर्म
रथः	२.	रथ है	चक्रः	९.	दो चक्के हैं
तु	३.	तथा	त्रिगुण	१०.	सत्त्वादि तीनों गुण
इन्द्रिय अश्व	४.	इन्द्रियाँ ही घोड़े हैं	ध्वजः	११.	पताकायें हैं (और)
संवत्सर	६.	वर्ष (के समान)	पञ्च	१२.	पांच
रयः	७.	वेग वाला (है)	असु	१३.	प्राण ही
अगतिः।	५.	वह गति हीन है (फिर भी)	बन्धुरः ॥	१४.	डोरियाँ हैं

श्लोकार्थ—शरीर रथ है तथा इन्द्रियाँ ही घोड़े; वह गति हीन है फिर भी वर्ष के समान वेग वाला है। पुण्य-पापरूप दोनों कर्म दो चक्के हैं; सत्त्वादि तीनों गुण पताकायें हैं और पाँच प्राण ही डोरियाँ हैं ॥

एकोनविंशः श्लोकः

मनोरश्मिर्बुद्धिसूतो हृन्नीडो द्वन्द्वकूबरः ।
पञ्चेन्द्रियार्थप्रक्षेपः सप्तधातुवरूथकः ॥१६॥

पदच्छेद—

मनः रश्मिः बुद्धि सूतः हृत् नीडः द्वन्द्व कूबरः ।
पञ्च इन्द्रिय अर्थ प्रक्षेपः सप्त धातु वरूथकः ॥

शब्दार्थ—

मनः	१.	मन (उसका)	कूबरः ।	८.	दो जुये हैं
रश्मिः	२.	लगाम	पञ्च	१०.	पांच
बुद्धि	३.	बुद्धि	इन्द्रिय	६.	इन्द्रियों के
सूतः	४.	सारथी है	अर्थ प्रक्षेपः	११.	विषय आयुध हैं (और)
हृत्	५.	हृदय	सप्त	१२.	सात
नीडः	६.	बैठने का स्थान है	धातु	१३	धातुयें
द्वन्द्व	७.	सुख और दुःखादि के जोड़े	वरूथकः ॥	१४.	सात आवरण हैं

श्लोकार्थ—मन उसका लगाम है, बुद्धि सारथी है, हृदय बैठने का स्थान है और सुख और दुःखादि के जोड़े दो जुये हैं। इन्द्रियों के पांच विषय आयुध हैं और सात धातुयें सात आवरण हैं॥

विंशः श्लोकः

आकूतिर्विक्रमो बाह्यो मृगतृष्णां प्रधावति ।
एकादशेन्द्रियचमूः पञ्चसूनाविनोदकृत् ॥२०॥

पदच्छेद—

आकूतिः विक्रमः बाह्यः मृग तृष्णाम् प्रधावति ।
एकादश इन्द्रिय चमूः पञ्चसूना विनोद कृत् ॥

शब्दार्थ—

आकूतिः	१.	पांच कर्मेन्द्रियां	एकादश	७.	ग्यारह
विक्रमः	२.	पांच प्रकार की गति है	इन्द्रिय	८.	इन्द्रियां
बाह्यः	३.	उस पर चढ़कर (जीव)	चमूः	६.	सेना है
मृग	४.	मिथ्या	पञ्चसूना	१०.	पांच ज्ञानेन्द्रियों से विषयों का भोग
तृष्णाम्	५.	विषयों की ओर	विनोद	११.	उसका शिकार
प्रधावति ।	६.	दौड़ता है	कृत् ॥	१२.	करना है

श्लोकार्थ—पांच कर्मेन्द्रियां पांच प्रकार की गति है। उस पर चढ़कर जीव मिथ्या विषयों की ओर दौड़ता है। ग्यारह इन्द्रियां सेना हैं। पांच ज्ञानेन्द्रियों से विषयों का भोग उसका शिकार करना है।

एकविंशः श्लोकः

संवत्सरश्चण्डवेगः कालो येनोपलक्षितः ।
तस्याहानीह गन्धर्वा गन्धर्व्यो रात्रयः स्मृताः ।
हरन्त्यायुः परिक्रान्त्या षष्ठ्युत्तरशतत्रयम् ॥२१॥

पदच्छेद— संवत्सरः चण्डवेगः कालः येन उपलक्षितः ।
तस्य अहानि इह गन्धर्वाः गन्धर्व्यः रात्रयः स्मृताः ।
हरन्ति आयुः परिक्रान्त्या षष्टिउत्तर शत त्रयम् ॥

शब्दार्थ—

संवत्सरः	४.	वर्ष	गन्धर्व्यः	१०.	गन्धर्वियाँ
चण्डवेगः	५.	चण्ड वेग	रात्रयः	११.	रात्रि
कालः	२.	समय का	स्मृताः	१२.	कही गयी हैं (ये)
येन	१.	जिससे	हरन्ति	१८.	हरण करती हैं
उपलक्षितः ।	३.	ज्ञान होता है (वह)	आयुः	१७.	जीव की आयु का
तस्य	८.	उस वर्ष के	परिक्रान्त्या	१६.	चक्कर लगाकर
अहानि	९.	दिन (हैं तथा)	षष्टिउत्तर	१५.	साठ
इह	६.	यहाँ	शत	१४.	सौ
गन्धर्वाः	७.	गन्धर्व	त्रयम् ॥	१३.	तीन

श्लोकार्थ—जिससे समय का ज्ञान होता है वह वर्ष चण्डवेग है । यहाँ गन्धर्व उस वर्ष के दिन हैं तथा गन्धर्वियाँ रात्री कही गयी हैं ये । तीन सौ साठ चक्कर लगाकर जीव की आयु का हरण करती हैं ॥

द्वाविंशः श्लोकः

कालकन्या जरा साक्षाल्लोकस्तां नाभिनन्दति ।
स्वसारं जगृहे मृत्युः क्षयाय यवनेश्वरः ॥२२॥

पदच्छेद— कालकन्या जरा साक्षात् लोकः ताम् न अभिनन्दति ।
स्वसारम् जगृहे मृत्युः क्षयाय यवनेश्वरः ॥

शब्दार्थ—

कालकन्या	१.	काल कन्या	अभिनन्दति ।	७.	पसन्द करते हैं
जरा	३.	वृद्धावस्था है	स्वसारम्	११.	उसे बहन के रूप में
साक्षात्	२.	साक्षात्	जगृहे	१२.	स्वीकार किया था
लोकः	४.	लोग	मृत्युः	८.	मृत्यु रूप
ताम्	५.	उसे	क्षयाय	१०.	लोकों के विनाश के लिये
न	६.	नहीं	यवनेश्वरः ॥	९.	यवनराज ने

श्लोकार्थ—काल कन्या साक्षात् वृद्धावस्था है । लोग उसे पसन्द नहीं करते हैं । मृत्यु रूप यवनराज ने लोकों का विनाश करने के लिये उसे बहन के रूप में स्वीकार किया था ॥

त्रयोविंशः श्लोकः

आधयो व्याधयस्तस्य सैनिका यवनाश्चराः ।
भूतोपसर्गाशुरयः प्रज्वारो द्विविधो ज्वरः ॥२३॥

पदच्छेद—

आधयः व्याधयः तस्य सैनिकाः यवनाः चराः ।
भूत उपसर्ग.आशु रयः प्रज्वारः द्विविधः ज्वरः ॥

शब्दार्थ—

आधयः	१.	मानसिक क्लेश (और)	भूत	७.	प्राणियों को
व्याधयः	२.	शारीरिक क्लेश (ही)	उपसर्ग	८.	पीड़ा पहुँचाकर
तस्य	३.	उस यवनराज के	आशुरयः	६.	तत्काल मृत्यु का कारण
सैनिकाः	६.	सैनिक हैं	प्रज्वारः	१२.	प्रज्वार है
यवनाः	५.	यवन	द्विविधः	१०.	उष्ण और शीत दो प्रकार का
चराः ।	४.	विचरण करने वाले	ज्वरः ॥	११.	ज्वर

श्लोकार्थ—मानसिक क्लेश और शारीरिक क्लेश ही उस यवनराज के विचरण करने वाले सैनिक हैं। प्राणियों को पीड़ा पहुँचाकर तत्काल मृत्यु का कारण उष्ण और शीत दो प्रकार का ज्वर प्रज्वार है ॥

चतुर्विंशः श्लोकः

एवं बहुविधैर्दुःखैर्दैवभूतात्मसम्भवैः ।
क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः ॥२४॥

पदच्छेद—

एवम् बहुविधैः दुःखैः दैव भूत आत्म सम्भवैः ।
क्लिश्यमानः शतम् वर्षम् देहे देही तमः वृतः ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	क्लिश्यमानः	८.	कष्ट पाता हुआ
बहुविधैः	६.	अनेक प्रकार के	शतम्	११.	एक सौ
दुःखैः	७.	दुःखों से	वर्षम्	१२.	वर्षों तक
दैव	२.	देवताओं से	देहे	१०.	शरीर में
भूत	३.	जीवों (और)	देही	९.	जीव
आत्म	४.	शरीर में	तमः	१३.	अज्ञान में
सम्भवैः ।	५.	उत्पन्न होने वाले	वृतः ॥	१४.	पड़ा रहता है

श्लोकार्थ—इस प्रकार देवताओं से जीवों और शरीर में उत्पन्न होने वाले अनेक प्रकार के दुःखों से कष्ट पाता हुआ जीव शरीर में एक सौ वर्षों तक अज्ञान में पड़ा रहता है ॥

पञ्चविंशः श्लोकः

प्राणेन्द्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः ।
शेते कामलवान्ध्यायन्ममाहमिति कर्मकृत् ॥२५॥

पदच्छेद—

प्राणइन्द्रिय मनः धर्मान् आत्मनि अध्यस्य निर्गुणः ।
शेते कामलवान्ध्यायन् मम अहम् इति कर्मकृत् ॥

शब्दार्थ—

प्राण	२.	प्राण	शेते	१५.	पड़ा रहता है
इन्द्रिय	३.	इन्द्रिय (और)	काम	१२.	भोगों का
मनः	४.	मन के	लवान्	११.	क्षुद्र
धर्मान्	५.	धर्मों को	ध्यायन्	१३.	चिन्तन करता हुआ (और)
आत्मनि	६.	अपने में	मम	९.	मेरा
अध्यास्य	७.	आरोपित करके	अहम्	८.	मैं (और)
निर्गुणः ।	१.	निर्गुण होने पर भी (जीव)	इति ॥	१०.	इस प्रकार से
			कर्मकृत् ॥	१४.	कर्मों को करता हुआ

श्लोकार्थ—निर्गुण होने पर भी जीव, प्राण, इन्द्रिय और मन के धर्मों को अपने में आरोपित करके मैं और मेरा इस प्रकार से क्षुद्र भोगों का चिन्तन करता हुआ और कर्मों को करता हुआ पड़ा रहता है ॥

षड्विंशः श्लोकः

यदाऽऽत्मानमविज्ञाय भगवन्तं परं गुरुम् ।
पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् ॥२६॥

पदच्छेद—

यदा आत्मानम् अविज्ञाय भगवन्तम् परम् गुरुम् ।
पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्व दृक् ॥

शब्दार्थ—

यदा	३.	जब-तक	पुरुषः	२.	जीव
आत्मानम्	४.	आत्म स्वरूप	तु	९.	तब-तक
अविज्ञाय	८.	नहीं जानता है	विषज्जेत	१२.	आसक्त रहता है
भगवन्तम्	७.	भगवान् को	गुणेषु	११.	विषयों में
परम्	५.	परम	प्रकृतेः	१०.	प्रकृति के
गुरुम् ।	६.	गुरु	स्वदृक् ॥	१.	स्वयं प्रकाश होकर (भी)

श्लोकार्थ—स्वयं प्रकाश होकर भी जीव जब-तक आत्म स्वरूप परम गुरु भगवान् को नहीं जानता है तब-तक प्रकृति के विषयों में आसक्त रहता है ॥

एकोनविंशः श्लोकः

गुणाभिमानी स तदा कर्माणि कुरुतेऽवशः ।
शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते ॥२७॥

पदच्छेद —

गुण अभिमानी सः तदा कर्माणि कुरुते अवशः ।
शुक्लम् कृष्णम् लोहितम् वा यथा कर्म अभिजायते ॥

शब्दार्थ—

गुण	१.	प्रकृति के सत्त्वादि गुणों में	शुक्लम्	६.	सात्त्विक
अभिमानी	२.	अभिमान रखने वाला	कृष्णम्	९.	तामस
सः	३.	वह जीव	लोहितम्	७.	राजस
तदा	४.	उस समय	वा	८.	अथवा
कर्माणि	१०.	अनेकों प्रकार के कर्म	यथा	१३.	अनुसार (नाना योनियों में)
कुरुते	११.	करता है (ततः)	कर्म	१२.	कर्मों के
अवशः :	५.	विवश होकर	अभिजायते ॥	१४.	उत्पन्न होता है

श्लोकार्थ—प्रकृति के सत्त्वादि गुणों में अभिमान रखने वाला वह जीव उस समय विवश होकर सात्त्विक, राजस अथवा तामस अनेकों प्रकार के कर्म करता है। ततः कर्मों के अनुसार नाना योनियों में उत्पन्न होता है ॥

विंशः श्लोकः

शुक्लात्प्रकाशभूयिष्ठाँल्लोकानाप्नोति कर्हिचित् ।
दुःखोदर्कान् क्रियायासांस्तमःशोकोत्कटान् क्वचित् ॥२८॥

पदच्छेद— शुक्लात् प्रकाश भूयिष्ठान् लोकान् आप्नोति कर्हिचित् ।
दुःख उदर्कान् क्रिया आयासान् तमः शोक उत्कटान् क्वचित् ॥

शब्दार्थ—

शुक्लात्	१.	(कभी जीव) सात्त्विक कर्म से	उदर्कान्	९.	दायी लोकों को
प्रकाश	२.	ज्ञान	क्रिया	६.	काम की
भूयिष्ठान्	३.	बहुल	आयासान्	७.	थकावट वाले (तथा)
लोकान्	४.	स्वर्गादिलोकों को	तमः	१२.	अज्ञान (और)
आप्नोति	१४.	प्राप्त करता है	शोक	१३.	शोक (वाले लोकों को)
कर्हिचित् ।	५.	कभी (राजस कर्म से)	उत्कटान्	११.	अत्यधिक
दुःख	८.	दुःख	क्वचित् ॥	१०.	कभी (तामस कर्म से)

श्लोकार्थ—कभी जीव सात्त्विक कर्म से ज्ञान बहुल स्वर्गादिलोकों को, कभी राजस कर्म से काम की थकावट वाले तथा दुःखदायी लोकों को, कभी तामस कर्म से अत्यधिक अज्ञान और शोक वाले लोकों को प्राप्त करता है ॥

एकोनत्रिंशः श्लोकः

यूयम्	२.	तुम लोग	अहम्	६.	मैं
मे	१०.	मुझसे (कोई)	सौहृदेन	८.	प्रेम से
नृपनन्दनाः ।	१.	हे राज कुमारो	वः ॥	७.	तुम लोगों के

श्लोकार्थ—हे राज कुमारो ! तुम लोग परस्पर प्रेम के कारण एक समान धर्म का पालन कर रहे हो । मैं तुम लोगों के प्रेम से प्रसन्न हूँ । अतः मुझसे कोई वरदान माँगो । तुम्हारा कल्याण हो ॥

नवमः श्लोकः

योऽनुस्मरति सन्ध्यायां युष्माननुदिनं नरः।
तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदम् ॥९॥

पदच्छेद—

यः अनुस्मरति सन्ध्यायाम् युष्मान् अनुदिनं नरः।
तस्य भ्रातृषु आत्म साम्यम् तथा भूतेषु सौहृदम् ॥

शब्दार्थ—

यः	१.	जो	तस्य	७.	उसका
अनुस्मरति	६.	स्मरण करता है	भ्रातृषु	८.	भाइयों में
सन्ध्यायाम्	३.	सन्ध्या के समय	आत्म साम्यम्	९.	अपने समान प्रेम
युष्मान्	५.	तुम लोगों का	तथा	१०.	और
अनुदिनम्	४.	प्रतिदिन	भूतेषु	११.	प्राणियों के प्रति
नरः	२.	मनुष्य	सौहृदम् ॥	१२.	मैत्री भाव होता है

श्लोकार्थ—जो मनुष्य सन्ध्या के समय प्रतिदिन तुम लोगों का स्मरण करता है, उसका भाइयों में अपने समान प्रेम और प्राणियों के प्रति मैत्री-भाव होता है ॥

दशमः श्लोकः

ये तु मां रुद्रगीतेन सायं प्रातः समाहिताः।
स्तुवन्त्यहं कामवरान्दास्ये प्रज्ञां च शोभनाम् ॥१०॥

पदच्छेद—

ये तु माम् रुद्र गीतेन सायं प्रातः समाहिताः।
स्तुवन्ति अहम् कामवरान् दास्ये प्रज्ञाम् च शोभनाम् ॥

शब्दार्थ—

ये	२.	जो लोग	स्तुवन्ति	८.	स्तुति करते हैं
तु	१.	तथा	अहम्	९.	मैं
माम्	५.	मेरी	काम	११.	कामनाओं
रुद्र गीतेन	६.	रुद्र गीत से	वरान्	१०.	उन्हें उत्तम
सायम्	३.	सायंकाल (और)	दास्ये	१५.	देता हूँ
प्रातः	४.	प्रातः काल	प्रज्ञाम्	१४.	बुद्धि को
समाहिताः।	७.	एकाग्र मन होकर	च	१२.	और
			शोभनम् ॥	१३.	निर्मल

श्लोकार्थ—तथा जो लोग सायंकाल और प्रातः काल मेरी एकाग्र मन होकर स्तुति करते हैं, मैं उन्हें कामनाओं और निर्मल बुद्धि को देता हूँ ॥

एकादशः श्लोकः

यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः ।
अथो व उशती कीर्तिर्लोकाननु भविष्यति ॥११॥

पदच्छेद—

यद्यूयम् पितुः आदेशम् अग्रहीष्ट मुदा अन्विता ।
अथो वः उशती कीर्तिः लोकान् अनु भविष्यति ॥

शब्दार्थ—

यद्	१. क्योंकि	अथो	८. इसलिये
यूयम्	२. तुम लोगों ने	वः	९. तुम लोगों की
पितुः	३. अपने पिता की	उशती	१०. कमनीय
आदेशम्	४. आज्ञा का	कीर्तिः	११. कीर्ति
अग्रहीष्ट	७. पालन किया है	लोकान्	१२. सारे लोकों में
मुदा	५. प्रसन्नता के	अनुभविष्यति ॥	१३. फैलेगी
अन्वितः ।	६. साथ		

श्लोकार्थ—क्योंकि तुम लोगों ने अपने पिता की आज्ञा का प्रसन्नता के साथ पालन किया है; इसलिये तुम लोगों की कमनीय कीर्ति सारे लोकों में फैलेगी ॥

द्वादशः श्लोकः

भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुणैः ।
य एतामात्मवीर्येण त्रिलोकीं पूरयिष्यति ॥१२॥

पदच्छेद—

भविता विश्रुतः पुत्रः अनवमः ब्रह्मणः गुणैः ।
य एताम् आत्म वीर्येण त्रिलोकीम् पूरयिष्यति ॥

शब्दार्थ—

भविता	६. होगा	यः	७. जो
विश्रुतः	२. प्रसिद्ध (और)	एताम्	१०. इस
पुत्रः	१. आपका पुत्र	आत्म	८. अपनी
अनवमः	५. कम नहीं	वीर्येण	९. सन्तान से
ब्रह्मणः	४. ब्रह्मा जी से	त्रिलोकीम्	११. त्रिलोकी को
गुणैः ।	३. गुणों में	पूरयिष्यति ।	१२. पूर्ण करेगा

श्लोकार्थ—आपका पुत्र प्रसिद्ध और गुणों में ब्रह्मा जी से कम नहीं होगा । जो अपनी सन्तान से इस त्रिलोकी को पूर्ण करेगा ॥

त्रयोदशः श्लोकः

कण्डोः प्रम्लोचया लब्धा कन्या कमललोचना ।
तां चापविद्धां जगृहुर्भूरुहा नृपनन्दनाः ॥१३॥

पदच्छेद—

कण्डोः प्रम्लोचया लब्धा कन्या कमल लोचना ।
ताम् चाप अपविद्धाम् जगृहुः भूरुहाः नृपनन्दनाः ॥

शब्दार्थ—

कण्डोः	२.	कण्डु ऋषि को	ताम्	१०.	उसे
प्रम्लोचया	३	प्रम्लोचा नाम की अप्सरा	च	८.	अप्सरा के
लब्धा	७.	उत्पन्न हुई थी	अपविद्धाम्	९.	छोड़कर चले जाने पर
कन्या	६.	एक कन्या	जगृहुः	१२.	पाला-पोसा था
कमल	४.	कमल के समान	भूरुहाः	११.	वृक्षों ने
लोचना ।	५.	नेत्रों वाली	नृपनन्दनाः ॥	१.	हे राजकुमारो

श्लोकार्थ—हे राजकुमारो ! कण्डु ऋषि को प्रम्लोचा नाम की अप्सरा से कमल के समान नेत्रों वाली एक कन्या उत्पन्न हुई थी । अप्सरा के छोड़कर चले जाने पर उसे वृक्षों ने पाला पोसा था ॥

चतुर्दशः श्लोकः

क्षुत्क्षामाया मुखे राजा सोमः पीयूषवर्षिणीम् ।
देशिनीं रोदमानाया निदधे स दयान्वितः ॥१४॥

पदच्छेद—

क्षुत् क्षामायाः मुखे राजा सोमः पीयूष वर्षिणीम् ।
देशिनीम् रोदमानाया निदधे स दया अन्वितः ॥

शब्दार्थ—

क्षुत्	१.	भूख से	देशिनीम्	१२.	तर्जनी अंगुली
क्षामायाः	२.	व्याकुल होकर	रोदमानाया	३.	रोती हुई
मुखे	५.	मुख में	निदधे	१३.	रख दी
राजा	६.	वनस्पतियों के राजा	स	४.	उस कन्या के
सोमः	७.	चन्द्रमा ने	दया	८.	दया
पीयूष	१०.	अमृत की	अन्वितः ॥	९.	वश
वर्षिणीम् ।	११.	वर्षा करने वाली (अपनी)			

श्लोकार्थ—भूख से व्याकुल होकर रोती हुई उस कन्या के मुख में वनस्पतियों के राजा चन्द्रमा ने दया वश अमृत की वर्षा करने वाली अपनी तर्जनी अंगुली रख दी ॥

पञ्चदशः श्लोकः

प्रजाविसर्ग आदिष्टाः पित्रा मामनुवर्तता ।
तत्र कन्यां वरारोहां तामुद्वहत माचिरम् ॥१५॥

पदच्छेद—

प्रजाविसर्गे आदिष्टाः पित्रा माम् अनुवर्तता ।
तत्र कन्याम् वरारोहाम् ताम् उद्वहत माचिरम् ॥

शब्दार्थ—

प्रजा	४.	सन्तान की	तत्र	७.	वहाँ
विसर्गे	५.	उत्पत्ति का	कन्याम्	१०.	कन्या के साथ
आदिष्टाः	६	आदेश पाकर (तुम लोग)	वरारोहाम्	९.	सुन्दरी
पित्रा	३.	अपने पिता से	ताम्	८.	उस
माम्	१.	मेरा	उद्वहत	१२.	विवाह करो
अनुवर्तता ।	२.	अनुकरण करने वाले	माचिरम् ॥	११.	तत्काल

श्लोकार्थ—मेरा अनुकरण करने वाले अपने पिता से सन्तान की उत्पत्ति का आदेश पाकर तुम लोग वहाँ उस सुन्दरी कन्या के साथ तत्काल विवाह करो ॥

षोडशः श्लोकः

अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा ।
अपृथग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया ॥१६॥

पदच्छेद—

अपृथक् धर्म शीलानाम् सर्वेषाम् वः सुमध्यमा ।
अपृक्धर्म शीला इयम् भूयात् पत्नी अर्पित आशया ॥

शब्दार्थ—

अपृथक्	५.	एक समान	अपृथक्	१.	एक समान
धर्म	६.	धर्म और	धर्मशीला	२.	धर्म और स्वभाव वाली
शीलानाम्	७.	स्वभाव वालो	इयम्	३.	वह
सर्वेषाम्	९.	सभी की	भूयात्	११.	होगी
वः	८.	तुम	पत्नी	१०.	पत्नी
सुमध्यमा ।	४.	सुन्दरी	अर्पित	१२.	तुम्हारे प्रति उसका
			आशया ॥	१३.	अनुराग (होगा)

श्लोकार्थ—एक समान धर्म और स्वभाव वाली वह सुन्दरी एक समान धर्म और स्वभाव वाली तुम सभी की पत्नी होगी । तुम्हारे प्रति उनका अनुराग होगा ॥

सप्तदशः श्लोकः

दिव्यवर्षसहस्राणां सहस्रमहतौजसः ।
भौमान् भोक्ष्यथ भोगान् वै दिव्यांश्चानुग्रहान्मम ॥१७॥

पदच्छेद—

दिव्य वर्ष सहस्राणाम् सहस्रम् अहत ओजसः ।
भौमान् भोक्ष्यथ भोगान् वै दिव्यान् च अनुग्रहान् मम ॥

शब्दार्थ—

दिव्य	३.	देवताओं के	भोक्ष्यथ	१४.	भोग करोगे
वर्ष	६.	वर्षों तक	भोगान्	१२.	भोगों का
सहस्राणाम्	४.	हजारों के	वै	१३.	अवश्य
सहस्रम्	५.	हजार (दशलाख)	दिव्यान्	११.	परलोक के
अहत	७.	पूर्ण	च	१०.	और
ओजसः ।	८.	बलवान् रहकर	अनुग्रहात्	२.	कृपा से (तुम लोग)
भौमान्	९.	इस लोक के	मम ॥	१.	मेरी

श्लोकार्थ—मेरी कृपा से तुम लोग देवताओं के हजारों के हजार (दश लाख) वर्षों तक पूर्ण बलवान् रहकर इस लोक के और परलोक के भोगों का अवश्य भोग करोगे ॥

अष्टादशः श्लोकः

अथ मय्यनपायिन्या भक्त्या पक्वगुणाशयाः ।
उपयास्यथ मद्धाम निर्विद्य निरयादतः ॥१८॥

पदच्छेद—

अथ मयि अनपायिन्या भक्त्या पक्व गुण आशयाः ।
उपयास्यथ मद् धाम निर्विद्य निरयात् अतः ॥

शब्दार्थ—

अथ	१.	अन्त में	उपयास्यथ	१३.	प्राप्त करोगे
मयि	२.	मेरी	मद्	११.	मेरे
अनपायिन्या	३.	अविचल	धाम	१२.	परमधाम को
भक्त्या	४.	भक्ति से	निर्विद्य	१०.	निर्लिप्त होकर
पक्व	७.	जल जायेंगे (तथा)	निरयात्	८.	नरक तुल्य
गुण	६.	कामादि दोष	अतः ॥	९.	सांसारिक भोगों से
आशयाः ।	५.	तुम्हारे चित्त के			

श्लोकार्थ—अन्त में मेरी अविचल भक्ति से तुम्हारे चित्त के कामादि दोष जल जायेंगे तथा नरक तुल्य सांसारिक भोगों से निर्लिप्त होकर मेरे परम धाम को प्राप्त करोगे ॥

एकोनविंशः श्लोकः

गृहेष्वाविशतां चापि पुंसां कुशलकर्मणाम् ।
मद्वार्तायातयामानां न बन्धाय गृहा मताः ॥१९॥

पदच्छेद— गृहेषु आविशताम् च अपि पुंसाम् कुशल कर्मणाम् ।
मद् वार्ता यातयामानाम् न बन्धाय गृहाः मताः ॥

शब्दार्थ—

गृहेषु	१.	गृहस्थाश्रम में	मद्	६.	मेरी
आविशताम्	२.	रहने वाले	वार्ता	७.	कथा में
च	५.	और	यातयामानाम्	८.	समय बिताने वाले
अपि	११.	भी	न	१३.	नहीं
पुंसाम्	९.	लोगों को	बन्धाय	१२.	बन्धन
कुशल	४.	समर्पित करने वाले	गृहाः	१०.	गृहस्थाश्रम में रहते हुये
कर्मणाम् ।	३.	मुझमें कर्म	मताः ॥	१४.	होता है

श्लोकार्थ—गृहस्थाश्रम में रहने वाले मुझमें कर्म समर्पित करने वाले और मेरी कथा में समय बिताने वाले लोगों को गृहस्थाश्रम में रहते हुये भी बन्धन नहीं होता है ॥

विंशः श्लोकः

नव्यवद्धृदये यज्ज्ञो ब्रह्मैतद्ब्रह्मवादिभिः ।
न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतो गताः ॥२०॥

पदच्छेद— नव्यवद् हृदये यत्ज्ञः ब्रह्म एतद् ब्रह्म वादिभिः ।
न मुह्यन्ति न शोचन्ति न हृष्यन्ति यतः गताः ॥

शब्दार्थ—

नव्यवद्	७.	नित्य नये रूप से	न	११.	नहीं
हृद्	६.	हृदय में	मुह्यन्ति	१२.	मोहित होते हैं
अये	८.	प्रकट होता हूँ	न	१३.	नहीं
यत्	१.	जिस कथा-श्रवण से	शोचन्ति	१४.	सोच करते हैं
ज्ञः	२.	मैं सर्वज्ञ	न	१५.	नहीं
ब्रह्म	३.	ब्रह्म	हृष्यन्ति	१६.	प्रसन्न होते हैं
एतद्	५.	इस श्रोता है	यतः	९.	जिस मुझ परमात्मा को
ब्रह्मवादिभिः ।	४.	ब्रह्मवादी वक्ताओं के द्वारा	गताः ॥	१०.	पाने वाले ज्ञानी जन

श्लोकार्थ—जिस कथा-श्रवण से मैं सर्वज्ञ ब्रह्म ब्रह्मवादी वक्ताओं के द्वारा इस श्रोता के हृदय में प्रकट होता हूँ । जिस मुझ परमात्मा को पाने वाले ज्ञानी जन मोहित नहीं होते हैं, सोच नहीं करते हैं, प्रसन्न नहीं होते हैं ॥

एकविंशः श्लोकः

मैत्रेय उवाच—एवं ब्रुवाणं पुरुषार्थभाजनं जनार्दनं प्राञ्जलयः प्रचेतसः ।
तद्दर्शनध्वस्ततमोरजोमला गिरागृणन् गद्गदया सुहृत्तमम् ॥२१॥

पदच्छेद—एवम् ब्रुवाणम् पुरुषार्थ भाजनम् जनार्दनम् प्राञ्जलयः प्रचेतसः ।
तद् दर्शन ध्वस्त तमः रजः मला गिरा अगृणन् गद्गदया सुहृत्तमम् ॥

शब्दार्थ—

एवम्	११.	इस प्रकार	दर्शन	६.	दर्शन से (प्रचेताओं के)
ब्रुवाणम्	१२.	कहते हुये श्री हरि की	ध्वस्त	९.	दूर हो गये थे
पुरुषार्थ	२.	सारे पुरुषार्थों के	तमः रजः	७.	तमोगुण रजोगुण के
भाजनम्	३.	एक मात्र आश्रय (और)	मलाः	८.	दोष
जनार्दनम्	१.	भगवान् श्री हरि	गिरा	१५.	वाणी में
प्राञ्जलयः	१३.	हाथ जोड़ कर	अगृणन्	१६.	स्तुति करने लगे
प्रचेतसः ।	१०.	वे प्रचेता गण	गद्गदया	१४.	प्रेम भरी
तद्	५.	उनके	सुहृत्तमम् ॥	४.	परम हितैषी हैं

श्लोकार्थ—भगवान् श्री हरि सारे पुरुषार्थों के एक मात्र आश्रय और परम हितैषी हैं । उनके दर्शन से प्रचेताओं के तमोगुण और रजोगुण के दोष दूर हो गये थे । वे प्रचेता गण इस प्रकार कहते हुये श्री हरि की हाथ जोड़कर प्रेमभरी वाणी में स्तुति करने लगे ।

द्वाविंशः श्लोकः

प्रचेतस ऊचुः—नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय ।
मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगताध्वने नमः ॥२२॥

पदच्छेद— नमो नमः क्लेशविनाशनाय निरूपित उदार गुण आह्वयाय ।
मनः वचः वेग पुरः जवाय सर्व अक्ष मार्गैः अगत अध्वने नमः ॥

शब्दार्थ—

नमोनमः	७.	आपको बार-बार प्रणाम है	वेग	११.	गति से भी
क्लेश	१.	कष्ट को	पुरः	१२.	अधिक (हैं तथा)
विनाशाय	२.	दूर करने वाले	जवाय	८.	आपकी गति
निरूपित	६.	वेद में वर्णित हैं (आप)	सर्व	१४.	सभी
उदार	३.	आपके उदार	अक्ष	१५.	इन्द्रियों की
गुण	४.	गुणों (और)	मार्गैः	१६.	शक्ति से
आह्वयाय ।	५.	नामों की महिमा	अगत	१७.	परे है
मनः	९.	मन (और)	अध्वने	१३.	आपका स्वरूप
वचः	१०.	वाणी की	नमः	१८.	आपको प्रणाम है

श्लोकार्थ—हे प्रभो ! कष्ट को दूर करने वाले आपके उदार गुणों और नामों की महिमा वेद में वर्णित है । अतः आपको बार-बार प्रणाम है । आपकी गति मन और वाणी की गति से भी अधिक है तथा आपका स्वरूप सभी इन्द्रियों की शक्ति से परे हैं । आपको प्रणाम है ।

त्रयोविंशः श्लोकः

शुद्धाय शान्ताय नमः स्वनिष्ठया मनस्यपार्थं विलसद्द्वयाय ।
नमो जगत्स्थानलयोदयेषु गृहीतमायागुणविग्रहाय ॥२३॥

पदच्छेद—

शुद्धाय शान्ताय नमः स्वनिष्ठया मनसि अपार्थम् विलसद् द्वयाय ।
नमः जगत् स्थान लय उदयेषु गृहीत माया गुण विग्रहाय ।

शब्दार्थ—

शुद्धाय	३.	नित्य शुद्ध और	नमः	१८.	आप को नमस्कार है
शान्ताय	४.	शान्त है (तथा)	जगत्	१०.	आप जगत् की
नमः	६.	आप को नमस्कार है	स्थान	१२.	स्थिति और
स्व	१.	अपने स्वरूप में	लय	१३.	संहार के लिये
निष्ठया	२.	स्थित रहने के कारण	उदयेषु	११.	उत्पत्ति
मनसि	५.	मन के कारण	गृहीत	१६.	स्वीकार करके
अपार्थम्	६.	(आप में हमें) मिथ्या	माया	१४.	माया के
विलसद्	८.	प्रतीति होती है	गुण	१५.	गुणों को
द्वयाय ।	७.	द्वैतभाव की	विग्रहाय ।।	१७.	त्रिदेवरूप को धारण करते हैं

श्लोकार्थ—अपने स्वरूप में स्थित रहने के कारण आप में हमें मिथ्या द्वैतभाव की प्रतीति होती है । आपको नमस्कार है । आप जगत् की उत्पत्ति, स्थिति और संहार के लिये माया के गुणों को स्वीकार करके त्रिदेव रूप को धारण करते हैं । आपको नमस्कार है ।

चतुर्विंशः श्लोकः

नमो विशुद्धसत्त्वाय हरये हरिमेधसे ।
वासुदेवाय कृष्णाय प्रभवे सर्वसात्वताम् ॥२४॥

पदच्छेद—

नमः विशुद्ध सत्त्वाय हरये हरि मेधसे ।
वासुदेवाय कृष्णाय प्रभवे सर्व सात्वताम् ॥

शब्दार्थ—

नमः	१०.	प्रणाम है	वासुदेवाय	७.	वसुदेव के पुत्र
विशुद्ध	१.	शुद्ध	कृष्णाय	८.	श्री कृष्ण स्वरूप
सत्त्वाय	२.	सत्त्वगुण वाले	प्रभवे	६.	स्वामी
हरये	९.	श्री हरि को	सर्व	४.	सभी
हरिमेधसे ।	३.	भवभय हारी बुद्धि वाले	सात्वताम् ॥	५.	प्राणियों के

श्लोकार्थ—शुद्ध सत्त्वगुण वाले, भव-भय हारी बुद्धि वाले, सभी प्राणियों के स्वामी वसुदेव के पुत्र श्री कृष्ण स्वरूप श्री हरि को प्रणाम है ॥

पञ्चविंशः श्लोकः

नमः कमलनाभाय नमः कमलमालिने ।
नमः कमलपादाय नमस्ते कमलेक्षण ॥२५॥

पदच्छेद—

नमः कमल नाभाय नमः कमल मालिने ।
नमः कमल पादाय नमः ते कमल ईक्षण ॥

शब्दार्थ—

नमः	३. नमस्कार है	नमः	९. नमस्कार है
कमल	२. कमल वाले (आपको)	कमल	७. कमल के समान
नाभाय	१. नाभि में	पादाय	८. चरण वाले (आपको)
नमः	६. नमस्कार है	नमः	१२. नमस्कार है
कमल	४. कमलों की	ते	११. आप को
मालिने ।	५. मालाओं वाले (आपको)	कमल ईक्षण ॥	१०. कमल नयन हे प्रभो

श्लोकार्थ—नाभि में कमल वाले आपको नमस्कार है। कमलों की मालाओं वाले आपको नमस्कार है। कमल के समान चरण वाले आपको नमस्कार है। कमल नयन हे प्रभो! आपको नमस्कार है।

षड्विंशः श्लोकः

नमः कमलकिञ्जल्कपिशङ्गामलवाससे ।
सर्वभूतनिवासाय नमोऽयुङ्क्ष्महि साक्षिणे ॥२६॥

पदच्छेद—

नमः कमल किञ्जल्क पिशङ्ग अमल वाससे ।
सर्व भूत निवासाय नमः अयुङ्क्ष्महि साक्षिणे ॥

शब्दार्थ—

नमः	६. (आपको) नमस्कार है	सर्वभूत	७. सभी प्राणियों में
कमल	१. कमल के	निवासाय	८. रहने वाले (और)
किञ्जल्क	२. पराग के समान	नमः	१०. (आपको) प्रणाम
पिशङ्ग	३. पीले	अयुङ्क्ष्महि	११. करते है
अमल	४. निर्मल	साक्षिणे ॥	९. सबके साक्षी
वाससे ।	५. वस्त्रों वाले		

श्लोकार्थ—कमल के पराग के समान पीले निर्मल वस्त्रों वाले आपको प्रणाम है। सभी प्राणियों में रहने वाले और सबके साक्षी आपको (हम) प्रणाम करते हैं ॥

सप्तविंशः श्लोकः

रूपं भगवता त्वेतदशेषक्लेशसंक्षयम् ।
आविष्कृतं नः क्लिष्टानां किमन्यदनुकम्पितम्॥२७॥

पदच्छेद—

रूपम् भगवता तु एतद् अशेष क्लेश संक्षयम् ।
आविष्कृतम् नः क्लिष्टानाम् किम् अन्यद् अनु कम्पितम् ॥

शब्दार्थ—

रूपम्	५.	स्वरूप	आविष्कृतम्	६.	प्रकट किया है
भगवता	१.	भगवान् श्री हरि ने	नः	३.	हमारे लिये
तु	७.	वह	क्लिष्टानाम्	२.	कष्टों से घिरे
एतद्	४.	(जो) यह	किम्	१२.	क्या चाहिये
अशेष क्लेश	८.	सम्पूर्ण कष्टों को	अन्यद्	११.	अलावा (और)
संक्षयम् ।	९.	दूर करने वाला है	अनुकम्पितम् ॥	१०.	इस अनुकम्पा के

श्लोकार्थ—भगवान् श्री हरि ने कष्टों से घिरे हमारे लिये जो यह स्वरूप प्रकट किया है वह सम्पूर्ण कष्टों को दूर करने वाला है । हमें इस अनुकम्पा के अलावा और क्या चाहिये ॥ (अर्थात कुछ भी नहीं)

अष्टाविंशः श्लोकः

एतावत्त्वं हि विभुभिर्भाव्यं दीनेषु वत्सलैः ।
यदनुस्मर्यते काले स्वबुद्ध्याभद्ररन्धन ॥२८॥

पदच्छेद—

एतावत्त्वम् हि विभुभिः भाव्यम् दीनेषु वत्सलैः ।
यद् अनुस्मर्यंते काले स्व बुद्ध्या अभद्र रन्धन ॥

शब्दार्थ—

एतावत्त्वम्	६.	इतना	यद्	९.	कि वे
हि	७.	ही	अनुस्मर्यंते	१२.	स्मरण करते रहें
विभुभिः	४.	स्वामियों को	काले	१०.	उचित समय पर
भाव्यम्	८.	करना चाहिये	स्व	११.	अपनी
दीनेषु	५.	दीनों पर	बुद्धया	१२.	बुद्धि से सेवकों का
वत्सलैः ।	३.	दयालु	अभद्र	१.	अमङ्गल
			रन्धन ॥	२.	हारी हे भगवन्

श्लोकार्थ— अमङ्गल हारी हे भगवन् ! दयालु स्वामियों को दीनों पर इतना ही करना चाहिये कि वे उचित समय पर अपनी बुद्धि से सेवकों का स्मरण करते रहें ॥

एकोनत्रिंशः श्लोकः

येनोपशान्तिर्भूतानां क्षुल्लकानामपीहताम् ।
अन्तर्हितोऽन्तर्हृदये कस्मान्नो वेद नाशिषः ॥२९॥

पदच्छेद —

येन उपशान्तिः भूतानाम् क्षुल्लकानाम् अपि ईहताम् ।
अन्तर्हितः अन्तर्हृदये कस्मात् नः वेद नः आशिषः ॥

शब्दार्थ—

येन	१. आपके जिस स्मरण से		अन्तर्हितः	७.	छिपे हुये हैं (अतः)
उपशान्तिः	२. सुख प्राप्त होता है		अन्तर्हृदये	६.	हृदय के अन्दर
भूतानाम्	४. प्राणियों के		कस्मात्	११.	कैसे
क्षुल्लकानाम्	३. आप क्षुद्र		नः	९.	हम लोगों के
अपि	५. भी		वेद	१३.	जानते हैं
ईहताम् ।	८. इच्छा रखने वाले		न	१२.	नहीं
			आशिषः ॥	१०.	मनोरथों को (आप)

श्लोकार्थ—आपके जिस स्मरण से सुख प्राप्त होता है। आप क्षुद्र प्राणियों के भी हृदय के अन्दर छिपे हुये हैं। अतः इच्छा रखने वाले हम लोगों के मनोरथों को आप कैसे नहीं जानते हैं ॥

त्रिंशः श्लोकः

असावेव वरोऽस्माकमीप्सितो जगतः पते ।
प्रसन्नो भगवान् येषामपवर्गगुरुर्गतिः ॥३०॥

पदच्छेद—

असौ एव वरः अस्माकम् ईप्सितः जगतः पते ।
प्रसन्नः भगवान् येषाम् अपवर्गः गुरुः गतिः ॥

शब्दार्थ—

असौ एव	७. यही		प्रसन्नः	५.	प्रसन्न रहें
वरः	८. वरदान		भगवान्	४.	भगवान् श्री हरि
अस्माकम्	६. हमें		येषाम्	३.	हम लोगों पर
ईप्सितः	९. चाहिये (क्योंकि वे)		अपवर्ग	१०.	मोक्ष मार्ग को
जगतः	१. संसार के		गुरुः	११.	दिखाने वाले
पते ।	२. स्वामी हे प्रभो		गतिः ॥	१२.	मोक्ष स्वरूप है

श्लोकार्थ—संसार के स्वामी हे प्रभो ! हम लोगों पर भगवान् श्री हरि प्रसन्न रहें। हमें यही वरदान चाहिये। क्योंकि वे मोक्ष मार्ग को दिखाने वाले मोक्ष-स्वरूप हैं।

एकत्रिंशः श्लोकः

वरं वृणीमहेऽथापि नाथ त्वत्परतः परात् ।
न ह्यन्तस्त्वद्विभूतीनां सोऽनन्त इति गीयसे ॥३१॥

पदच्छेद—

वरम् वृणीमहे अथापि नाथ त्वत् परतः परात् ।
न हि अन्तः त्वद् विभूतीनाम् सः अनन्तः इति गीयसे ॥

शब्दार्थ—

वरम्	६	वरदान	न हि	१०.	नहीं हैं
वृणीमहे	७.	माँगते हैं	अन्तः	९.	अन्त
अथापि	२.	फिर भी (हम)	त्वद्विभूतीनाम्	८.	आपकी विभूतियों क
नाथ	१.	हे स्वामिन्	सः	११.	इसीलिये आप
त्वत्	५.	आप से	अनन्तः	१२.	अनन्त
परतः	३	परम कारण से भी	इति	१३.	नाम से
परात् ।	४.	परे	गीयसे ॥	१४.	कहे जाते हैं

श्लोकार्थ—हे स्वामिन् ! फिर भी हम परम कल्याण से भी परे आप से वरदान माँगते हैं । आपकी विभूतियों का अन्त नहीं है । इसीलिये आप अनन्त नाम से कहे जाते हैं ॥

द्वात्रिंशः श्लोकः

पारिजातेऽञ्जसा लब्धे सारङ्गोऽन्यन्न सेवते ।
त्वदङ्घ्रिमूलमासाद्य साक्षात्किं किं वृणीमहि ॥३२॥

पदच्छेद—

पारिजाते अञ्जसा लब्धे सारङ्गः अन्यत् न सेवते ।
त्वद् अङ्घ्रि मूलम् आसाद्य साक्षात् किम् किम् वृणीमहे ॥

शब्दार्थ—

पारिजाते	१.	कल्प वृक्ष के	त्वद्	९.	(उसी प्रकार) आपके
अञ्जसा	२.	सुख पूर्वक	अङ्घ्रि	१०.	चरणों के
लब्धे	३.	सुलभ हो जाने पर (जैसे)	मूलम्	११.	तलवे को
सारङ्गः	४.	भौंरा	आसाद्य	१२.	प्राप्त करके.
अन्यत्	५.	दूसरे पुष्पों पर	साक्षात्	८.	प्रत्यक्ष
न	६.	नहीं	किम्-किम्	१३.	क्या-क्या
सेवते ।	७.	जाता है	वृणीमहे ॥	१४.	वरदान मांगे

श्लोकार्थ—कल्प वृक्ष के सुख पूर्वक प्राप्त हो जाने पर जैसे भौंरा दूसरे पुष्पों पर नहीं जाता है । प्रत्यक्ष उसी प्रकार आपके चरणों के तलवे को प्राप्त करके क्या-क्या वरदान मांगें ॥

त्रयस्त्रिंशः श्लोकः

यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः।
तावद्भवत्प्रसङ्गानां सङ्गः स्यान्नो भवे भवे ॥३३॥

पदच्छेद—

यावत् ते मायया स्पृष्टाः भ्रमामः इह कर्मभिः।
तावद् भवत् प्रसङ्गानाम् सङ्गः स्यात् नः भवे भवे ॥

शब्दार्थ—

यावत्	५.	जब-तक	तावद्	८.	तब-तक
ते	२.	आपकी	भवत्	११.	आप के
मायया	३.	माया में	प्रसङ्गानाम्	१२.	भक्तों का
स्पृष्टाः	४.	फंसकर (हम)	सङ्गः	१३.	सत्सङ्ग
भ्रमामः	७.	घूमते रहे	स्यात्	१४.	मिलता रहे
इह	६.	इस संसार में	नः	१०	हमें
कर्मभिः।	१.	कर्मों के कारण	भवे भवे ॥	९.	प्रत्येक-जन्म में

श्लोकार्थ—कर्मों के कारण आपकी माया में फंसकर हम जब-तक इस संसार में घूमते रहें। तब-तक प्रत्येक जन्म में हमें आपके भक्तों का सत्सङ्ग मिलता रहे ॥

चतुस्त्रिंशः श्लोकः

तुलयाम लवेनापि न स्वर्गं नापुनर्भवम्।
भगवत्सङ्गिसङ्गस्य मर्त्यानां किमुताशिषः ॥३४॥

पदच्छेद—

तुलयाम लवेन अपि न स्वर्गम् न अपुनर्भवम्।
भगवत् सङ्गि सङ्गस्य मर्त्यानाम् किमुत आशिषः ॥

शब्दार्थ—

तुलयाम	९.	तुलना करते हैं	भगवत्	१.	भगवान् के
लवेन अपि	४.	एक क्षण से भी	सङ्गी	२.	भक्तों के
न	५.	नहीं	सङ्गस्य	३.	सत्संग के
स्वर्गम्	६.	स्वर्ग (और)	मर्त्यानाम्	१०.	सामान्य मनुष्यों की तो
न	७.	नहीं	किमुत	१२.	बात ही क्या है
पुनर्भवम्।	८.	मोक्ष को	आशिषः ॥	११.	राज्यादि कामनाओं को

श्लोकार्थ—भगवान् के भक्तों के सत्संग के एक क्षण से भी नहीं स्वर्ग और नहीं मोक्ष की तुलना करते हैं, सामान्य मनुष्यों की तो राज्यादि कामनाओं की बात ही क्या है ॥

पञ्चत्रिंशः श्लोकः

यत्रेड्यन्ते कथा मृष्टास्तृष्णायाः प्रशमो यतः।
निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ॥३५॥

पदच्छेद—

यत्र ईड्यन्ते कथाः मृष्टाः तृष्णायाः प्रशमः यतः।
निर्वैरम् यत्र भूतेषु न उद्वेगः यत्र कश्चन ॥

शब्दार्थ—

यत्र	१.	जिस सत्सङ्गति में	निर्वैरम्	१०.	प्रेम, होता है (और)
ईड्यन्ते	४.	प्रशंसा होती है	यत्र	८.	जहाँ
कथाः	३.	कथाओं की	भूतेषु	९.	प्राणियों में
मृष्टाः	२.	मधुर	न	१४.	नहीं होता है
तृष्णायाः	६.	इच्छा की	उद्वेगः	१३.	भय
प्रशमः	७.	शान्ति होती है	यत्र	११.	जहाँ
यतः।	५.	जिन कथाओं से	कश्चन ॥	१२.	किसी प्रकार का

श्लोकार्थ—जिस सत्सङ्गति में मधुर कथाओं की प्रशंसा होती है, जिन कथाओं से इच्छा की शान्ति होती है जहाँ प्राणियों में प्रेम होता है और जहाँ किसी प्रकार का भय नहीं होता है ॥

षट्त्रिंशः श्लोकः

यत्र नारायणः साक्षाद्भगवान्न्यासिनां गतिः।
संस्तूयते सत्कथासु मुक्तसङ्गैः पुनः पुनः ॥३६॥

पदच्छेद—

यत्र नारायणः साक्षात् भगवान् न्यासिनाम् गतिः।
संस्तूयते सत् कथासु मुक्त सङ्गैः पुनः पुनः ॥

शब्दार्थ—

यत्र	१.	जिन	संस्तूयते	१२.	स्तुति की जाती है
नारायणः	९.	नारायण की	सत्कथासु	२.	उत्तम कथाओं में
साक्षात्	७.	प्रत्यक्ष	मुक्त	३.	निष्काम
भगवान्	८.	भगवान्	सङ्गैः	४.	भक्तों के द्वारा
न्यासिनाम्	५.	सन्यासियों के	पुनः	१०.	बार
गतिः।	६.	शरण्य	पुनः ॥	११.	बार

श्लोकार्थ—जिन उत्तम कथाओं में निष्काम भक्तों के द्वारा संन्यासियों के शरण्य प्रत्यक्ष भगवान् नारायण की बार-बार स्तुति की जाती है ॥

सप्तत्रिंशः श्लोकः

तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया ।
भीतस्य किं न रोचेत तावकानां समागमः ॥३७॥

पदच्छेद— तेषाम् विचरताम् पद्भ्याम् तीर्थानाम् पावन इच्छया ।
भीतस्य किम् न रोचेत तावकानाम् समागमः ॥

शब्दार्थ—

तेषाम्	६.	उन	भीतस्य	१०.	संसार से डरे हुये को
विचरताम्	५.	विचरने वाले	किम्	९.	क्या
पद्भ्याम्	४.	पैदल	न	११.	नहीं
तीर्थानाम्	१.	तीर्थों को	रोचेत	१२	अच्छा लगेगा
पावन	२.	पवित्र करने की	तावकानाम्	७.	आपके भक्तों का
इच्छया ।	३.	इच्छा से	समागमः ॥	८.	सत्सङ्ग

श्लोकार्थ—तीर्थों को पवित्र करने की इच्छा से पैदल विचरने वाले उन आपके भक्तों का सत्सङ्ग क्या संसार में डरे हुये को नहीं अच्छा लगेगा ॥

अष्टात्रिंशः श्लोकः

वयं तु साक्षाद्भगवन् भवस्य प्रियस्य सख्युः क्षणसङ्गमेन ।
सुदुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य गतिं गताः स्मः ॥३८॥

पदच्छेद— वयम् तु साक्षात् भगवन् भवस्य प्रियस्य सख्युः क्षण सङ्गमेन ।
सुदुश्चिकित्स्यस्य भवस्य मृत्योः भिषक्तमम् त्वा अद्य गतिम् गताः स्मः ॥

शब्दार्थ—

वयम्	१४.	हम	सुदुश्चिकित्स्यस्य	११.	दुःसाध्य रोग के
तु	७.	ही (हमें आपका)	भवस्य	९.	(आप) जन्म
साक्षात्	८.	प्रत्यक्ष दर्शन हुआ है	मृत्योः	१०.	मरण रूप
भगवन्	१.	हे प्रभो !	भिषक्तमम्	१२.	श्रेष्ठ वैद्य हैं
भवस्य	४.	भगवान् शंकर के	त्वा	१५.	आपकी
प्रियस्य	२.	आपके प्रिय	अद्य	१३.	(अतः) अब
सख्युः	३.	सखा	गतिम्	१६.	शरण में
क्षण	५.	क्षण भर के	गताः	१७.	गये
संगमेन ।	६.	समागम से	स्मः ॥	१८.	हैं

श्लोकार्थ—हे प्रभो ! आपके प्रिय सखा भगवान् शंकर के क्षण भर के समागम से ही हमें आपका प्रत्यक्ष दर्शन हुआ है । आप जन्म मरण रूप दुःसाध्य रोग के श्रेष्ठ वैद्य हैं । अतः अब हम आपकी शरण में गये हैं ॥

एकोनचत्वारिंशः श्लोकः

यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धाश्च सदानुवृत्त्या ।
आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव ॥३९॥

पदच्छेद— यत् नः सुअधीतम् गुरवः प्रसादिताः विप्राः च वृद्धाः च सदा अनुवृत्त्या ।
आर्याः नताः सुहृदः भ्रातरः च सर्वाणि भूतानि अनसूयया एव ॥

शब्दार्थ—

यत्	१.	(हे प्रभो) जो	आर्याः	१३.	श्रेष्ठ पुरुषों
नः सु	२.	हमने भली भाँति	नताः	१८.	वन्दना की है
अधीतम्	३.	अध्ययन किया है	सुहृदः	१४	मित्रों
गुरवः	६.	गुरुजनों	भ्रातरः	१५.	बन्धुजनों (और)
प्रसादिताः	९.	प्रसन्न किया है	च	१०.	एवम्
विप्राः	७.	ब्राह्मणों	सर्वाणि	१६.	सभी
च वृद्धाः	८.	और वृद्धजनों को	भूतानि	१७.	प्राणियों की
च	४.	तथा	अनसूयया	११.	दोषभाव को
सदा अनुवृत्त्या ।	५.	निरन्तर सेवा करके	एव ॥	१२.	त्याग कर

श्लोकार्थ—हे प्रभो ! जो हमने भली भाँति अध्ययन किया है तथा निरन्तर सेवा करके गुरुजनों, ब्राह्मणों और वृद्धजनों को प्रसन्न किया है एवम् दोषभाव को त्याग कर श्रेष्ठ पुरुषों, मित्रों, बन्धुजनों और सभी प्राणियों की वन्दना की है ॥

चत्वारिंशः श्लोकः

यन्नः सुतप्तं तप एतदीश निरन्धसां कालमदभ्रमप्सु ।
सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय ॥४०॥

पदच्छेद— यत् नः सुतप्तम् तप एतद्ईश निरन्धसाम् कालम् अदभ्रम् अप्सु ।
सर्वम् तद् एतद् पुरुषस्य भूम्नः वृणीमहे ते परितोषणाय ॥

शब्दार्थ—

यत् नः	२.	जो हमने	अप्सु ।	६.	जल में
सुतप्तम्	९.	अनुष्ठान किया है	सर्वम्	११.	सब
तपः	८.	तपस्या का	तद् एतद्	१०.	सो यह
एतद्	७.	इस	पुरुषस्य	१४.	पुरुषोत्तम के
ईश	१.	हे स्वामिन्	भूम्नः	१२.	सर्व व्यापक
निरन्धसाम्	३.	अन्नादि छोड़कर	वृणीमहे	१६.	यही वर माँगते हैं
कालम्	५.	समय तक	ते	१३.	आप
अदभ्रम्	४	लम्बे	परितोषणाय ॥	१५.	सन्तोष का कारण

श्लोकार्थ—हे स्वामिन् ! जो हमने अन्नादि छोड़कर लम्बे समय तक जल में इस तपस्या का अनुष्ठान किया है, सो यह सब सर्व व्यापक आप पुरुषोत्तम के सन्तोष का कारण हो । यही वर माँगते हैं ॥

एकचत्वारिंशः श्लोकः

मनुः स्वयम्भूर्भगवान् भवश्च येऽन्ये तपोज्ञानविशुद्धसत्त्वाः ।
अदृष्टपारा अपि यन्महिम्नः स्तुवन्त्यथो त्वाऽऽत्मसमं गृणीमः ॥४१॥

पदच्छेद— मनुः स्वयम्भूः भगवान् भवः च ये अन्ये तपः ज्ञान विशुद्ध सत्त्वाः ।
अदृष्ट पाराः अपि यत् महिम्नः स्तुवन्ति अथो त्वा आत्मसमम् गृणीमः ॥

शब्दार्थ—

मनुः	५.	स्वायम्भुव मनु	अदृष्ट	३.	न पाकर
स्वयम्भूः	६.	ब्रह्मा जी	पाराः	२.	पार
भगवान् भवः	७.	भगवान् शिव	अपि	४.	भी
च	८.	तथा	यत् महिम्नः	१.	जिस आपकी महिमा का
ये अन्ये	१३.	जो दूसरे पुरुष हैं (वे)	स्तुवन्ति	१४.	स्तुति करते हैं
तपः	९.	तपस्या (और)	अथो	१५.	अतः (हम भी)
ज्ञान	१०.	ज्ञान से	त्वा	१७.	आपका
विशुद्ध	११.	शुद्ध	आत्मसमम्	१६.	अपनी बुद्धि के अनुसार
सत्त्वाः ।	१२.	चित्त वाले	गृणीमः ॥	१८.	यश गाते हैं

श्लोकार्थ— जिस आपकी महिमा का पार न पाकर भी स्वायम्भुव मनु, ब्रह्माजी, भगवान् शिव तथा तपस्या और ज्ञान से शुद्ध चित्त वाले जो दूसरे पुरुष हैं वे स्तुति करते हैं । अतः हम भी अपनी बुद्धि के अनुसार आपका यश गाते हैं ॥

द्विचत्वारिंशः श्लोकः

नमः समाय शुद्धाय पुरुषाय पराय च ।
वासुदेवाय सत्त्वाय तुभ्यं भगवते नमः ॥४२॥

पदच्छेद— नमः समाय शुद्धाय पुरुषाय पराय च ।
वासुदेवाय सत्त्वाय तुभ्यम् भगवते नमः ॥

शब्दार्थ—

नमः	६.	आपको नमस्कार है	वासुदेवाय	१०.	वासुदेव को
समाय	१.	सर्वत्र समान	सत्त्वाय	८.	सत्त्व मूर्ति
शुद्धाय	२.	शुद्ध स्वरूप	तुभ्यम्	७.	आप
पुरुषाय	५.	पुरुष हैं (अतः)	भगवते	९.	भगवान्
पराय	४.	परम	नमः ॥	११.	नमस्कार
च ।	३.	और			

श्लोकार्थ—हे भगवन् ! आप सर्वत्र समान, शुद्ध स्वरूप और परम पुरुष हैं । अतः आपको नमस्कार है । आप सत्त्व मूर्ति भगवान् वासुदेव को नमस्कार है ॥

त्रिचत्वारिंशः श्लोकः

मैत्रेय उवाच—इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्यवत्सलः।
अनिच्छतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः ॥४३॥

पदच्छेद— इति प्रचेतोभिः अभिष्टुतः हरिः प्रीतः तथा इति आह शरण्य वत्सलः।
अनिच्छताम् यानम् अतृप्त चक्षुषाम् ययौ स्वधाम अनपवर्ग वीर्यः ॥

शब्दार्थ—

इति	२.	इस प्रकार	वत्सलः।	५.	पालक
प्रचेतोभिः	१.	प्रचेताओं के	अनिच्छताम्	१६.	नहीं चाहते थे (तथापि वे)
अभिष्टुतः	३.	स्तुति करने पर	यानम्	१५.	(अतः उन्हें) जाने देना
हरिः	६.	श्री हरि ने	अतृप्त	१४.	तृप्त नहीं हुये थे
प्रीतः	७.	प्रसन्न होकर	चक्षुषाम्	१३.	प्रचेताओं के नेत्र
तथा	८.	तथास्तु	ययौ	१८.	चले गये
इति	९.	यह	स्वधाम	१७.	अपने परमधाम को
आह	१०.	कहा	अनपवर्ग	११.	अबाध
शरण्य	४.	शरणागत	वीर्यः ॥	१२.	प्रभावशाली श्री हरि के दर्शनों से

श्लोकार्थ—प्रचेताओं के इस प्रकार स्तुति करने पर शरणागत वत्सल भगवान् श्री हरि ने प्रसन्न होकर तथास्तु यह कहा। अबाध प्रभावशाली श्री हरि के दर्शनों से प्रचेताओं के नेत्र तृप्त नहीं हुये थे, अतः उन्हें जाने देना नहीं चाहते थे, तथापि वे अपने परमधाम को चले गये॥

चतुश्चत्वारिंशः श्लोकः

अथ निर्याय सलिलात्प्रचेतस उदन्वतः।
वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोच्छ्रितैः ॥४४॥

पदच्छेद— अथ निर्याय सलिलात् प्रचेतसः उदन्वतः।
वीक्ष्य अकुप्यन् द्रुमैः छन्नाम् गाम् गाम् रोद्धुम् इव उच्छ्रितैः ॥

शब्दार्थ—

अथ	१.	इसके बाद	द्रुमैः	१०.	वृक्षों से
निर्याय	४.	निकल कर	छन्नाम्	१२.	ढकी हुई
सलिलात्	३.	जल से बाहर	गाम्	११.	पृथ्वी को
प्रचेतसः	५.	प्रचेताओं ने	गाम्	७.	स्वर्ग का मार्ग
उदन्वतः।	२.	समुद्र के	रोद्धुम्	८.	रोकने के लिये
वीक्ष्य	१३.	देखकर (उन)	इव	६.	मानों
अकुप्यन्	१४.	उन पर क्रोध किया	उच्छ्रितैः ॥	९.	बढ़े हुये

श्लोकार्थ—इसके बाद समुद्र के जल से बाहर निकल कर प्रचेताओं ने मानों स्वर्ग का मार्ग रोकने के लिये बढ़े हुये वृक्षों से पृथ्वी को ढकी हुई देखकर उन वृक्षों पर क्रोध किया॥

पञ्चचत्वारिंशः श्लोकः

ततोऽग्निमारुतौ राजन्नमुञ्चन्मुखतो रुषा ।
महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये ॥४५॥

पदच्छेद—

ततः अग्नि मारुतौ राजन् अमुञ्चन् मुखतः रुषा ।
महीम् निर्वीरुधम् कर्तुम् संवर्तकः इव अत्यये ॥

शब्दार्थ—

ततः	२.	तब (उन्होंने)	महीम्	३.	पृथ्वी को
अग्नि	८.	अग्नि (और)	निर्वीरुधम्	४.	वृक्ष लतादि से रहित
मारुतौ	९.	वायु को	कर्तुम्	५.	कर देने के लिये
राजन्	१.	हे विदुर जी	संवर्तकः	१३.	कालाग्नि रुद्र (छोड़ते हैं)
अमुञ्चन्	१०.	(ऐसे) छोड़ा	इव	११.	जैसे
मुखतः	७.	अपने मुख से	अत्यये ॥	१२.	प्रलय काल में
रुषा ।	६.	क्रोध करके			

श्लोकार्थ—हे विदुर जी ! तब उन्होंने पृथ्वी को वृक्ष लतादि से रहित कर देने के लिये क्रोध करके अपने मुख से अग्नि और वायु को ऐसे छोड़ा जैसे प्रलय काल में कालाग्नि छोड़ते हैं ॥

षट्चत्वारिंशः श्लोकः

भस्मसात्क्रियमाणांस्तान्द्रुमान् वीक्ष्य पितामहः ।
आगतः शमयामास पुत्रान् बर्हिष्मतो नयैः ॥४६॥

पदच्छेद—

भस्मसात् क्रियमाणान् तान् द्रुमान् वीक्ष्य पितामहः ।
आगतः शमयामास पुत्रान् बर्हिष्मतः नयैः ॥

शब्दार्थ—

भस्मसात्	३.	राख	आगतः	७.	वहाँ आये
क्रियमाणान्	४.	बनाते	शमयामास	११.	शान्त किया
तान्	१.	उन	पुत्रान्	१०.	पुत्रों को
द्रुमान्	२.	वृक्षों को (जलाकर)	बर्हिष्मतः	९.	प्राचीनबर्हि के
वीक्ष्य	५	देख कर	नयैः ॥	८.	(और) युक्ति से
पितामहः ।	६.	ब्रह्मा जी			

श्लोकार्थ—उन वृक्षों को जलाकर राख बनाते देख कर ब्रह्माजी वहाँ पर आये और युक्ति से प्राचीनबर्हि के पुत्रों को शान्त किया ॥

सप्तचत्वारिंशः श्लोकः

तत्रावशिष्टा ये वृक्षा भीता दुहितरं तदा ।
उज्जह्रुस्ते प्रचेतोभ्य उपदिष्टाः स्वयम्भुवा ॥४७॥

पदच्छेद—

तत्र अवशिष्टाः ये वृक्षाः भीताः दुहितरम् तदा ।
उज्जह्रुः ते प्रचेतोभ्यः उपदिष्टाः स्वयम्भुवा ॥

शब्दार्थ—

तत्र	२.	वहाँ	तदा ।	१.	उस समय
अवशिष्टाः	४.	बचे हुये	उज्जह्रुः	१२.	भेंट किया
ये	३.	जो	ते	६.	वे
वृक्षाः	५.	वृक्ष थे	प्रचेतोभ्यः	१०.	प्रचेताओं के लिये
भीताः	७.	डर कर	उपदिष्टाः	९.	कहने से
दुहितरम्	११	अपनी पुत्री को	स्वयम्भुवा ॥	८.	ब्रह्माजी के

श्लोकार्थ—उस समय वहाँ जो बचे हुये वृक्ष थे वे डरकर ब्रह्माजी के कहने से प्रचेताओं के लिये अपनी पुत्री को भेंट किया

अष्टचत्वारिंशः श्लोकः

ते च ब्रह्मण आदेशान्मारिषामुपयेमिरे ।
यस्यां महदवज्ञानादजन्यजनयोनिजः ॥४८॥

पदच्छेद—

ते च ब्रह्मणः आदेशात् मारिषाम् उपयेमिरे ।
यस्याम् महद् अवज्ञानाद् अजनि अजन योनिजः ॥

शब्दार्थ—

ते	१.	उन प्रचेताओं ने	यस्याम्	११.	जिसके गर्भ से
च	२.	भी	महद्	९.	(महादेव जी का) बड़ा
ब्रह्मणः	३.	ब्रह्माजी के	अवज्ञानाद्	१०.	अपमान करने के कारण
आदेशात्	४.	आदेश से	अजनि	१२.	जन्म लिया
मारिषाम्	५.	उस मरिषा नाम की	अजन	७.	ब्रह्माजी के
उपयेमिरे ।	६.	(कन्या से) विवाह किया	योनिजः ॥	८.	पुत्र दक्ष जी ने

श्लोकार्थ—उन प्रचेताओं ने भी ब्रह्मा जी के आदेश से उस मरिषा नाम की कन्या से विवाह किया । ब्रह्माजी के पुत्र दक्ष जी ने महादेव जी का बड़ा अपमान करने के कारण जिसके गर्भ से जन्म लिया ॥

एकोनपञ्चाशः श्लोकः

चाक्षुषे त्वन्तरे प्राप्ते प्राक्सर्गे कालविद्रुते ।
यः ससर्ज प्रजा इष्टाः स दक्षो दैवचोदितः ॥४९॥

पदच्छेद— चाक्षुषे अन्तरे प्राप्ते प्राक् सर्गे काल विद्रुते ।
यः ससर्ज प्रजाः इष्टाः सः दक्षः दैव चोदितः ॥

शब्दार्थ—

चाक्षुषे	५. चाक्षुष		यः	११.	प्रचेता पुत्र
तु	६. नाम के		ससर्ज	१६.	उत्पन्न किया
अन्तरे	७. मन्वन्तर के		प्रजाः	१५.	प्रजाओं को
प्राप्ते	८. आने पर		इष्टाः	१४.	इच्छित
प्राक्	१. जब पूर्व		सः	१२.	उन
सर्गे	२. सृष्टि		दक्षः	१३.	दक्ष जी ने
काल	३. काल-क्रम से		दैव	९.	भगवान् की
विद्रुते ।	४. नष्ट हो गयी (तब)		चोदितः ॥	१०.	प्रेरणा से

श्लोकार्थ—जब पूर्व सृष्टि काल-क्रम से नष्ट हो गयी तब चाक्षुष नाम के मन्वन्तर के आने पर भगवान् की प्रेरणा से प्रचेता-पुत्र उन दक्ष जी ने इच्छित प्रजाओं को उत्पन्न किया ॥

पञ्चाशः श्लोकः

यो जायमानः सर्वेषां तेजस्तेजस्विनां रुचा ।
स्वयोपादत्त दाक्ष्याच्च कर्मणां दक्षमब्रुवन् ॥५०॥

पदच्छेद— यः जायमानः सर्वेषाम् तेजः तेजस्विनाम् रुचा ।
स्वया उपादत्त दाक्ष्यात् च कर्मणाम् दक्षम् अब्रुवन् ॥

शब्दार्थ—

यः	१. जिन्होंने		स्वया	३.	अपने
जायमानः	२. उत्पन्न होते ही		उपादत्त	८.	छीन लिया था
सर्वेषाम्	५. सभी		दाक्ष्यात्	११.	कुशल होने से
तेजः	७. तेज		च	९.	लोग जिन्हें
तेजस्विनाम्	६. तेजस्वियों का		कर्मणाम्	१०.	कर्म करने में
रुचा ।	४. तेज से		दक्षम्	१२.	दक्ष
			अब्रुवन् ॥	१३.	कहते थे

श्लोकार्थ—जिन्होंने उत्पन्न होते ही अपने तेज से सभी तेजस्वियों का तेज छीन लिया था । लोग जिन्हें कर्म करने में कुशल होने से दक्ष कहते थे ॥

एकपञ्चाशः श्लोकः

तं प्रजासर्गरक्षायामनादिरभिषिच्य च ।
युयोज युयुजेऽन्यांश्च स वै सर्वप्रजापतीन् ॥५१॥

पदच्छेद—

तम् प्रजा सर्ग रक्षायाम् अनादिः अभिषिच्य च ।
युयोज युयुजे अन्यान् च सः वै सर्व प्रजा पतीन् ॥

शब्दार्थ—

तम्	३.	उन दक्ष को	युयोज	७.	लगाया
प्रजा	४.	प्रजाओं की	युयुजे	१४.	नियुक्त किया
सर्ग	५.	सृष्टि (और)	अन्यान्	११.	दूसरे
रक्षायाम्	६.	रक्षा में	च	१०.	मरीचि आदि
अनादिः	१.	ब्रह्मा जी	सः वै	९.	उन्होंने
अभिषिच्य	२.	अभिषेक करके	सर्व	१२.	सारे
च ।	८.	तथा	प्रजापतीन् ॥	१३.	प्रजापतियों को

श्लोकार्थ—ब्रह्मा जी ने अभिषेक करके उन दक्ष को प्रजाओं की सृष्टि और रक्षा में लगाया तथा उन्होंने मरीचि आदि दूसरे सारे प्रजापतियों को नियुक्त किया ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे त्रिंशः अध्यायः ॥३०॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

चतुर्थः स्कन्धः

एकत्रिंशः अध्यायः

प्रथमः श्लोकः

मैत्रेय उवाच—तत उत्पन्नविज्ञाना आश्वधोक्षजभाषितम् ।
स्मरन्त आत्मजे भार्यां विसृज्य प्राव्रजन् गृहात् ॥१॥

पदच्छेद— ततः उत्पन्न विज्ञानाः आशु अधोक्षज भाषितम् ।
स्मरन्तः आत्मजे भार्याम् विसृज्य प्राव्रजन् गृहात् ॥

शब्दार्थ—

ततः	१.	दश लाख दिव्य वर्ष बीत जाने पर	स्मरन्तः	६.	स्मरण करते हुये
उत्पन्न	३.	हुआ (तब उन्होंने)	आत्मजे	७.	अपने पुत्र के पास
विज्ञानाः	२.	(उन प्रचेताओं के) विवेक	भार्याम्	८.	अपनी पत्नी को
आशु	११.	शीघ्र	विसृज्य	९.	छोड़ कर
अधोक्षज	४.	भगवान् श्री हरि के	प्राव्रजन्	१२.	संन्यास ले लिया
भाषितम् ।	५.	वाक्य का	गृहात् ॥	१०.	घर से

श्लोकार्थ—दश लाख दिव्य वर्ष बीत जाने पर जब प्रचेताओं को विवेक हुआ तब उन्होंने भगवान् श्री हरि के वाक्य का स्मरण करते हुये अपनी पत्नी को अपने पुत्र के पास छोड़कर घर से शीघ्र संन्यास ले लिया ॥

द्वितीयः श्लोकः

दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा ।
प्रतीच्यां दिशि वेलायां सिद्धोऽभूद्यत्र जाजलिः ॥२॥

पदच्छेद— दीक्षिताः ब्रह्मसत्रेण सर्वभूतात्म मेधसा ।
प्रतीच्यां दिशि वेलायाम् सिद्धः अभूत् यत्र जाजलिः ॥

शब्दार्थ—

दीक्षिताः	१३.	संकल्प लेकर (बैठ गये)	प्रतीच्याम्	१.	पश्चिम
ब्रह्मसत्रेण	१२.	ब्रह्मोपासना का	दिशि	२.	दिशा से (उस)
सर्व	८.	सभी	वेलायाम्	३.	समुद्र तट पर
भूत	९.	जीवों में	सिद्धः	६.	सिद्धि
आत्मा	१०.	एक ही आत्म तत्त्व है	अभूत्	७.	मिली थी (वहाँ प्रचेता गण)
मेधसः ।	११.	इस प्रकार के ज्ञान से	यत्र	४.	जहाँ
			जाजलिः ॥	५.	जाजलि मुनि को

श्लोकार्थ—पश्चिम दिशा के उस समुद्रतट पर जहाँ जाजलि मुनि को सिद्धि मिली थी, वहाँ प्रचेता-गण सभी जीवों में एक ही आत्मतत्त्व है, इस प्रकार के ज्ञान से ब्रह्मोपासना का संकल्प लेकर बैठ गये ।

तृतीयः श्लोकः

तान्निर्जितप्राणमनोवचोदृशो जितासनान् शान्तसमानविग्रहान् ।
परेऽमले ब्रह्मणि योजितात्मनः सुरासुरेड्यो ददृशे स्म नारदः ॥३॥

पदच्छेद—तान् निर्जित प्राण मनः वचः दृशः जित आसनान् शान्त समान विग्रहान् ।
परे अमले ब्रह्मणि योजित आत्मनः सुर असुर ईड्यः ददृशे स्म नारदः ॥

शब्दार्थ—

तान्	१७.	उन्हें	परे	११.	पर
निर्जित	४.	वश में किया (तदनन्तर)	अमले	१०.	शुद्ध
प्राण	१.	(प्रचेताओं ने) प्राण वायु	ब्रह्मणि	१२.	ब्रह्म में
मनः वचः	२.	मन वाणी और	योजित	१३.	लीनकर दिया (उस समय)
दृशः	३.	दृष्टि को	आत्मनः	९.	अपने चित्त को
जित	६.	सिद्ध करके	सुर	१४.	देवता और
आसनान्	५.	आसन	असुर ईड्यः	१५.	दानवों के पूजनीय
शान्त समान	८.	निश्चल और सीधा रखकर	ददृशे स्म	१८.	देखा था
विग्रहम् ।	७.	शरीर को	नारदः ॥	१६.	देवर्षि नारद ने

श्लोकार्थ—प्रचेताओं ने प्राणवायु, मन, वाणी और दृष्टि को वश में किया । तदनन्तर आसन सिद्ध करके शरीर को निश्चल और सीधा रखकर अपने चित्त को शुद्ध पर ब्रह्म में लीन कर दिया । उस समय देवता और दानवों के पूजनीय देवर्षि नारद ने उन्हें देखा था ॥

चतुर्थः श्लोकः

तमागतं त उत्थाय प्रणिपत्याभिनन्द्य च ।
पूजयित्वा यथादेशं सुखासीनमथाब्रुवन् ॥४॥

पदच्छेद— तम् आगतम् ते उत्थाय प्रणिपत्य अभिनन्द्य च ।
पूजयित्वा यथा आदेशम् सुख आसीनम् अथ अब्रुवन् ॥

शब्दार्थ—

तम्	१.	नारद जी को	पूजयित्वा	१०.	पूजन किया
आगतम्	२.	आया देखकर	यथा	९.	पूर्वक
ते	३.	प्रचेताओं ने	आदेशम्	८.	विधि
उत्थाय	४.	उठकर (उनको)	सुख	१२.	सुख पूर्वक
प्रणिपत्य	५.	प्रणाम	आसीनम्	१३.	बैठ जाने पर
अभिनन्द्य	७.	स्वागत करके	अथ	११.	और उनके
च ।	६.	और	अब्रुवन् ॥	१४.	कहा

श्लोकार्थ—नारद जी को आया देखकर प्रचेताओं ने उठकर उनको प्रणाम और स्वागत करके विधि-पूर्वक पूजन किया और उनके सुख पूर्वक बैठ जाने पर कहा ॥

पञ्चमः श्लोकः

प्रचेतस ऊचः—स्वागतं ते सुरर्षेऽद्य दिष्ट्या नो दर्शनं गतः ।
तव चङ्क्रमणं ब्रह्मन्नभयाय यथा रवेः ॥५॥

पदच्छेद—

स्वागतम् ते सुरर्षे अद्य दिष्ट्या नः दर्शनम् गतः ।
तव चङ्क्रमणम् ब्रह्मन् अभयाय यथा रवेः ॥

शब्दार्थ—

स्वागतम्	३. स्वागत है	गताः ।	८. हुआ है
ते	२. आपका	तव	१२. आपका
सुरर्षे	१. हे देवर्षे	चङ्क्रमणाम्	१३. घूमना
अद्य	४. आज	ब्रह्मन्	९. हे ब्रह्मन्
दिष्ट्या	५. बड़े भाग्य से	अभयाय	१४. अभयदान के लिये (होता है)
नः	६. हमें	यथा	११. समान
दर्शनम्	७. आपका दर्शन	रवेः ॥	१०. सूर्य के

श्लोकार्थ—हे देवर्षे ! आपका स्वागत है । आज बड़े भाग्य से हमें आपका दर्शन हुआ है । हे ब्रह्मन् ! सूर्य के समान आपका घूमना अभयदान के लिये होता है ।

षष्ठः श्लोकः

यदादिष्टं भगवता शिवेनाधोक्षजेन च ।
तद् गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ॥६॥

पदच्छेद—

यद् आदिष्टम् भगवता शिवेन अधोक्षजेन च ।
तद् गृहेषु प्रसक्तानाम् प्रायशः क्षपितम् प्रभो ॥

शब्दार्थ—

यद्	६. जो	तद्	८. उसे (हम)
आदिष्टम्	७. उपदेश दिया था	गृहेषु	९. गृहस्थी में
भगवता	२. भगवान्	प्रसक्तानाम्	१०. फंसे रहने से
शिवेन	३. शिव	प्रायशः	११. लगभग
अधोक्षजेन	५. श्री हरि ने	क्षपितम्	१२. भूल गये हैं
च ।	४. और	प्रभो ॥	१. हे भगवन्

श्लोकार्थ—हे भगवन् ! भगवान् शिव और श्री हरि ने जो उपदेश दिया था, उसे हम गृहस्थी में फंसे रहने से लगभग भूल गये हैं ॥

सप्तमः श्लोकः

तन्नः प्रद्योतयाध्यात्मज्ञानं तत्त्वार्थदर्शनम् ।
येनाञ्जसा तरिष्यामो दुस्तरं भवसागरम् ॥७॥

पदच्छेद—

तद् नः प्रद्योतय अध्यात्म ज्ञानम् तत्त्वार्थ दर्शनम् ।
येन अञ्जसा तरिष्यामः दुस्तरम् भव सागरम् ॥

शब्दार्थ—

तद्	१.	अतः (आप)	येन	८.	जिससे (हम)
नः	२.	हमारे हृदय में	अञ्जसा	९.	सुगमता से
प्रद्योतय	७.	प्रकाश करें	तरिष्यामः	१३.	पार कर सकें
अध्यात्म	५.	अध्यात्म	दुस्तरम्	१०.	अपार
ज्ञानम्	६.	ज्ञान का	भव	११.	संसार
तत्त्वार्थ	३.	परमार्थ तत्त्व का	सागराम् ॥	१२.	सागर को
दर्शनम् ।	४.	दर्शन कराने वाले			

श्लोकार्थ—अतः आप हमारे हृदय में परमार्थ तत्त्व का दर्शन कराने वाले अध्यात्म ज्ञान का प्रकाश करें । जिससे हम सुगमता से अपार संसार सागर को पार कर सकें ॥

अष्टमः श्लोकः

मैत्रेय उवाच—इति प्रचेतसां पृष्टो भगवान्नारदो मुनिः ।
भगवत्युत्तमश्लोक आविष्टात्माब्रवीन्नृपान् ॥८॥

पदच्छेद—

इति प्रचेतसाम् पृष्टः भगवान् नारदः मुनिः ।
भगवति उत्तमश्लोक आविष्ट आत्मा अब्रवीत् नृपान् ॥

शब्दार्थ—

इति	९.	इस प्रकार	भगवति	५.	भगवान् श्री हरि में
प्रचेतसाम्	८.	प्रचेताओं के	उत्तमश्लोक	४.	विशाल कीर्ति
पृष्टः	१०.	पूछने पर	आविष्ट	६.	लगा रहता है
भगवान्	७.	वे	आत्मा	३.	चित्त
नारदः	२.	नारद का	अब्रवीत्	१२.	कहने लगे
मुनिः ।	१.	देवर्षि	नृपान् ॥	११.	उन राजाओं से

श्लोकार्थ—देवर्षि नारद का चित्त विशाल कीर्ति भगवान् श्री हरि में लगा रहता है । वे प्रचेताओं के के [इस प्रकार पूछने पर उन राजाओं से कहने लगे ॥

नवमः श्लोकः

नारद उवाच—तज्जन्म तानि कर्माणि तदायुस्तन्मनो वचः ।
नृणां येनेह विश्वात्मा सेव्यते हरिरीश्वरः ॥९॥

पदच्छेद— तत् जन्म तानि कर्माणि तद् आयुः तद्मनः वचः ।
नृणाम् येन इह विश्वात्मा सेव्यते हरिः ईश्वरः ॥

शब्दार्थ—

तत्	२.	वह	वचः ।	१०.	वाणी (सफल है)
जन्म	३.	जन्म	नृणाम्	१.	मनुष्य का
तानि	४.	वे	येन	११.	जिससे
कर्माणि	५.	कर्म	इह	१२.	इस संसार में
तद्	६.	वह	विश्वात्मा	१३.	सबकी आत्मा
आयुः	७.	आयु	सेव्यते	१६.	सेवा की जाती है
तद्	८.	वह	हरिः	१५.	श्री हरि की
मनः	९.	मन (और)	ईश्वरः ॥	१४.	भगवान्

श्लोकार्थ—मनुष्यों का वह जन्म, वे कर्म, वह आयु, वह मन और वाणी सफल है, जिससे इस संसार में सबकी आत्मा भगवान् श्री हरि की सेवा की जाती है ।

दशमः श्लोकः

किं जन्मभिस्त्रिभिर्वेह शौक्लसावित्रयाज्ञिकैः ।
कर्मभिर्वा त्रयीप्रोक्तैः पुंसोऽपि विबुधायुषा ॥१०॥

पदच्छेद—

किम् जन्मभिः त्रिभिः वा इह शौक्ल सावित्र याज्ञिकैः ।
कर्मभिः वा त्रयी प्रोक्तैः पुंसः अपि विबुध आयुषा ॥

शब्दार्थ—

किम्	१६.	निष्फल है	कर्मभिः	१०.	कर्म
जन्मभिः	७.	जन्म	वा	११.	और
त्रिभिः	६.	तीन प्रकार का	त्रयी	८.	वेद
वा	४.	तथा	प्रोक्तैः	९.	विहित
इह	१.	इस संसार में	पुंसः	१२.	मनुष्यों की
शौक्ल	२.	विशुद्ध माता-पिता से	अपि	१५.	भी
सावित्र	३.	उपनयन संस्कार से	विबुध	१३.	देवताओं के समान
याज्ञिकैः ।	५.	गुरु दीक्षा से होने वाला	आयुषा ॥	१४.	लम्बी आयु

श्लोकार्थ—इस संसार में विशुद्ध माता-पिता से, उपनयन संस्कार से तथा गुरु दीक्षा से होने-वाला तीन प्रकार का जन्म, वेद विहित कर्म और मनुष्यों की देवताओं के समान लम्बी आयु निष्फल है ॥

एकादशः श्लोकः

श्रुतेन तपसा वा किं वचोभिश्चित्तवृत्तिभिः ।
बुद्ध्या वा किं निपुणया बलेनेन्द्रियराधसा ॥११॥

पदच्छेद—

श्रुतेन तपसा वा किम् वचोभिः चित्त वृत्तिभिः ।
बुद्ध्या वा किम् निपुणया बलेन इन्द्रिय राधसा ॥

शब्दार्थ—

श्रुतेन	१.	वेदाध्ययन	बुद्ध्या	१०.	बुद्धि
तपसा	२.	तपस्या	वा	८.	तथा
वा	४.	तथा	किम्	१४.	निष्फल है
किम्	७.	क्या प्रयोजन है	निपुणया	९.	कुशल
वचोभिः	३.	वाक् चातुरी	बलेन	११.	शारीरिक
चित्त	५.	चित्त की	इन्द्रिय	१२.	इन्द्रियों की
वृत्तिभिः ।	६.	एकाग्रता से	राधसा ॥	१३.	कुशलता भी

श्लोकार्थ—वेदाध्ययन, तपस्या, वाक् चातुरी तथा चित्त की एकाग्रता से क्या प्रयोजन है । तथा कुशल बुद्धि शारीरिक इन्द्रियों की कुशलता भी निष्फल है ॥

द्वादशः श्लोकः

किं वा योगेन सांख्येन न्यासस्वाध्याययोरपि ।
किं वा श्रेयोभिरन्यैश्च न यत्रात्मप्रदो हरिः ॥१२॥

पदच्छेद—

किम् वा योगेन सांख्येन न्यास स्वाध्याययोः अपि ।
किम् वा श्रेयोभिः अन्यैः च न यत्र आत्मप्रदः हरिः ॥

शब्दार्थ—

किम्	७.	निष्फल है	वा	८.	एवम्
वा	४.	तथा	श्रेयोभिः	९.	मोक्ष के साधक
योगेन	१.	अष्टांग योग	अन्यैः	१०.	दूसरे
सांख्येन	२.	आत्मज्ञान	च	११.	व्रतादि भी
न्यास	३.	संन्यास	न	१६.	नहीं हैं
स्वाध्याययोः	५.	वेदाध्ययन	यत्र	१३.	जिनमें
अपि ।	६.	भी	आत्मप्रदः	१४.	मुक्तिदाता
किम्	१२.	निष्फल है	हरिः ॥	१५.	भगवान् श्री हरि

श्लोकार्थ—अष्टांग योग, आत्मज्ञान, संन्यास तथा वेदाध्ययन भी निष्फल है । एवम् मोक्ष के साधक दूसरे व्रतादि भी निष्फल हैं । जिनमें मुक्तिदाता भगवान् श्री हरि नहीं हैं ॥

त्रयोदशः श्लोकः

श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः ।
सर्वेषामपि भूतानां हरिरात्माऽऽत्मदः प्रियः ॥१३॥

पदच्छेद— श्रेयसाम् अपि सर्वेषाम् आत्मा हि अवधिः अर्थतः ।
सर्वेषाम् अपि भूतानाम् हरिः आत्मा आत्मदः प्रियः ॥

शब्दार्थ—

श्रेयसाम्	२.	कल्याण साधन	सर्वेषाम्	९.	सभी
अपि	७.	किन्तु	अपि	१३.	और
सर्वेषाम्	१.	सभी	भूतानाम्	१०.	प्राणियों की
आत्मा	४.	अपनी आत्मा को	हरिः	८.	भगवान् श्री हरि
हि	५.	ही	आत्मा	११.	आत्मा
अवधिः	६.	प्रिय लगने वाले हैं	आत्मदः	१२.	मुक्तिदाता
अर्थतः ।	३.	वस्तुतः	प्रियः ।	१४.	प्रिय है

श्लोकार्थ—सभी कल्याण साधन वस्तुतः अपनी आत्मा को ही प्रिय लगने वाले हैं । किन्तु भगवान् श्री हरि सभी प्राणियों की आत्मा, मुक्तिदाता और प्रिय हैं ।

चतुर्दशः श्लोकः

यथा तरोर्मूलनिषेचनेन तृप्यन्ति तत्स्कन्धभुजोपशाखाः ।
प्राणोपहाराच्च यथेन्द्रियाणां तथैव सर्वार्हणमच्युतेज्या ॥१४॥

पदच्छेद— यथा तरोः मूलनिषचनेन तृप्यन्ति तत् स्कन्ध भुज उपशाखाः ।
प्राण उपहारात् च यथा इन्द्रियाणाम् तथैव सर्व अर्हणम् अच्युत इज्या ॥

शब्दार्थ—

यथा	१.	जैसे	प्राण	११	शरीर में
तरोः	२.	वृक्ष के	उपहारात्	१२.	भोजन करने से
मूल	३.	जड़ में	च यथा	१०.	और जैसे
निषचनेन	४.	सींचने से	इन्द्रियाणाम्	१३.	सभी इन्द्रियों की तृप्ति होती है
तृप्यन्ति	९.	तृप्त हो जाते हैं	तथैव	१४.	उसी प्रकार
तत्	५.	उस वृक्ष की	सर्व	१७.	सभी देवताओं की
स्कन्ध	६.	डालियाँ	अर्हणम्	१८.	पूजा है
भुज	७.	शाखायें (और)	अच्युत	१५.	भगवान् श्री हरि की
उपशाखाः ।	८.	तने	इज्या ॥	१६.	पूजा

श्लोकार्थ—जैसे वृक्ष की जड़ में सींचने से उस वृक्ष की डालियाँ, शाखायें और तने तृप्त हो जाते हैं और जैसे शरीर में भोजन करने से सभी इन्द्रियों की तृप्ति होती है, उसी प्रकार भगवान् श्री हरि की पूजा सभी देवताओं की पूजा है ॥

पञ्चदशः श्लोकः

यथैव सूर्यात्प्रभवन्ति वारः पुनश्च तस्मिन् प्रविशन्ति काले।
भूतानि भूमौ स्थिरजङ्गमानि तथा हरावेव गुणप्रवाहः ॥१५॥

पदच्छेद— यथा एव सूर्यात् प्रभवन्ति वारः पुनः च तस्मिन् प्रविशन्ति काले।
भूतानि भूमौ स्थिर जङ्गमानि तथा हरौ एव गुण प्रवाहः ॥

शब्दार्थ—

यथा एव	१.	जैसे	भूतानि	१३.	प्राणी (लीन हो जाते हैं)
सूर्यात्	४.	सूर्य से	भूमौ	१०.	जैसे पृथ्वी
प्रभवन्ति	५.	उत्पन्न होता है	स्थिर	११.	स्थावर
वारः	२.	जल	जङ्गमानि	१२.	जङ्गम (सभी)
पुनः	७.	फिर मे	तथा	१४.	उसी प्रकार
च	६.	तथा	हरौ	१७.	भगवान् श्री हरि में
तस्मिन्	८	उस सूर्य में ही	एव	१८	ही समा जाती है
प्रविशन्ति	९.	प्रवेश कर जाता है (तथा)	गुण	१५.	सृष्टि का
काले।	३.	समय पर	प्रवाहः ॥	१६.	प्रवाह

श्लोकार्थ—जैसे जल समय पर सूर्य से उत्पन्न होता है तथा फिर मे उस सूर्य में ही प्रवेश कर जाता है तथा जैसे पृथ्वी में स्थावर जङ्गम सभी प्राणी लीन हो जाते हैं, उसी प्रकार सृष्टि का प्रवाह भगवान् श्री हरि में समा जाता है ॥

षोडशः श्लोकः

एतत्पदं तज्जगदात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा।
यथासवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञानभिदाभ्रमात्ययः ॥१६॥

पदच्छेद— एतद् पदम् तत् जगदात्मनः परम् सकृद् विभातम् सवितः यथा प्रभा।
यथा असवः जाग्रति सुप्त शक्तयः द्रव्य क्रिया ज्ञान भिदा भ्रम अत्ययः ॥

शब्दार्थ—

एतद्	२.	यह	यथा	१०.	जैसे
पदम्	५.	स्वरूप है	असवः	१२.	इन्द्रियाँ क्रियाशील रहती हैं तथा
तत्	३.	शास्त्र वर्णित	जाग्रति	११.	जाग्रत् अवस्था में
जगदात्मनः	१.	संसार की आत्मा (श्री हरि का)	सुप्त	१३.	सुप्तावस्था में
परम्	४.	सर्वोत्तम	शक्तयः	१४.	शक्तियाँ सोई रहती हैं (वस्तुतः)
सकृद्विभातम्	९.	कभी-कभी प्रकार हो जाने वाला	द्रव्य	१५.	अहंकार के कार्य द्रव्य
सवितुः	७.	सूर्य का	क्रिया ज्ञान	१६.	क्रिया ज्ञान तथा
यथा	६.	जैसे	भिदा भ्रम	१७.	भेद के सन्देह का
प्रभा।	८.	प्रकाश (उससे भिन्न नहीं है)	अत्ययः ॥	१८.	सर्वथा अभाव है

श्लोकार्थ—संसार की आत्मा भगवान् श्री हरि का यह शास्त्र वर्णित सर्वोत्तम स्वरूप है। जैसे सूर्य का प्रकाश उससे भिन्न नहीं है। कभी-कभी प्रकट हो जाने वाला यह संसार प्रभु से भिन्न नहीं है। जैसे जाग्रत् अवस्था में इन्द्रियाँ क्रियाशील रहती हैं तथा सुप्तावस्था में उनकी शक्तियाँ सोई रहती हैं। वस्तुतः भगवान् में अहंकार के कार्य द्रव्य, क्रिया, ज्ञान तथा भेद के सन्देह का सर्वथा अभाव है ॥

सप्तदशः श्लोकः

यथा नभस्यभ्रतमः प्रकाशा भवन्ति भूपा न भवन्त्यनुक्रमात् ।
एवं परे ब्रह्मणि शक्तयस्त्वमू रजस्तमःसत्त्वमिति प्रवाहः ॥१७॥

पदच्छेद— यथा नभसि अभ्र तमः प्रकाशाः भवन्ति भूपाः न भवन्ति अनुक्रमात् ।
एवम् परे ब्रह्मणि शक्तयः तु अमूः रजः तमः सत्त्वम् इति प्रवाहः ॥

शब्दार्थ—

यथा	२.	जैसे	एवम्	१०.	उसी प्रकार
नभसि	३.	आकाश से	परे ब्रह्मणि	१५.	परब्रह्म में लीन होती है
अभ्र	४.	बादल	शक्तयः	१४.	शक्तियां
तमः	५.	अन्धकार (और)	तु	१६.	तथा
प्रकाशाः	६.	प्रकाश	अमूः	१३.	ये
भवन्ति	७.	उत्पन्न होते हैं (और)	रज तमः	११.	रजोगुण तमोगुण (और)
भूपाः	१.	हे प्रचेतागण	सत्त्वम्	१२.	सत्त्वगुण को
न भवन्ति	९.	लीन हो जाते हैं	इति	१७.	इसी प्रकार (यह)
अनुक्रमात् ।	८.	क्रम से (उसी में)	प्रवाहः ॥	१८.	जगत् प्रवाह (चलता रहता है)

श्लोकार्थ—हे प्रचेतागण ! जैसे आकाश से बादल, अन्धकार और प्रकाश उत्पन्न होते हैं और क्रम से उसी में लीन हो जाते हैं, उसी प्रकार रजोगुण, तमोगुण और सत्त्वगुण की ये शक्तियाँ परब्रह्म में लीन होती हैं, तथा इसी प्रकार यह जगत् प्रवाह चलता रहता है ॥

अष्टादशः श्लोकः

तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशम् ।
स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा ॥१८॥

पदच्छेद— तेन एकम् आत्मानम् अशेष देहिनाम् कालम् प्रधानम् पुरुषम् परेशम् ।
स्वतेजसा ध्वस्त गुण प्रवाहम् आत्म एक भावेन भजध्वम् अद्धा ॥

शब्दार्थ—

तेन	१.	इसलिये (तुम लोग)	स्वतेजसा	५.	अपने तेज से
एकम्	१३.	अद्वितीय	ध्वस्त	८.	नष्ट करने वाले (तथा)
आत्मानम्	४.	आत्मा	गुण	६.	तीनों गुण के
अशेष	२.	सम्पूर्ण	प्रवाहम्	७.	प्रवाह को
देहिनाम्	३.	प्राणियों की	आत्म	१६.	परमात्म
कालम्	९.	काल	एक	१५.	केवल
प्रधानम्	१०.	प्रधान और	भावेन	१७.	भाव
पुरुषम्	११.	कर्ता स्वरूप	भजध्वम्	१८.	भजन करो
परेशम्	१४.	श्री हरि का	अद्धा ॥	१२.	साक्षात्

श्लोकार्थ—इसलिये तुम लोग सम्पूर्ण प्राणियों की आत्मा, अपने तेज से तीनों गुणों के प्रवाह को नष्ट करने वाले, काल प्रधान और कर्ता स्वरूप साक्षात् अद्वितीय श्री हरि का केवल परमात्म भाव से भजन करो ॥

एकोनविंशः श्लोकः

दयया सर्वभूतेषु सन्तुष्ट्या येन केन वा।
सर्वेन्द्रियोपशान्त्या च तुष्यत्याशु जनार्दनः ॥१९॥

पदच्छेद— दयया सर्व भूतेषु सन्तुष्ट्या केन येन वा।
सर्व इन्द्रिय उपशान्त्या च तुष्यति आशु जनार्दनः ॥

शब्दार्थ—

दयया	४.	दया करने से	सर्व	११.	सभी
सर्व	२.	सब	इन्द्रिय	१०.	इन्द्रियों के
भूतेषु	३.	प्राणियों पर	उपशान्त्या	१२.	विषयों से अलग रखने से
सन्तुष्ट्या	८.	सन्तुष्ट रहने से	च	९.	और
येन	५.	जो	तुष्यति	१४.	प्रसन्न होते हैं
केन	६.	कुछ मिल जाय	आशु	१३.	शीघ्र
वा।	७.	उससे	जनार्दनः ॥	१.	भगवान श्री हरि

श्लोकार्थ—भगवान् श्री हरि सब प्राणियों पर दया करने से, जो कुछ मिल जाय उससे सन्तुष्ट रहने से और इन्द्रियों के सभी विषयों से अलग रखने से शीघ्र प्रसन्न होते हैं ॥

विंशः श्लोकः

अपहतसकलैषणामलात्मन्यविरतमेधितभावनोपहूतः ।
निजजनवशगत्वमात्मनोऽयन्न सरति छिद्रवदक्षरः सतां हि ॥२०॥

पदच्छेद— अपहत सकल एषणाम् अमल आत्मनि अविरतम् एधित भावना उपहूतः।
निज जन वश गत्वम् आत्मनः अयन् न सरति छिद्रवत् अक्षरः सताम् हि ॥

शब्दार्थ—

अपहत	३.	समाप्त हो जाने के कारण	निजजन	११.	भक्तों की
सकल	१.	सब प्रकार की	वशगत्वम्	१२.	अधीनता को
एषणाम्	२.	कामनाओं के	आत्मनः	१०.	अपने
अमल	४.	भक्तों के शुद्ध	अयम्	१३.	स्वीकार करके (ये)
आत्मनि	५.	चित्त में (भगवान् श्री हरि)	न सरति	१८.	नहीं निकलते हैं
अविरतम्	६.	निरन्तर	छिद्रवत्	१५.	हृदयाकाश के समान
एधित	७.	बढ़ते हुये	अक्षरः	१४.	अविनाशी पुरुष
भावना	८.	चिन्तन से	सताम्	१६.	(उन) सन्तों के हृदय से
उपहूतः।	९.	विराजमान हो जाते हैं (तथा)	हि।	१७.	कभी

श्लोकार्थ—सब प्रकार की कामनाओं के समाप्त हो जाने के कारण भक्तों के शुद्ध चित्त में भगवान् श्री हरि निरन्तर बढ़ते हुये चिन्तन से विराजमान हो जाते हैं तथा अपने भक्तों की अधीनता को स्वीकार करके ये अविनाशी पुरुष हृदयाकाश के समान उन सन्तों के हृदय से कभी नहीं निकलते हैं ॥

एकविंशः श्लोकः

न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः ।
श्रुतधनकुलकर्मणां मदैर्ये विदधति पापमकिञ्चनेषु सत्सु ॥२१॥

पदच्छेद—न भजति कुमनीषिणाम् सः इज्याम् हरिः अधन आत्मधन प्रियः रसज्ञः ।
श्रुत धन कुल कर्मणाम् मदैः ये विदधति पापम् अकिञ्चनेषु सत्सु ॥

शब्दार्थ—

न	८.	नहीं	श्रुत	११.	शास्त्राध्ययन में
भजति	९.	स्वीकार करते हैं	धन	१२.	सम्पत्ति
कुमनीषिणाम्	६.	कुबुद्धि लोगों की	कुल	१३.	उच्च कुल (और)
सः	४.	वे भगवान्	कर्मणाम्	१४.	कर्मों के
इज्याम्	७.	पूजा को	मदैः	१५.	अभिमान से
हरिः	५.	श्री हरि (उन)	ये	१०.	जो
अधन	२.	निर्धनों के	विदधति	१८.	करते हैं
आत्मधन	१.	भगवान् को धन मानने वाले	पापम्	१७.	तिरस्कार
प्रियरसज्ञः ।	३.	प्रेमी भक्ति रस के मर्मज्ञ	अकिञ्चनेषु सत्सु ॥	१६.	निर्धन संतों का

श्लोकार्थ—भगवान् को धन मानने वाले निर्धनों के प्रेमी, भक्तिरस के मर्मज्ञ भगवान् श्री हरि उन कुबुद्धि लोगों की पूजा को नहीं स्वीकार करते हैं। जो शास्त्राध्ययन में सम्पत्ति, उच्च कुल और कर्मों के अभिमान से निर्धन सन्तों का तिरस्कार करते हैं ॥

द्वाविंशः श्लोकः

श्रियमनुचरतीं तदर्थिनश्च द्विपदपतीन् विबुधांश्च यत्स्वपूर्णः ।
न भजति निजभृत्यवर्गतन्त्रः कथममुमुद्विसृजेत्पुमान् कृतज्ञः ॥२२॥

पदच्छेद— श्रियम् अनुचरतीम् तद् अर्थिनः च द्विपदपतीन् विबुधान् च यत् स्वपूर्णः ।
न भजति निज भृत्यवर्ग तन्त्रः कथम् अमुम् उद्विसृजेत् पुमान् कृतज्ञः ॥

शब्दार्थ—

श्रियम्	५.	लक्ष्मी जी	न	११.	नहीं
अनुचरतीम्	४.	सेवा करने वाली	भजति	१२.	चाहते हैं
तद् अर्थिनः	७.	लक्ष्मी को चाहने वाले	निज	१.	अपने
च	९.	और	भृत्यवर्ग	२.	सेवकों के
द्विपदपतीन्	८.	राजाओं	तन्त्रः	३.	अधीन रहने वाले (श्री हरि)
विबुधान्	१०.	देवताओं को भी	कथम् अमुम्	१७.	कैसे उन श्री हरि को
च	६.	तथा	उद्विसृजेत्	१८.	छोड़ सकता है
यत्	१३.	क्योंकि	पुमान्	१६.	मनुष्य
स्वपूर्णः ।	१४.	वे अपने में परिपूर्ण हैं	कृतज्ञः ॥	१५.	भक्त

श्लोकार्थ—अपने सेवकों के अधीन रहने वाले श्री हरि सेवा करने वाली लक्ष्मी जी तथा लक्ष्मी को चाहने वाले राजाओं और देवताओं को भी नहीं चाहते हैं। क्योंकि वे अपने में परिपूर्ण हैं। अतः भक्त मनुष्य कैसे उन श्री हरि को छोड़ सकता है ॥

त्रयोविंशः श्लोकः

मैत्रेय उवाच—इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः।
श्रावयित्वा ब्रह्मलोकं ययौ स्वायम्भुवो मुनिः ॥२३॥

पदच्छेद—

इति प्रचेतसः राजन् अन्याः च भगवत् कथाः।
श्रावयित्वा ब्रह्मलोकम् ययौ स्वायम्भुवः मुनिः ॥

शब्दार्थ—

इति	२.	इस प्रकार	कथाः।	५.	कथायें
प्रचेतसः	३.	प्रचेताओं के	श्रावयित्वा	८.	सुनाकर
राजन्	१.	हे विदुर जी	ब्रह्मलोकम्	११.	ब्रह्मलोक को
अन्याः	७.	दूसरी कथायें	ययौ	१२.	चले गये
च	६.	और	स्वायम्भुवः	१०.	नारद जी
भगवत्	४.	भगवत् सम्बन्धि	मुनिः ॥	९.	देवर्षि

श्लोकार्थ—हे विदुर जी ! इस प्रकार प्रचेताओं को भगवत् सम्बन्धि कथायें और दूसरी कथायें सुनाकर देवर्षि नारद जी ब्रह्मलोक को चले गये ॥

चतुर्विंशः श्लोकः

तेऽपि तन्मुखनिर्यातं यशो लोकमलापहम्।
हरेर्निशम्य तत्पादं ध्यायन्तस्तद्गतिं ययुः ॥२४॥

पदच्छेद—

ते अपि तन्मुखनिर्यातं यशो लोक मल अपहम्।
हरेः निशम्य तत् पादम् ध्यायन्तः तद् गतिम् ययुः ॥

शब्दार्थ—

ते	१.	वे प्रचेतागण	हरेः	८.	भगवान् श्री हरि के
अपि	२.	भी	निशम्य	१०.	सुनकर
तद् मुख	३.	नारद जी के मुख से	तत्	११.	उनके
निर्यातम्	४.	निकले हुये	पादम्	१२.	चरणों का
यशः	९.	यश को	ध्यायन्तः	१३.	ध्यान करते हुये
लोक	५.	संसार के	तद्	१४.	उनके
मल	६.	दोष को	गतिम्	१५.	धाम को
अपहम्।	७.	दूर करने वाले	ययुः ॥	१६.	प्राप्त हो गये

श्लोकार्थ—वे प्रचेतागण भी नारद जी के मुख से निकले हुये संसार के दोष को दूर करने वाले भगवान् श्री हरि के यश को सुनकर उनके चरणों का ध्यान करते हुये उनके धाम को प्राप्त हो गये ॥

पञ्चविंशः श्लोकः

एतत्तेऽभिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान् ।
प्रचेतसां नारदस्य संवादं हरिकीर्तनम् ॥२५॥

पदच्छेद—

एतत् ते अभिहितम् क्षत्तः यद् माम् त्वम् परिपृष्टवान् ।
प्रचेतसाम् नारदस्य संवादम् हरिकीर्तनम् ॥

शब्दार्थ—

एतत्	१०. यह		परिपृष्टवान् ।	५. पूछा था
ते	१२. तुम्हें		प्रचेतसाम्	८. प्रचेताओं (और)
अभिहितम्	१३. सुना दिया		नारदस्य	९. देवर्षि नारद का
क्षत्तः	१. हे विदुर जी		संवादम्	११. संवाद
यद्	४. जो		हरि	६. भगवान् श्री हरि के
माम्	३. मुझसे		कीर्तनम् ॥	७. चरित्र से सम्बन्धित
त्वम्	२. तुमने			

श्लोकार्थ—हे विदुर जी ! तुमने मुझसे जो पूछा था, सो भगवान् श्री हरि के चरित्र से सम्बन्धित प्रचेताओं और देवर्षि नारद का यह संवाद तुम्हें सुना दिया ॥

षड्विंशः श्लोकः

श्रीशुक उवाच—य एष उत्तानपदो मानवस्यानुवर्णितः ।
वंशः प्रियव्रतस्यापि निबोध नृपसत्तम ॥२६॥

पदच्छेद—

यः एषः उत्तानपदः मानवस्य अनु वर्णितः ।
वंशः प्रियव्रतस्य अपि निबोध नृपसत्तम ॥

शब्दार्थ—

यः	३. जो		वंशः	८. वंश का
एषः	५. यह (उसका)		प्रियव्रतस्य	७. अब प्रियव्रत के
उत्तानपदः	४. उत्तानपाद पुत्र थे		अपि	९. भी (वर्णन)
मानवस्य	२. स्वायम्भुवमनु के		निबोध	१०. सुनो
अनुवर्णितः ।	६. वर्णन किया		नृपसत्तम ॥	१. हे परीक्षित्

श्लोकार्थ—हे परीक्षित् ! स्वायम्भुवमनु के जो उत्तानपाद पुत्र थे, यह उसका वर्णन किया । अब प्रियव्रत के वंश का भी वर्णन सुनो ॥

सप्तविंशः श्लोकः

यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ।
भुक्त्वा विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ॥२७॥

पदच्छेद— यः नारदात् आत्म विद्याम् अधिगम्य पुनः महीम् ।
भुक्त्वा विभज्य पुत्रेभ्यः ऐश्वरम् समगात् पदम् ॥

शब्दार्थ—

यः	१.	राजा प्रियव्रत ने	भुक्त्वा	७.	भोग किया (तथा)
नारदात्	२.	देवर्षि नारद से	विभज्य	१०.	बाँट कर
आत्मविद्यात्	३.	आत्मज्ञान का	पुत्रेभ्यः	९.	पुत्रों में
अधिगम्य	४.	उपदेश पाकर	ऐश्वरम्	६.	राज्य का
पुनः	५.	फिर से	समगात्	१२.	प्राप्त किया
महीम् ।	८.	(अन्त में) पृथ्वी को	पदम् ॥	११.	भगवान् के धाम को

श्लोकार्थ—राजा प्रियव्रत ने देवर्षिनारद से आत्मज्ञान का उपदेश पाकर फिर से राज्य का भोग किया। तथा अन्त में पृथ्वी को पुत्रों में बाँट कर भगवान् के धाम को प्राप्त किया ॥

अष्टाविंशः श्लोकः

इमां तु कौषारविणोपवर्णितां क्षत्ता निशम्याजितवाद सत्कथाम् ।
प्रवृद्धभावोऽश्रुकलाकुलो मुनेर्दधार मूर्ध्ना चरणं हृदा हरेः ॥२८॥

पदच्छेद— इमाम् तु कौषारविणा उपवर्णिताम् क्षत्ता निशम्य अजितवाद सत्कथाम् ।
प्रवृद्ध भावः अश्रु कला आकुलः मुनेः दधार मूर्ध्ना चरणम् हृदा हरेः ॥

शब्दार्थ—

इमाम्	६.	इस	प्रवृद्ध	१२.	वृद्धि होने से
तु	१.	इधर	भावः	११.	भक्ति-भाव की
कौषारविणा	२.	मैत्रेय जी से	अश्रुकला	१३.	आँसुओं की धारा
उपवर्णिताम्	३.	कही गयी	आकुलः	१४.	बहने लगी
क्षत्ता	९.	विदुर जी में	मुनेः	१८.	मुनिवर मैत्रेय जी के
निशम्य	८.	सुनकर	दधार	२०.	रख दिया
अजित वाद	४.	भगवद् गुणानुवाद से	मूर्ध्ना	१७.	(अपना) मस्तक
सत्	५.	पवित्र	चरणम्	१९.	चरणों पर
कथाम् ।	७.	कथा को	हृदा	१५.	उन्होंने हृदय में
			हरेः ।	१६.	भगवान् श्री हरि का स्मरण करते हुये

श्लोकार्थ—इधर मैत्रेय जी से कही गयी भगवद् गुणानुवाद से पवित्र इस कथा को सुनकर विदुर जी में भक्ति-भाव की वृद्धि होने से आँसुओं की धारा बहने लगी। उन्होंने हृदय में भगवान् श्री हरि का स्मरण करते हुये अपना मस्तक मुनिवर मैत्रेय जी के चरणों पर रख दिया ॥

एकोनत्रिंशः श्लोकः

विदुर उवाच—सोऽयमद्य महायोगिन् भवता करुणात्मना ।
दर्शितस्तमसः पारो यत्राकिञ्चनगो हरिः ॥२९॥

पदच्छेद—

स: अयम् अद्य महायोगिन् भवता करुण आत्मना ।
दर्शितः तमसः पारः यत्र अकिंचनगः हरिः ॥

शब्दार्थ—

सः	७.	शास्त्र वर्णित	दर्शितः	१०.	दिखा दिया है
अयम्	८.	यह	तमसः	६.	अज्ञान का
अद्य	५.	आज (अपने)	पारः	९.	पार
महायोगिन्	१.	महायोगी हे मैत्रेय जी	यत्र	११.	जहाँ
भवता	२.	आप बड़े ही	अकिञ्चन	१२.	दीनों के
करुण	३.	करुणा	गः	१३.	सर्वस्व
आत्मनः ।	४.	करने वाले हैं	हरिः ॥	१४.	श्री हरि रहते हैं

श्लोकार्थ—महायोगी हे मैत्रेय जी ! आप बड़े ही करुणा करने वाले हैं । आज आपने अज्ञान का शास्त्र वर्णित यह पार दिखा दिया है, जहाँ दीनों के सर्वस्व श्री हरि रहते हैं ॥

त्रिंशः श्लोकः

श्रीशुक उवाच—इत्यानम्य तमामन्त्र्य विदुरो गजसाह्वयम् ।
स्वानां दिदृक्षुः प्रययौ ज्ञातीनां निर्वृताशयः ॥३०॥

पदच्छेद—

इति आनम्य तम् आमन्त्र्य विदुरः गज साह्वयम् ।
स्वानाम् दिदृक्षुः प्रययौ ज्ञातीनाम् निर्वृत आशयः ॥

शब्दार्थ—

इति	१.	इस प्रकार (मैत्रेय जी को)	स्वानाम्	८.	अपने
आनम्य	२.	प्रणाम करके (और)	दिदृक्षुः	१०.	देखने की इच्छा से
तम्	३.	उनसे	प्रययौ	१२.	चले गये
आमन्त्र्य	४.	आज्ञा लेकर	ज्ञातीनाम्	९.	बन्धुजनों को
विदुरः	५.	विदुर जी	निर्वृत	६.	शान्त
गजसाह्वयम् ।	११.	हस्तिनापुर	आशयः ॥	७.	चित्त होकर

श्लोकार्थ—इस प्रकार मैत्रेय जी को प्रणाम करके और उनसे आज्ञा लेकर विदुर जी शान्त चित्त होकर अपने बन्धुजनों को देखने की इच्छा से हस्तिनापुर चले गये ॥

एकत्रिंशः श्लोकः

एतद्यः शृणुयाद्राजन् राज्ञां हर्यर्पितात्मनाम् ।
आयुर्धनं यशः स्वस्ति गतिमैश्वर्यमाप्नुयात् ॥३१॥

पदच्छेद—

एतद् यः शृणुयात् राजन् राज्ञाम् हरि अर्पित आत्मनाम् ।
आयुः धनम् यशः स्वस्ति गतिम् ऐश्वर्यम् आप्नुयात् ॥

अन्वार्थ—

एतद्	१.	यह चरित	आयुः	६	(उसे लम्बी) आयु
यः	२.	जो पुरुष	धनम्	१०.	धन
शृणुयात्	३.	सुनेगा	यशः	११.	सुयश
राजन्	४.	हे राजन्	स्वस्ति	१२.	मंगल
राज्ञाम्	५.	राजाओं का	गतिम्	१३.	सद्गति
हरि	६.	भगवान् की	ऐश्वर्यम्	१४.	और ऐश्वर्य की
अर्पित	७.	शरण में	आप्नुयात् ।	१५.	प्राप्ति होती है
आत्मनाम् ।	८.	आये हुये			

श्लोकार्थ—हे राजन् ! जो पुरुष, भगवान् की शरण में आये हुये राजाओं का यह चरित्र सुनेगा, उसे लम्बी आयु, धन, सुयश, मंगल, सद्गति और ऐश्वर्य की प्राप्ति होती है ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां चतुर्थस्कन्धे एकत्रिंशोऽध्यायः ॥३१॥

इति चतुर्थः स्कन्धः परिपूर्णः

श्रीराधाकृष्णाभ्यां नमः

श्रीमद्भागवतमहापुराणस्य

पञ्चमः स्कन्धः

संविदानन्दसन्दोहसान्द्रमिन्दीवरेक्षणम् ।
इन्दिरामन्दिरं देवं वन्दे तं नन्दनन्दनम् ॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

पञ्चमः स्कन्धः

प्रथमः अध्यायः

प्रथमः श्लोकः

राजोवाच— प्रियव्रतो भागवत आत्मारामः कथं मुने।
गृहेऽरमत यन्मूलः कर्मबन्धः पराभवः ॥१॥

पदच्छेद—

प्रियव्रतः भागवतः आत्मारामः कथम् मुने।
गृहे अरमत यत् मूलः कर्म बन्धः पराभवः ॥

शब्दार्थ—

प्रियव्रतः	५.	राजा प्रियव्रत	गृहे	७.	गृहस्थाश्रम में
भागवतः	४.	परम भगवद्भक्त	अरमत	८.	आसक्त रहे
आत्मा	१.	आत्मा में	यत्	९.	जिसके
रामः	३.	रमण करने वाले	मूलः	१०.	कारण
कथम्	६.	कैसे	कर्मबन्धः	११.	कर्मों का बन्धन और
मुने।	१.	हे शुकदेव जी !	पराभवः॥	१२.	स्वरूप की विस्मृति होती है

श्लोकार्थ—हे शुकदेव जी ! आत्मा में रमण करने वाले परम भगवद् भक्त राजा प्रियव्रत कैसे गृहस्थाश्रम में आसक्त रहे, जिसके कारण कर्मों के बन्धन और स्वरूप की विस्मृति होती है ॥

द्वितीयः श्लोकः

न नूनं मुक्तसङ्गानां तादृशानां द्विजर्षभ ।
गृहेष्वभिनिवेशोऽयं पुंसां भवितुमर्हति ॥२॥

पदच्छेद—

न नूनम् मुक्त सङ्गानाम् तादृशानाम् द्विज ऋषभ ।
गृहेषु अभिनिवेशः अयम् पुंसाम् भवितुम् अर्हति ॥

शब्दार्थ—

न	१०.	नहीं	गृहेषु	६.	गृहस्थाश्रम के प्रति
नूनम्	९.	अवश्य	अभिनिवेशः	८.	आसक्ति
मुक्त	४.	रहित	अयम्	७.	यह
सङ्गानाम्	३.	संगदोष से	पुंसाम्	५.	मनुष्यों का
तादृशानाम्	२.	इस प्रकार के	भवितुम्	११.	हो
द्विजऋषभ ।	१.	हे विप्रवर	अर्हति ॥	१२.	सकती है

श्लोकार्थ—हे विप्रवर ! इस प्रकार के संगदोष से रहित मनुष्यों का गृहस्थाश्रम के प्रति यह आसक्ति अवश्य नहीं हो सकती है ॥

तृतीयः श्लोकः

महतां खलु विप्रर्षे उत्तमश्लोकपादयोः ।
छायानिर्वृतचित्तानां न कुटुम्बे स्पृहामतिः ॥३॥

पदच्छेद—

महताम् खलु विप्रर्षे उत्तम श्लोक पादयोः ।
छाया निर्वृत चित्तानाम् न कुटुम्बे स्पृहामतिः ॥

शब्दार्थ—

महताम्	८.	महापुरुषों की	छाया	५.	सन्ताप हारिणी छाया से
खलु	१०.	अवश्य	निर्वृत	६.	शान्त
विप्रर्षे	१.	हे मुनिवर	चित्तानाम्	७.	चित्त वाले
उत्तम	२.	पवित्र	न	१२.	नहीं होती है
श्लोक	३.	कीर्ति श्री हरि के	कुटुम्बे स्पृहा	११.	गृहस्थाश्रम में आसक्त
पादयोः ।	४.	चरणों की	मतिः ॥	९.	बुद्धि

श्लोकार्थ—हे मुनिवर ! पवित्रकीर्ति श्री हरि के चरणों की सन्तापहारिणी छाया से शान्त चित्त वाले महापुरुषों की बुद्धि अवश्य गृहस्थाश्रम में आसक्त नहीं होती है ॥

चतुर्थः श्लोकः

संशयोऽयं महान् ब्रह्मन्दारागारसुतादिषु ।
सक्तस्य यत्सिद्धिरभूत्कृष्णे च मतिरच्युता ॥४॥

पदच्छेद—

संशयः अयम् महान् ब्रह्मन् दारा आगार सुत आदिषु ।
सक्तस्य यत् सिद्धिः अभूत् कृष्णे च मतिः अच्युता ॥

शब्दार्थ—

संशयः	१६.	सन्देह (होता है)	सक्तस्य	६.	फंसे हुये (उस राजा को)
अयम्	१४.	इससे मुझे	यत्	७.	जो
महान्	१५.	बहुत बड़ा	सिद्धिः	१२.	मोक्ष की प्राप्ति
ब्रह्मन्	१.	हे महर्षे	अभूत्	१३.	हुई
दारा	३.	पत्नी	कृष्णे	८.	भगवान् श्री हरि में
आगार	२.	घर	च	११.	और
सुत	४.	पुत्र	मतिः	१०.	भक्ति
आदिषु ।	५.	इत्यादि में	अच्युता ॥	९.	अनन्य

श्लोकार्थ—हे महर्षे ! घर, पुत्र, पत्नी इत्यादि में फंसे हुये (उस राजा को) जो भगवान् श्री हरि में अनन्य भक्ति और मोक्ष की प्राप्ति हुई, इसमें मुझे बहुत बड़ा सन्देह होता है ॥

पञ्चमः श्लोकः

श्रीशुक उवाच—बाढमुक्तं भगवत उत्तमश्लोकस्य श्रीमच्चरणारविन्दमकरन्दरस आवेशितचेतसो भागवतपरमहंसदयितकथां किञ्चिदन्तराय-विहतां स्वां शिवतमां पदवीं न प्रायेण हिन्वन्ति ॥५॥

पदच्छेद—

बाढम् उक्तम् भगवतः उत्तमश्लोकस्य श्रीमत् चरण अरविन्द मकरन्दरसे आवेशित चेतसः भागवत परमहंस दयित कथाम् किञ्चित् अन्तराय विहताम् स्वाम् शिवतमाम् पदवीम् न प्रायेण हिन्वन्ति ॥

शब्दार्थ—

बाढम्	२.	ठीक है	परमहंस	१७.	परम हंसों के
उक्तम्	१.	आपका कथन	दयित	१८.	प्रिय श्री हरि की
भगवतः	५.	भगवान् श्री हरि के	कथाम्	१९.	कथा श्रवणरूपी
उत्तम	३.	पवित्र	किञ्चित्	१३.	किसी
श्लोकस्य	४.	कीर्ति	अन्तराय	१४.	विघ्न-बाधा के कारण
श्रीमत्	६.	शोभा सम्पन्न	विहताम्	१५.	रुकावट पड़ने पर भी
स्वाम्	७.	चरण	चरण	२०.	अपने
अरविन्द	८.	कमलों के	शिव	२१.	कल्याण
मकरन्द	९.	पराग के	तमाम्	२२.	कारी
रसे	१०.	मधुर रस में	पदवीम्	२३.	मार्ग को
आवेशित	१२.	लगा रक्खा है (वे लोग)	न	२५.	नहीं
चेतसः	११.	जिन्होंने चित्त को	प्रायेण	२४.	प्रायः
भागवत	१६.	भगवान् के भक्त	हिन्वन्ति ॥	२६.	छोड़ते हैं

श्लोकार्थ—आपका कथन ठीक है। पवित्र कीर्ति भगवान् श्री हरि के शोभासम्पन्न चरणकमलों के पराग के मधुर रस में जिन्होंने चित्त को लगा रक्खा है, वे लोग किसी विघ्न-बाधा के कारण रुकावट पड़ने पर भी भगवान् के भक्त परमहंसों के प्रिय भगवान् श्री हरि की कथा श्रवणरूपी अपने कल्याणकारी मार्ग को प्रायः नहीं छोड़ते हैं ॥

षष्ठः श्लोकः

यर्हि वाव ह राजन् स राजपुत्रः प्रियव्रतः परमभागवतो नारदस्य चरणोपसेवयाञ्जसावगतपरमार्थसतत्त्वो ब्रह्मसत्रेण दीक्षिष्यमाणोऽवनितलपरिपालनायाम्नातप्रवरगुणगणैकान्तभाजनतया स्वपित्रोपामन्त्रितो भगवति वासुदेव एवाव्यवधानसमाधियोगेनसमावेशितसकलकारकक्रियाकलापो नैवाभ्यनन्दद्यद्यपि तदप्रत्याम्नातव्यंतदधिकरणआत्मनोऽन्यस्मादसतोऽपि पराभवमन्वीक्षमाणः ॥६॥

पदच्छेद—यर्हि वाव ह राजन् सः राजपुत्रः प्रियव्रतः परम भागवतः नारदस्य चरण उपसेवया अञ्जसा अवगत परमार्थ सतत्त्वः ब्रह्मसत्रेण दीक्षिष्यमाणः अवनितल परिपालनाय आम्नात प्रवर गुण-गण एकान्त भाजनतया स्वपित्रा उपमन्त्रितः भगवति वासुदेवे एव अव्यवधान समाधि योगेन समावेशित सकल कारक क्रिया कलापः न एव अभ्यनन्दत् यद्यपि तद् अप्रत्याम्नातव्यम् तद् अधिकरणे आत्मनः अन्यस्मात् असतः अपि पराभवम् अन्वीक्षमाणः ॥

शब्दार्थ—

यर्हि	३.	जिस समय	स्वपित्रा	१४.	उनके पिता ने
वाव ह	२.	प्रसिद्ध है कि	उपमन्त्रितः	२१.	आज्ञा दी (किन्तु उन्होंने)
राजन्	१.	हे परीक्षित्	भगवति वासुदेवे	२४.	भगवान् श्री हरि में
सः राजपुत्रः	४.	वे राजकुमार	एव	२५.	ही (अपनी)
प्रियव्रतः	५.	प्रियव्रत	अव्यवधान	२२.	निरन्तर
परमभागवतः	६.	महान् भगवद् भक्त	समाधियोगेन	२३.	समाधि योग के द्वारा
नारदस्य	७.	देवर्षि नारद के	समावेशित	२८.	लीन कर दिया था
चरण उपसेवया	८. ९.	चरणों की सेवा से	सकलकारक क्रिया	२६.	सभी इन्द्रियों के कर्मों के
अञ्जसा	९.	सहज में ही	कलापः	२७.	समूह को
अवगत	१०.	जान लिया (उस समय)	न एव	३७.	उसे नहीं
परमार्थसतत्त्व	११.	परमार्थ के स्वरूप को	अभ्यनन्दत्	८०.	पसन्द किया
ब्रह्मसत्रेण	१२.	ब्रह्मोपासना की	यद्यपि तद्	३१	यद्यपि पिता की आज्ञा
दीक्षिष्यमाण	१३.	दीक्षा लेने वाले थे कि	अप्रत्याम्नातव्यम्	२९.	शिरोधार्य होती है
अवनितल	१९.	भूमण्डल की	तद् अधिकरणे	३०.	फिर भी उस राज्यासन में
परिपालनाय	२०.	रक्षा करने के लिये	आत्मनः	३१.	आत्मा से
आम्नात	१५.	शास्त्रों में वर्णित	अन्यस्मात्	३२	भिन्न
प्रवर गुण गण	१६.	उत्तम गुणों की खान	असतः अपि	३३.	मिथ्या पदार्थों का ही
एकान्त	१७.	एक मात्र	पराभवम्	३५.	आवरण
भाजनतया।	१८.	आश्रय समझ कर (उन्हें)	अन्वीक्षमाणः ॥	३६.	देखकर उन्होंने

श्लोकार्थ—हे परीक्षित् ! प्रसिद्ध है कि जिस समय वे राजकुमार प्रियव्रत महान् भगवद् भक्त देवर्षि नारद के चरणों की सेवा से सहज में ही परमार्थ के स्वरूप को जान लिया, उस समय ब्रह्मोपासना की दीक्षा लेने ही वाले थे कि उनके पिता ने शास्त्रों में वर्णित उत्तम गुणों की खान, एक मात्र आश्रय समझ कर उन्हें भूमण्डल की रक्षा करने के लिये आज्ञा दी। किन्तु उन्होंने निरन्तर समाधि योग के द्वारा भगवान् श्री हरि में ही अपनी सभी इन्द्रियों के कर्मों के समूह को लीन कर दिया था। यद्यपि पिता की आज्ञा शिरोधार्य होती है। फिर भी उस राज्यासन में आत्मा से भिन्न मिथ्या पदार्थों का ही आवरण देखकर उन्होंने उसे नहीं पसन्द किया।

सप्तमः श्लोकः

अथ ह भगवानादिदेव एतस्य गुणविसर्गस्य परिबृंहणानुध्यानव्यवसित-सकलजगदभिप्राय आत्मयोनिरखिलनिगमनिजगणपरिवेष्टितः स्वभवना-दवततार ॥७॥

पदच्छेद—

अथ ह भगवान् आदिदेवः एतस्य गुण विसर्गस्य परिबृंहण अनुध्यान व्यवसित सकल जगत् अभिप्रायः आत्मयोनिः अखिल निगम निजगण परिवेष्टितः स्वभवनात् अवततार ॥

शब्दार्थ—

अथ	११.	एक बार	अभिप्रायः	७.	इच्छा को
ह	६.	अतः	आत्मयोनिः	१०.	स्वयम्भू ब्रह्माजी
भगवान् आदिदेवः	१.	भगवान् ब्रह्माजी	अखिल	१२.	चारों
एतस्य गुण	२.	इस त्रिगुणात्मक	निगम	१३.	वेदों (और)
विसर्गस्य	३.	सृष्टि की	निज	१४.	अपने
परिबृंहण	४.	वृद्धि के	गण	१५.	मरीचि आदि पार्षदों के
अनुध्यान	५.	विचार से	परिवेष्टितः	१६.	साथ
व्यवसित	८.	जानते हैं	स्वभवनात्	१७.	अपने लोक से
सकल जगत् ।	६.	सम्पूर्ण विश्व की	अवततार ॥	१८.	उतरे

श्लोकार्थ—भगवान् ब्रह्माजी इस त्रिगुणात्मक सृष्टि की वृद्धि के विचार से सम्पूर्ण विश्व की इच्छा को जानते हैं। अतः स्वयम्भूः ब्रह्माजी एक बार चारो वेदों और अपने मरीचि आदि पार्षदों के साथ अपने भवन से उतरे ॥

अष्टमः श्लोकः

स तत्र तत्र गगनतल उडुपतिरिव विमानावलिभिरनुपथममरपरिवृढैर-भिपूज्यमानःपथि पथि च वरूथशः सिद्धगन्धर्वसाध्यचारणमुनिगणैरुपगीय-मानो गन्धमादनद्रोणीमवभासयन्नुपससर्प ॥८॥

पदच्छेद—

स तत्र-तत्र गगनतले उडुपतिः इव विमान अवलिभिः अनुपथम् अमरपरिवृढैः अभिपूज्यमानः पथि पथि च वरूथशः सिद्ध गन्धर्व साध्य चारण मुनिगणैः उपगीयमानः गन्धमादन द्रोणीम् अवभासयन् उपससर्प ॥

शब्दार्थ—

सः	१४.	इस प्रकार (वे ब्रह्मा जी)	पथि पथि	८.	प्रत्येक मार्ग में
तत्र तत्र	१.	जहाँ जहाँ	च	७.	और
गगनतले	१५.	आकाश में	वरूथशः	९.	झुण्ड के झुण्ड
उडुपतिः इव	१६.	साक्षात् चन्द्रमा के समान	सिद्ध गन्धर्व	१०	सिद्ध गन्धर्व
विमान	४.	विमानों पर आरुढ	साध्य चारण	११.	साध्य, चारण और
अवलिभिः	३.	अनेक	मुनिगणैः	१२.	मुनिजनों ने
अनुपथम्	२.	मार्ग में	उपगीयमान	१३.	यशोगान किया
अमरपरिवृढैः	५.	इन्द्रादि प्रधान देवताओं ने	गन्धमादन	१७.	गन्धमादन पर्वत की
अभि पूज्यमानः।	६.	उनका पूजन किया	द्रोणीम् अवभासयन्	१८.	घाटी को प्रकाशित करते हुये
			उपससर्प ॥	१९.	प्रियव्रत के पास पहुँचे

श्लोकार्थ— जहाँ-तहाँ मार्ग में अनेकों विमानों पर आरुढ इन्द्रादि प्रधान देवताओं ने उनका पूजन किया और प्रत्येक मार्ग में झुण्ड के झुण्ड सिद्ध, गन्धर्व, साध्य, चारण और मुनिजनों ने यशोगान किया। इस प्रकार वे ब्रह्माजी आकाश में साक्षात् चन्द्रमा के समान गन्धमादन पर्वत की घाटी को प्रकाशित करते हुये प्रियव्रत के पास पहुँचे ॥

नवमः श्लोकः

**तत्र ह वा एनं देवर्षिर्हंसयानेन पितरं भगवन्तं हिरण्यगर्भमुपलभमानः ।
सहसैवोत्थायार्हणेन सह पितापुत्राभ्यामवहिताञ्जलिरुपतस्थे ॥९॥**

पदच्छेद—तत्र ह वा एनम् देवर्षिः हंसयानेन पितरम् भगवन्तम् हिरण्यगर्भम् उपलभमानः ।
सहसा एव उत्थाय अर्हणेन सह पिता पुत्राभ्याम् अवहित अञ्जलिः उपतस्थे ॥

शब्दार्थ—

तत्र	१.	वहाँ पर	उपलभमानः	९.	देखकर
ह	२.	पहले से ही	सहसा एव	१२.	तत्काल ही
वा	३.	उपस्थित	उत्थाय	१४.	खड़े हो गये (तथा)
एनम्	१७.	इनकी	अर्हणेन	१३.	पूजा सामग्री लेकर
देवर्षिः	४.	देवर्षि नारद जी	सह	११.	साथ
हंसयानेन	५.	हंस वाहन पर	पिता पुत्राभ्याम्	१०.	स्वायम्भुवमनु और प्रियव्रत के
पितरम्	६.	अपने पिता	अवहित	१६.	जोड़कर
भगवन्तम्	७.	भगवान्	अञ्जलिः	१५.	हाथ
हिरण्यगर्भम्	८.	ब्रह्माजी को	उपतस्थे ॥	१८.	स्तुति करने लगे

श्लोकार्थ—वहाँ पर पहले से ही उपस्थित देवर्षिनारद जी हंस वाहन पर अपने पिता भगवान् ब्रह्मा जी को देखकर स्वायम्भुव मनु और प्रियव्रत के साथ तत्काल ही पूजा सामग्री लेकर खड़े हो गये तथा हाथ जोड़कर स्तुति करने लगे ॥

दशमः श्लोकः

**भगवानपि भारत तदुपनीतार्हणः सूक्तवाकेनातितरामुदितगुणगणा-
वतारसुजयः प्रियव्रतमादिपुरुषस्तं सदयहासावलोक इति होवाच ॥१०॥**

पदच्छेद—भगवान् अपि भारत तद् उपनीत अर्हणः सूक्त वाकेन अतितराम् उदित
गुण गण अवतार सुजयः प्रियव्रतम् आदि पुरुषः तम् सदयहास अवलोकः इति हउवाच ॥

शब्दार्थ—

भगवान्	२.	भगवान् ब्रह्माजी की	अवतार	६.	अवतारों का
अपि	१०.	भी	सुजयः	१५.	उत्तम
भारततद्	१.	हे परीक्षित् ! नारद जी ने	प्रियव्रतम्	१४.	प्रियव्रत से
उपनीत	४.	प्राप्त की (और)	आदिपुरुषः	९.	आदि पुरुष ब्रह्माजी
अर्हणः	३.	पूजा	तम्	१३.	राजा
सूक्त	१७.	सुन्दर	सदयहास	११.	दयापूर्ण मुसकान के साथ
वाकेन	१८.	वचनों में	अवलोकः	१२.	देखकर
अतितराम्	१६.	अत्यन्त	इति	१९	इस प्रकार
उदित	७.	वर्णन किया	ह	८.	उसके बाद
गुण गण	५	उनके गुणों की खान (तथा)	उवाच ॥	२०.	बोले

श्लोकार्थ—हे परीक्षित् ! नारद जी ने भगवान् ब्रह्माजी की पूजा प्राप्त की; और उनके गुणों की खान तथा अवतारों का वर्णन किया । उसके बाद आदि पुरुष ब्रह्माजी भी दयापूर्ण मुसकान के साथ देखकर राजा प्रियव्रत से उत्तम अत्यन्त सुन्दर वचनों में इस प्रकार बोले ॥

एकादशः श्लोकः

श्रीभगवानुवाच—निबोध तातेदमृतं ब्रवीमि मासूयितुं देवमर्हस्यप्रमेयम् ।
वयं भवस्ते तत एष महर्षिर्वहाम सर्वे विवशा यस्य दिष्टम् ॥११॥

पदच्छेद—निबोध तात इदम् अमृतम् ब्रवीमि मा असूयितुम् देवम् अर्हसि अप्रमेयम् ।
वयम् भवः ते ततः एषः महर्षिः वहाम सर्वे विवशाः यस्य दिष्टम् ॥

शब्दार्थ—

निबोध	२.	ध्यान से सुनो	अप्रमेयम् ।	६.	अज्ञात रहस्य वाले
तात	१.	हे पुत्र	वयम् भवः	११.	क्योंकि हम भगवान् शंकर
इदम्	३.	मैं यह	ते ततः	१६.	तुम्हारे पिता स्वायम्भुवमनु
अमृतम्	४.	सत्य सिद्धान्त	एषः	१३.	और ये
ब्रवीमि	५.	बता रहा हूँ	महर्षिः	१४.	देवर्षि नारद जी
मा	९.	नहीं	वहाम	१८.	पालन करते हैं
असूयितुम्	८.	तुम्हें ईर्ष्या	सर्वे	१५.	सभी
देवम्	७.	भगवान् श्री हरि से	विवशाः	१६.	विवश होकर
अर्हसि	१०.	करनी चाहिये	यस्य दिष्टम् ॥	१७.	जिन श्री हरि के आदेश का

श्लोकार्थ—हे पुत्र ! ध्यान से सुनो, मैं यह सत्य सिद्धान्त बता रहा हूँ कि अज्ञात रहस्य वाले भगवान् श्री हरि से तुम्हें ईर्ष्या नहीं करनी चाहिये । क्योंकि हम, भगवान् शंकर, तुम्हारे पिता स्वायम्भुवमनु और ये देवर्षि नारद जी सभी विवश होकर उन श्री हरि के आदेश का पालन करते हैं ॥

द्वादशः श्लोकः

न तस्य कश्चित्तपसा विद्यया वा न योगवीर्येण मनीषया वा ।
नैवार्थधर्मैः परतः स्वतो वा कृतं विहन्तुं तनुभृद्विभूयात् ॥१२॥

पदच्छेद— न तस्य कश्चित् तपसा विद्यया वा न योग वीर्येण मनीषया वा ।
न एव अर्थ धर्मैः परतः स्वतः वा कृतम् विहन्तुम् तनुभृद् विभूयात् ॥

शब्दार्थ—

न	३.	नहीं	न एव	११.	नहीं
तस्य	१७.	उन श्री हरि के	अर्थ	१२.	अर्थ
कश्चित्	१.	कोई भी	धर्मैः	१३.	धर्म
तपसा	४.	तपस्या	परतः	१४.	दूसरे
विद्यया	६.	ज्ञान से	स्वतः	१६.	स्वयम् के प्रभाव से
वा	५.	अथवा	वा	१५.	अथवा
न योग	७.	न योग की	कृतम्	१८.	विधान को
वीर्येण	८.	शक्ति	विहन्तुम्	१९.	टालने में
मनीषया	१०.	बुद्धि से (और)	तनुभृद्	२.	शरीरधारी
वा ।	९.	अथवा	विभूयात् ॥	२०.	समर्थ हो सकता है

श्लोकार्थ—कोई भी शरीरधारी नहीं तपस्या अथवा ज्ञान से न योग की शक्ति अथवा बुद्धि से और नहीं अर्थ, धर्म दूसरे अथवा स्वयम् के प्रभाव से भगवान् श्री हरि के विधान को टालने में समर्थ हो सकता है ॥

त्रयोदशः श्लोक

भवाय नाशाय च कर्म कर्तुं शोकाय मोहाय सदा भयाय ।
सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनताङ्ग धत्ते ॥१३॥

पदच्छेद— भवाय नाशाय च कर्म कर्तुम् शोकाय मोहाय सदा भयाय ।
सुखाय दुःखाय च देह योगम् अव्यक्त दिष्टम् जनता अङ्ग धत्ते ॥

शब्दार्थ—

भवाय	२.	जन्म	सुखाय	११.	सुख
नाशाय	३.	मरण	दुःखाय	१२.	दुःख भोगने के लिये
च	७.	और	च	१०.	तथा
कर्म	८.	कर्म	देह	१६.	शरीर से
कर्तुम्	९.	करने के लिये	योगम्	१८.	सम्बन्ध
शोकाय	४.	शोक	अव्यक्त	१४.	अव्यक्त ईश्वर के
मोहाय	५.	मोह	दिष्टम्	१५.	दिये हुये
सदा	१७.	सदा	जनता	१३.	सब जीव
भयाय	६.	भय	अङ्ग	१.	हे विप्रवर
			धत्ते ॥	१९.	रखते हैं

श्लोकार्थ—हे विप्रवर ! जन्म-मरण, शोक, मोह, भय और कर्म, करने के लिये तथा सुख, दुःख भोगने के लिये सब जीव अव्यक्त ईश्वर के दिये हुये शरीर से सदा सम्बन्ध रखते हैं ॥

चतुर्दशः श्लोकः

यद्वाचि तन्त्यां गुणकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः ।
सर्वे वहामो बलिमीश्वराय प्रोता नसीव द्विपदे चतुष्पदः ॥१४॥

पदच्छेद— यद् वाचि तन्त्याम् गुण कर्म दामभिः सुदुस्तरैः वत्स वयम् सुयोजिताः ।
सर्वे वहामः बलिम् ईश्वराय प्रोता नसो इव द्विपदे चतुष्पदः ॥

शब्दार्थ—

यद्	१.	जिन श्री हरि की	सर्वे	८.	सब
वाचि तन्त्याम्	२.	वेद वाणी रूप डोरी में	वहामः	१३.	सेवा करते हैं
गुण	३.	सत्त्वादि गुण (और)	बलिम्	१२.	सत्कर्मों से
कर्म	४.	कर्म बोधक	ईश्वराय	११.	ईश्वर की (वैसे ही)
दामभिः	६.	रस्सी से	प्रोता	१६.	नथा हुआ
सुदुस्तरैः	५.	मजबूत	नसी	१५.	नाक में
वत्स	१०.	हे तात (हम)	इव	१४.	जैसे
वयम्	७.	हम	द्विपदे	१८.	मनुष्य की (सेवा करता है)
सुयोजिताः ।	९.	बाँधे गये हैं	चतुष्पदः ॥	१७.	बैल

श्लोकार्थ—जिन श्री हरि की वेद वाणी रूप डोरी में सत्त्वादि गुण और कर्म बोधक मजबूत रस्सी से हम सब बाँधे गये हैं । हे तात ! हम ईश्वर की वैसे ही सत्कर्मों से सेवा करते हैं, जैसे नाक में नथा हुआ बैल मनुष्य की सेवा करता है ॥

पञ्चदशः श्लोकः

ईशाभिसृष्टं ह्यवरुन्ध्महेऽङ्ग दुःखं सुखं वा गुणकर्मसङ्गात् ।
आस्थाय तत्तद्यदयुङ्क्त नाथश्चक्षुष्मतान्धा इव नीयमानाः ॥१५॥

पदच्छेद—ईशा अभिसृष्टम् हि अवरुन्ध्महे अङ्ग दुःखम् सुखम् वा गुण कर्म सङ्गात् ।
आस्थाय तत् तद् यद् अयुङ्क्त नाथः चक्षुष्मता अन्धा इव नीयमानाः ॥

शब्दार्थ—

ईशा	१०.	ईश्वर के द्वारा	आस्थाय	९.	स्वीकार करके हम लोग
अभिसृष्टम्	११.	दिये गये	तत्	७.	उस
हि	१५.	ही	तद्	८.	उस योनि को
अवरुन्ध्महे	१६	स्वीकार करते हैं	यद्	५.	जो शरीर
अङ्ग	१.	हे प्रियव्रत	अयुङ्क्त	६.	दिया है
दुःखम्	१२.	दुःख	नाथः	४.	स्वामी श्री हरि ने हमें
सुखम्	१४.	सुख को	चक्षुष्मता	१९.	आँख वाले का
वा	१३.	अथवा	अन्धाः	१८.	अन्धे पुरुष
गुणकर्म	२.	सत्त्वादिगुण और कर्मों के	इव	१७.	जैसे
सङ्गात् ।	३.	अनुसार	नीयमानाः ॥	२०.	अनुसरण करता है

श्लोकार्थ—हे प्रियव्रत ! सत्त्वादिगुण और कर्मों के अनुसार स्वामी श्री हरि ने हमें जो शरीर दिया है । उस-उस योनि को स्वीकार करके हम लोग ईश्वर के द्वारा दिये गये दुःख अथवा सुख को ही स्वीकार करते हैं । जैसे अन्धा मनुष्य आँख वाले का अनुसरण करता है ॥

षोडशः श्लोकः

मुक्तोऽपि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः ।
यथानुभूतं प्रतियातनिद्रः किं त्वन्यदेहाय गुणान्न वृङ्क्ते ॥१६॥

पदच्छेद— मुक्तः अपि तावद् बिभृयात् स्वदेहम् आरब्धम् अश्नन् अभिमान शून्यः ।
यथा अनुभूतम् प्रतियात निद्रः किम् तु अन्य देहाय गुणान् न वृङ्क्ते ॥

शब्दार्थ—

मुक्तः अपि	५.	मुक्त पुरुष भी	यथा	१.	जैसे
तावद्	११.	मृत्यु तक	अनुभूतम्	४.	मनुष्य स्वप्न का अनुभव करता है
बिभृयात्	१२.	धारण किये रहता है	प्रतियात	३.	समाप्त हो जाने पर भी
स्वदेहम्	१०.	अपने शरीर को	निद्रः	२.	नींद के
आरब्धम्	६.	प्रारब्ध के कर्मों का	किम् तु	१३.	परन्तु
अश्नन्	७.	भोग करता हुआ	अन्य देहाय	१४.	दूसरे जन्म के लिये
अभिमान	८.	अहंकार से	गुणान्	१५.	कर्मों को
शून्यः ।	९.	रहित होकर	न वृङ्क्ते ॥	१६.	नहीं करता है

श्लोकार्थ—जैसे नींद के समाप्त हो जाने पर भी मनुष्य स्वप्न का अनुभव करता है; उसी प्रकार मुक्त पुरुष भी प्रारब्ध के कर्मों का भोग करता हुआ अहंकार से रहित होकर अपने शरीर को मृत्यु तक धारण किये रहता रहता है । परन्तु दूसरे जन्म के लिये कर्मों को नहीं करता है ॥

सप्तदशः श्लोकः

भयं प्रमत्तस्य वनेष्वपि स्याद् यतः स आस्ते सहषट्सपत्नः ।
जितेन्द्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम् ॥१७॥

पदच्छेद— भयम् प्रमत्तस्य वनेषु अपि स्याद् यतः सः आस्ते सह षट् सपत्नः ।
जितेन्द्रियस्य आत्मरतेः बुधस्य गृहाश्रमः किम् नु करोति अवद्यम् ॥

शब्दार्थ—

भयम्	३.	संसार का भय	जितेन्द्रियस्य	९.	इन्द्रियों को वश में रखने वाले
प्रमत्तस्य	१.	इन्द्रियों से असावधान पुरुष को	आत्मरतेः	१०.	आत्माराम
वनेषु अपि	२.	वनों में भी	बुधस्य	११.	ज्ञानी पुरुष में
स्याद्	४.	हो सकता है	गृहाश्रमः	१३.	गृहस्थाश्रम
यतः सः	५.	क्योंकि वह	किम् नु	१२.	क्या
आस्ते	८.	रहता है (किन्तु)	करोति	१५.	उत्पन्न कर सकता है
सह	७.	साथ	अवद्यम् ॥	१४.	रागादि दोष
षट्सपत्नः ।	६.	छः शत्रुओं के			

श्लोकार्थ—इन्द्रियों से असावधान पुरुष को वनों में भी संसार का भय हो सकता है। क्योंकि वह छः शत्रुओं के साथ रहता है। किन्तु इन्द्रियों को वश में रखने वाले आत्माराम ज्ञानी पुरुष में गृहस्थाश्रम क्या रागादि दोष उत्पन्न कर सकता है ॥

अष्टादशः श्लोकः

यः षट् सपत्नान् विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वम् ।
अत्येति दुर्गाश्रित ऊर्जितारीन् क्षीणेषु कामं विचरेद्विपश्चित् ॥१८॥

पदच्छेद— यः षट् सपत्नान् विजिगीषमाणः गृहेषु निर्विश्य यतेत पूर्वम् ।
अति एति दुर्ग आश्रित ऊर्जित अरीन् क्षीणेषु कामम् विचरेत् विपश्चित् ॥

शब्दार्थ—

यः	१.	जो पुरुष मन बुद्धि इन्द्रियादि	अति एति	१२.	जीत लेता है (फिर)
षट्	२.	छः	दुर्ग आश्रित	९.	जैसे राजा किले में रहकर ही
सपत्नान्	३.	शत्रुओं को	ऊर्जित	१०.	बलवान्
विजिगीषमाणः	४.	जीतना चाहता है (वह)	अरीन्	११.	शत्रुओं को
गृहेषु	६.	गृहस्थाश्रम में	क्षीणेषु	१३.	शत्रुओं के नष्ट हो जाने पर
निर्विश्य	७.	रहकर ही	कामम्	१५.	इच्छानुसार
यतेत	८.	उन्हें जीतने का प्रयत्न करे	विचरेत्	१६.	विचरण करे
पूर्वम् ।	५.	पहले	विपश्चित् ॥	१४.	ज्ञानी पुरुष

श्लोकार्थ— जो पुरुष मन, बुद्धि, इन्द्रियादि छः शत्रुओं को जीतना चाहता है, वह पहले गृहस्थाश्रम में रहकर ही उन्हें जीतने का प्रयत्न करे, जैसे राजा किले में रहकर ही बलवान् शत्रुओं को जीत लेता है। फिर शत्रुओं के नष्ट हो जाने पर ज्ञानी पुरुष इच्छानुसार विचरण करे ॥

एकोनविंशः श्लोक

त्वं त्वब्जनाभाङ्घ्रिसरोजकोशदुर्गाश्रितो निर्जितषट्सपत्नः ।
भुङ्क्ष्वेह भोगान् पुरुषातिदिष्टान् विमुक्तसङ्गः प्रकृतिं भजस्व ॥१९॥

पदच्छेद—त्वम् तु अब्जनाभ अङ्घ्रि सरोज कोश दुर्ग आश्रितः निर्जित षट् सपत्नः ।
भुङ्क्ष्व इह भोगान् पुरुष अतिदिष्टान् विमुक्त सङ्गः प्रकृतिम् भजस्व ॥

शब्दार्थ—

त्वम् तु	१.	तुम तो	भुङ्क्ष्व	१४.	भोग करो (तथा)
अब्जनाभ	२.	कमलनाभ भगवान् श्री हरि के	इह	१०.	यहाँ
अङ्घ्रि	३.	चरण	भोगान्	१३.	भोगों का
सरोज	४.	कमल के	पुरुष	११.	आदि पुरुष के द्वारा
कोष	५.	घेरे रूपी	अतिदिष्टान्	१२.	दिये गये
दुर्ग आश्रितः	६.	किले का सहारा लेकर	विमुक्त	१६.	छोड़कर
निर्जित	९.	जीत चुके हो (फिर भी)	सङ्गः	१५.	आसक्ति को
षट्	७.	छहों	प्रकृतिम्	१७.	आत्म स्वरूप का
सपत्नः ।	८.	शत्रुओं को	भजस्व ॥	१८.	भजन करना

श्लोकार्थ—तुम तो कमलनाभ भगवान् श्री हरि के चरण कमल के घेरेरूपी किले का सहारा लेकर छहों शत्रुओं को जीत चुके हो । फिर भी यहाँ आदि पुरुष के द्वारा दिये गये भोगों का भोग करो । तथा आसक्ति को छोड़कर आत्मस्वरूप का भजन करना ॥

विंशः श्लोकः

श्रीशुक उवाच—इति समभिहितो महाभागवतो भगवतस्त्रिभुवनगुरोर-नुशासनमात्मनो लघुतयावनतशिरोधरो बाढमिति सबहुमानमुवाह ॥२०॥

पदच्छेद—इति समभिहितः महाभागवतः भगवतः त्रिभुवन गुरोः अनुशासनम् आत्मनः ।
लघु तया अवनत शिरोधरः बाढम् इति सबहुमानम् उवाह ॥

शब्दार्थ—

इति	१.	ऐसा	लघुतया	५.	छोटा होने से
समभिहितः	२.	कहने पर	अवनत	११.	झुकाकर
महाभागवतः	३.	परम भगवद् भक्त (राजा प्रियव्रत)	शिरोधरः	१०.	कन्धा
भगवतः	८.	भगवान् (ब्रह्माजी के)	बाढम्	१२.	ठीक है
त्रिभुवन	६.	त्रिलोकी के	इति	१३.	ऐसा कहते हुये
गुरोः	७	गुरु	सबहुमानम्	१४.	आदर के साथ
अनुशासनम्	९.	आदेश को	उवाह ॥	१५.	स्वीकार कर लिया
आत्मनः ।	४.	स्वयम्			

श्लोकार्थ—ऐसा कहने पर परम भगवद् भक्त राजा प्रियव्रत ने स्वयम् छोटा होने से त्रिलोकी के गुरु भगवान् ब्रह्मा जी के आदेश को कन्धा झुकाकर ठीक है ऐसा कहते हुये आदर के साथ स्वीकार कर लिया ॥

एकविंशः श्लोकः

भगवानपि मनुना यथावदुपकल्पितापचितिः प्रियव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मनसं क्षयमव्यवहृतं प्रवर्तयन्नगमत् ॥२१॥

पदच्छेद—भगवान् अपि मनुना यथावत् उपकल्पित अपचितिः प्रियव्रत नारदयोः अविषमम् अभि समीक्षमाणयोः आत्म समवस्थानम् अवाङ्मनसम् क्षयम् अव्यवहृतम् प्रवर्तयन् अगमत् ॥

शब्दार्थ—

भगवान्	१.	भगवान ब्रह्मा जी	अविषमम्	९.	सरल भाव से
अपि	२.	भी	अभिसमीक्षमाणयो	१०.	देखे जाते हुये (तथा स्वयं)
मनुना	३.	मनु के द्वारा	आत्म	१४.	अपने
यथावत्	४.	विधि पूर्वक	समवस्थानम्	१५.	सत्य धाम
उपकल्पित	६.	प्राप्त करके	अवाङ् मनसम्	११.	वाणी और मन से परे (श्री हरि को)
अपचितिः	५.	पूजा	क्षयम्	१६.	ब्रह्मलोक को
प्रियव्रत	७.	राजा प्रियव्रत (और)	अव्यवहृतम्	१२.	निरन्तर
नारदयोः	८.	देवर्षि नारद के द्वारा	प्रवर्तयन्	१३.	चिन्तन करते हुये
			अगमत् ॥	१७.	चले गये

श्लोकार्थ—भगवान् ब्रह्माजी भी मनु के द्वारा विधि पूर्वक पूजा प्राप्त करके राजा प्रियव्रत और देवर्षि-नारद के द्वारा सरल भाव से देखे जाते हुये तथा स्वयं वाणी और मन से परे श्री हरि के निरन्तर चिन्तन करते हुये अपने सत्यधाम ब्रह्मलोक को चले गये ॥

द्वाविंशः श्लोकः

मनुरपि परेणैवं प्रतिसन्धितमनोरथः सुरर्षिवरानुमतेनात्मजमखिलधरामण्डलस्थितिगुप्तय आस्थाप्य स्वयमतिविषम विषयविषजलाशयाशाया उपरराम॥२२॥

पदच्छेद—मनुः अपि परेण एवम् प्रतिसन्धित मनोरथः सुरर्षिवर अनुमतेन आत्मजम् अखिल धरामण्डलस्थिति गुप्तये आस्थाप्य स्वयम् अतिविषम विषय विष जलाशय आशायाः उपरराम ॥

शब्दार्थ—

मनुः अपि	५.	स्वायम्भुव मनु ने भी	धरामण्डल	१०.	पृथ्वी मण्डल के
परेण	२.	ब्रह्माजी के द्वारा	स्थिति	११.	पालन (और)
एवम्	१.	इस प्रकार	गुप्तये	१२.	रक्षा के लिये
प्रतिसन्धित	४.	पूर्ण कर दिये जाने पर	आस्थाप्य	१३.	सिंहासन पर बैठाकर
मनोरथः	३.	मनोरथ	स्वयम्	१४.	अपने आप
सुरर्षिवर	६.	देवर्षिनारद जी की	अतिविषम	१५.	अत्यन्त दुस्तर
अनुमतेन	७.	आज्ञा से	विषयविष	१६.	विषय रूपी विष के
आत्मजम्	८.	अपने पुत्र प्रियव्रत को	जलाशय	१७.	तालाब रूपी राज्य की
अखिल	९.	सम्पूर्ण	आशायाः	१८.	ओर से
			उपरराम ॥	१९.	विराम ले लिया

श्लोकार्थ—इस प्रकार ब्रह्मा जी के द्वारा मनोरथ पूर्णकर दिये जाने पर देवर्षिनारद जी की आज्ञा से अपने पुत्र प्रियव्रत को सम्पूर्ण पृथ्वी मण्डल के पालन और रक्षा के लिये सिंहासन पर बैठाकर अपने आप अत्यन्त दुस्तर विषय रूपी विष के तालाब रूपी राज्य की ओर से विराम ले लिया ॥

त्रयोविंशः श्लोकः

इति ह वाव स जगतीपतिरीश्वरेच्छयाधिनिवेशितकर्माधिकारोऽखिल-जगद्बन्धध्वंसनपरानुभावस्य भगवत आदिपुरुषस्याङ्घ्रियुगलानवरत-ध्यानानुभावेन परिरन्धितकषायाशयोऽवदातोऽपि मानवर्धनो महतां महीतलमनुशशास ॥२३॥

पदच्छेद—

इति ह वाव सः जगतीपतिः ईश्वरेच्छया अधिनिवेशितकर्म अधिकारः अखिल जगद्बन्ध ध्वसंन पर अनुभावस्य भगवतः आदि पुरुषस्य अङ्घ्रि युगल अनवरतध्यान अनुभावेन परिरन्धित कषाय आशयः अवदातः अपि मान वर्धनः महताम् महीतलम् अनुशशास ॥

शब्दार्थ—

इति	२१.	इस प्रकार	अङ्घ्रि	८.	चरण
ह वाव	२२.	प्रसिद्ध है कि	युगल	९.	कमलों के
सः	२५.	उस राजा प्रियव्रत ने	अनवरत	१०.	निरन्तर
जगती	२३.	पृथ्वी के	ध्यान	११.	चिन्तन के
पतिः	२४.	स्वामी	अनुभावेन	१२.	प्रभाव से (राजा प्रियव्रत के)
ईश्वरेच्छया	२६.	भगवान् की इच्छा से	परिरन्धित	१५.	जल गये थे (अतः)
अधिनिवेशित	२९.	प्रवेश करके	कषाय	१४.	सारे दोष
कर्म	२७.	कर्म के	आशयः	१३.	चित्त के रागादि
अधिकारः	२८.	क्षेत्र में	अवदातः	१६.	वे निर्मल होकर
अखिल	१.	सम्पूर्ण	अपि	१७.	भी
जगतः	२.	संसार के	मान	१९.	मान को
बन्ध	३.	बन्धन को	वर्धनः	२०.	बढ़ाने वाले थे
ध्वंसन	४.	मिटाने की	महताम्	१८.	बड़े लोगों के
पर अनुभावस्य	५.	कृपा करने वाले	मही	३०.	पृथ्वी
भगवतः	७.	भगवान् श्री हरि के	तलम्	३१.	तल पर
आदि पुरुष	६.	आदि पुरुष	अनुशशास ॥	३२.	शासन किया

श्लोकार्थ—सम्पूर्ण संसार के बन्धन को मिटाने की कृपा करने वाले आदि पुरुष भगवान् श्री हरि के चरण कमलों के निरन्तर चिन्तन के प्रभाव से राजा प्रियव्रत के सारे दोष जल गये थे। अतः वे निर्मल होकर भी बड़े लोगों के मान को बढ़ाने वाले थे। इस प्रकार प्रसिद्ध है कि पृथ्वी के स्वामी उस राजा प्रियव्रत ने भगवान् की इच्छा से कर्म के क्षेत्र में प्रवेश करके पृथ्वी तल पर शासन किया ॥

चतुर्विंशः श्लोकः

अथ च दुहितरं प्रजापतेर्विश्वकर्मण उपयेमे बर्हिष्मतीं नाम तस्यामु ह वाव आत्मजानात्मसमानशील गुणकर्मरूपवीर्योदारान्दश भावयाम्बभूव कन्यां च यवीयसीमूर्जस्वतीं नाम ॥२४॥

पदच्छेद—अथ च दुहितरम् प्रजापतेः विश्वकर्मणः उपयेमे बर्हिष्मतीं नाम तस्याम् उह वाव आत्म जानात्म समानशील गुणकर्मरूपवीर्योदारान्दश भावयाम्बभूव कन्याम् च यवीयसीम् ऊर्जस्वतीम् नाम ॥

शब्दार्थ—

अथ च	१.	तदनन्तर (उन्होंने)	आत्मसमान	९	अपने समान
दुहितरम्	५.	पुत्री से	शील गुण	१०.	चरित्र गुण
प्रजापतेः	२.	प्रजापति	कर्म रूप	११.	कर्म सौन्दर्य और
विश्वकर्मणः	३.	विश्वकर्मा की	वीर्य उदारान्	१२.	पराक्रम से परिपूर्ण
उपयेमे	६.	विवाह किया	दश	१४.	दस
बर्हिष्मतींनाम	४.	बर्हिष्मती नाम की	भावयाम्बभूव	२०.	उत्पन्न किया
तस्याम्	८.	उससे	कन्याम्	१९.	कन्या को
उ ह	१३.	अलौकिक और प्रसिद्ध	च	१६.	और
वाव	७.	और	यवीयसीम्	१७.	सबसे छोटी
आत्मजान्	१५.	पुत्रों को	ऊर्जस्वतीम् नाम ॥	१८.	ऊर्ज स्वती नाम की

श्लोकार्थ—तदनन्तर उन्होंने प्रजापति विश्वकर्मा की बर्हिष्मती नाम की पुत्री से विवाह किया। और उससे अपने समान चरित्र, गुण, कर्म, सौन्दर्य और पराक्रम से परिपूर्ण अलौकिक और प्रसिद्ध दस पुत्रों को और सबके छोटी ऊर्जस्वती नाम की कन्या को उत्पन्न किया ॥

पञ्चविंशः श्लोकः

आग्नीध्रेध्मजिह्वयज्ञबाहुमहावीरहिरण्यरेतोघृतपृष्ठसवनमेधातिथिवीतिहोत्रकवय इति सर्व एवाग्निनामानः ॥२५॥

पदच्छेद—आग्नीध्र इध्मजिह्व यज्ञबाहु महावीर हिरण्यरेतः घृत पृष्ठ सवन मेधातिथि वीतिहोत्र कवयः इति सर्वे एव अग्निः नामानः ॥

शब्दार्थ—

आग्नीध्र	५.	(क्रमशः) आग्नीध्र	मेधातिथि	१२.	मेधा तिथि
इध्मजिह्व	६.	इध्मजिह्व	वीतिहोत्र	१३.	वीति होत्र
यज्ञबाहु	७.	यज्ञ बाहु	कवयः इति	१४.	कवि ये (नाम थे)
महावीर	८.	महावीर	सर्वे	४.	उन सबके
हिरण्यरेतः	९.	हिरण्यरेतः	एव	३.	ही
घृत पृष्ठ	१०.	घृत पृष्ठ	अग्निः	१.	अग्नि के
सवन	११.	सवन	नामानः ॥	२.	दस नामों पर

श्लोकार्थ—अग्नि के दस नामों पर ही उन सबके क्रमशः आग्नीध्र, इध्मजिह्व यज्ञ बाहु, महावीर, हिरण्यरेतः, घृतपृष्ठ, सवन, मेधातिथि, वीतिहोत्र, कवि ये नाम थे ॥

षड्विंशः श्लोकः

एतेषां कविर्महावीरः सवन इति सर्व त्रय आसन्नूर्ध्वरेतसस्त आत्मविद्यायामर्भभावादारभ्य कृतपरिचयाः पारमहंस्यमेवाश्रममभजन् ॥२६॥

पदच्छेद—

एतेषाम् कविः महावीरः सवनः इति त्रयः आसन् ऊर्ध्वरेतसः ते आत्मविद्यायाम् अर्भभावात् आरम्य कृत परिचयाः पारमहंस्यम् एव आश्रमम् अभजन् ॥

शब्दार्थ—

एतेषाम्	१.	इन दसों पुत्रों में	आत्मविद्यायाम्	१२.	ब्रह्म विद्या का
कविः	२.	कवि	अर्भभावात्	१०.	बाल्यकाल से
महावीरः	३	महावीर और	आरम्य	११.	लेकर बहुत दिनों तक
सवनः	४.	सवन	कृत	१४.	करने के कारण
इति	५.	ये	परिचयाः	१३.	अभ्यास
त्रयः	६.	तीन	पारमहंस्यम्	१५.	अन्त में संन्यास
आसन्	८.	थे	एव	१७.	ही
ऊर्ध्वरेतसः	७.	बाल ब्रह्मचारी	आश्रमम्	१६.	आश्रम को
ते	९.	उन्होंने	अभजन् ॥	१८.	स्वीकार किया

श्लोकार्थ—इन दसों पुत्रों में से कवि, महावीर, सवन ये तीन बाल ब्रह्मचारी थे। उन्होंने बाल्यावस्था से लेकर बहुत दिनों तक ब्रह्मविद्या का अभ्यास करने के कारण अन्त में संन्यास आश्रम को ही स्वीकार किया ॥

सप्तविंशः श्लोकः

तस्मिन्नु ह वा उपशमशीलाः परमर्षयः सकलजीवनिकायावासस्य भगवतो वासुदेवस्य भीतानां शरणभूतस्य श्रीमच्चरणारविन्दाविरतस्मरणाविगलितपरमभक्तियोगानुभावेन परिभावितान्तर्हृदयाधिगते भगवति सर्वेषां भूतानामात्मभूते प्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेण समीयुः ॥२७॥

पदच्छेद—

तस्मिन् उह वा उपशमशीलाः परमर्षयः सकल जीव निकाय आवासस्य भगवतः वासुदेवस्य भीतानाम् शरण भूतस्य श्रीमत् चरणारविन्द अविरत स्मरण अविगलित परम भक्तियोग अनुभावेन परिभावित अन्तः हृदय अधिगते भगवति सर्वेषाम् भूतानाम् आत्मभूते प्रत्यगात्मनि एव आत्मनः तादात्म्यम् अविशेषेण समीयुः ॥

शब्दार्थ—

तस्मिन्	२.	उस संन्यास आश्रम में	स्मरण	१५.	चिन्तन से प्राप्त
उ	२९.	तदनन्तर उन्होंने	अविगलित	१६.	अखण्ड}
ह	२८.	प्रसिद्ध है कि	परम	१८.	अनन्य
वा	१७.	तथा	भक्तियोग	१९	भक्तिभाव के
उपशमशीलाः	३.	निवृत्तिस्वभाव वाले थे	अनुभावेन	२०.	प्रभाव से उनके
परमर्षयः	१.	वे तीनों महर्षि	परिभावित	२१.	निर्मल
सकल	४.	सम्पूर्ण	अन्तः हृदय	२२.	अन्तः करण में
जीव	५.	प्राणी	अधिगते	२७.	प्रकट हो गये
निकाय	६.	समूह के	भगवति	२६.	भगवान् श्री हरि,
आवासस्य	७.	आश्रय	सर्वेषाम्	२३.	सभी
भगवतः	९.	भगवान्	भूतानाम्	२४.	प्राणियों के
वासुदेवस्य	१०.	श्री हरि के	आत्मभूते	२५.	आत्म स्वरूप
भीतानाम्	७.	संसार से डरे हुये को	प्रत्यगात्मनि	३२.	अन्तरात्मा में
शरणभूतस्य	८.	शरण देने वाले	एव	३३.	ही
श्रीमत्	११.	शोभाशाली	आत्मनः	३१.	अपनी आत्मा को;
चरण	१२.	चरण	तादात्म्यम्	३४.	एकरूप से
अरविन्द	१३.	कमलों में	अविशेषेण	३०.	उपाधि से रहित
अविरत	१४.	निरन्तर	समीयुः ॥	३५.	मिला दिया

श्लोकार्थ—वे तीनों महर्षि उस संन्यास आश्रम में निवृत्ति स्वभाव वाले थे। सम्पूर्ण प्राणि-समूह के आश्रय, संसार से डरे हुये को शरण देने वाले भगवान् श्री हरि के शोभाशाली चरण कमलों में निरन्तर चिन्तन से प्राप्त अखण्ड तथा अनन्य भक्तिभाव के प्रभाव से उनके निर्मल अन्तः करण में सभी प्राणियों के आत्मस्वरूप भगवान् श्री हरि प्रकट हो गये। प्रसिद्ध है कि तदनन्तर उन्होंने उपाधि से रहित अपनी आत्मा को अन्तरात्मा में ही एक रूप से मिला दिया ॥

अष्टाविंशः श्लोकः

अन्यस्यामपि जायायां त्रयः पुत्रा आसन्नुत्त-
मस्तामसो रैवत इति मन्वन्तराधिपतयः ॥२८॥

पदच्छेद—

अन्यस्याम् अपि जायायाम् त्रयः पुत्रा आसन् उत्तमः
तामसः रैवतः इति मन्वन्तर अधिपतयः ॥

शब्दार्थ—

अन्यस्याम्	१.	राजा प्रियव्रत की दूसरी	उत्तमः	४.	उत्तम
अपि	३.	भी	तामसः	५.	तामस और
जायायाम्	२.	पत्नी से	रैवतः	६.	रैवत
त्रयः	८.	तीन	इति	७.	इस नाम से
पुत्राः	९.	पुत्र	मन्वन्तर	११.	जो इस नाम वाले मन्वन्तरों के
आसन् ।	१०.	उत्पन्न हुये	अधिपतयः ॥	१२.	स्वामी हुये

श्लोकार्थ—राजा प्रियव्रत की दूसरी पत्नी से भी उत्तम, तामस, रैवत इस नाम के तीन पुत्र उत्पन्न हुये । जो इस नाम वाले मन्वन्तरों के स्वामी हुये ॥

एकोनत्रिंशः श्लोकः

एवमुपशमायनेषु स्वतनयेष्वथ जगतीपतिर्जगतीमर्बुदान्येकादश परिवत्सराणामव्याहताखिलपुरुषकारसारसम्भृतदोर्दण्डयुगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षो बर्हिष्मत्याश्चानुदिनमेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादिभिः पराभूयमानविवेक इवानवबुध्यमान इव महामना बुभुजे ॥२९॥

पदच्छेद—एवम् उपशमायनेषु स्वस्तनयेषु अथ जगतीपतिः जगतीम् अर्बुदानि एकादश परिवत्सराणाम् अव्याहत अखिल पुरुषकार सार सम्भृत दोर्दण्ड युगल आपीडित मौर्वीगुण स्तनित विरमित धर्म प्रतिपक्षः बर्हिष्मतयाः च अनुदिनम् एधमान प्रमोद प्रसरण यौषिण्य व्रीडा प्रमुषित हास अवलोक रुचिरक्ष्वेल्यादिभिः पराभूयमान विवेक इव अनव बुद्ध्यमानः इव महामनाः बुभुजे ॥

शब्दार्थ—

एवम्	१.	इस प्रकार	प्रतिपक्षः	२१.	विरोधी राजा लोग
उपशमायनेषु	३.	संन्यास मार्गानुयायी हो जाने पर	बर्हिष्मत्याः	२४.	अपनी पत्नी बर्हिष्मती के साथ
स्वतनयेषु	२.	अपने तीनों पुत्रों के	च अनुदिनम्	२३.	और प्रतिदिन
अथ	४.	तदनन्तर	एधमान	२५.	बढ़ते हुये
जगतीपतिः	५.	राजा प्रियव्रत ने	प्रमोद	२६.	आमोद-प्रमोद और
जगतीम्	९.	पृथ्वी का	प्रसरण	२७.	अभ्युत्थानादि
अर्बुदानि	७.	अरब	यौषिण्य	२८.	क्रीडा में
एकादश	६.	ग्यारह	व्रीडा	२९.	लज्जा
परिवत्सराणाम्	८.	वर्षों तक	प्रमुषित	३०.	संकोच
अव्याहत	११.	निरन्तर	हास	३१.	हास
अखिल	१२.	सम्पूर्ण	अवलोक	३२.	कटाक्ष और
पुरुषकार	१३.	पुरुषार्थ साधक	रुचिर	३३.	मनोहर
सारसम्भृत	१४.	बल से परिपूर्ण	क्ष्वेल्यादिभिः	३४.	परिहास वचनों से
दोर्दण्ड	१६.	भुजाओं से	पराभूयमानः	३६.	हीन के
युगल	१५.	दोनों	विवेकः	३५.	विवेक
आपीडित	१९.	खींचने पर (उसकी)	इव	३७.	समान (तथा)
मौर्वीगुण	१७.	धनुष की डोरी	अनवबुद्ध्यमानः	३८.	अज्ञानी के
स्तनित	१९.	टंकार से ही	इव	३९.	समान
विरमित	२२.	पराजित हो जाते थे	महामनाः	४०.	वे महामनस्वी राजा प्रियव्रत भोग करने लगे
धर्म	२०.	धर्म के	बुभुजे ॥	१०.	भोग किया

श्लोकार्थ—इस प्रकार अपने तीनों पुत्रों के संन्यास मार्गानुयायी हो जाने पर तदनन्तर राजा प्रियव्रत ने ग्यारह अरब वर्षों तक पृथ्वी का भोग किया। निरन्तर सम्पूर्ण पुरुषार्थ साधक बल से परिपूर्ण दोनों भुजाओं से धनुष की डोरी खींचने पर उसकी टंकार से ही धर्म के विरोधी राजा लोग पराजित हो जाते थे। और प्रतिदिन अपनी पत्नी बर्हिष्मती के बढ़ते हुये आमोद-प्रमोद से और अभ्युथानादि क्रीडा में लज्जा, संकोच, हास, कटाक्ष और परिहास वचनों से विवेक हीन के समान तथा अज्ञानी के समान वे महा मनस्वी राजा प्रियव्रत भोग करने लगे॥

त्रिंशः श्लोकः

यावदवभासयति सुरगिरिमनुपरिक्रामन् भगवानादित्यो वसुधातलमर्धेनैव प्रतपत्यर्धेनावच्छादयति तदा हि भगवदुपासनोपचितातिपुरुष प्रभावस्तदनभिनन्दन् समजवेन रथेन ज्योतिर्मयेन रजनीमपि दिनं करिष्यामीति सप्तकृत्वस्तरणिमनुपर्यक्रामद् द्वितीय इव पतङ्ग ॥३०॥

पदच्छेद—

यावत् अवभासयति सुरगिरिम् अनुपरिक्रामन् भगवान् आदित्यः वसुधातलम् अर्धेन एव प्रपतति अर्धेन एव अवच्छादयति तदा हि भगवत् उपासना उपचित अतिपुरुष प्रभावः तद् अनभिनन्दन् समजवेन रथेन ज्योतिर्मयेन रजनीम् अपि दिनम् करिष्यामि इति सप्तकृत्वः तरणिम् अनुपर्यक्रामत् द्वितोय इव पतङ्गः ॥

शब्दार्थ—

यावत्	६.	जितने भाग को	प्रभावः	१९.	प्रभाव वाले (राजाप्रियव्रत)
अवभासयति	७.	प्रकाशित करते हैं (उसमें)	तद्	२०.	उसे
सुरगिरिम्	३.	सुमेरु पर्वत की	अनभिनन्दन्	२१.	न चाहते हुये कहने लगे
अनुपरिक्रामन्	४.	प्रदक्षिणा करते हुये	समजवेन	२७.	सूर्य के समान वेग वाले
भगवान्	१.	भगवान्	रथेन	२९.	रथ से
आदित्यः	२.	सूर्य	ज्योतिर्मयेन	२८.	प्रकाश स्वरूप
वसुधातलम्	५.	पृथ्वी लोक के	रजनीम्	२२.	रात को
अर्धेन	८.	आधे भाग को	अपि	२३.	भी
एव	९.	ही	दिनम्	२४.	दिन
प्रतपति	१०.	प्रकाशित करते हैं (और)	करिष्यामि	२५.	बना दूंगा
अर्धेन	११.	आधे भाग को	इति	२६.	ऐसी प्रतिज्ञा करके
अवच्छादयति	१२.	अन्धकार में रखते हैं	सप्तकृत्वः	३५.	सात बार
तदा	१३.	उस समय	तरणिम्	३३.	सूर्य के
हि	१४.	ही	अनुपरि	३४.	पीछे-पीछे
भगवत्	१५.	भगवान् श्री हरि की	अक्रामत्	३६.	परिक्रमा की
उपासना	१६.	उपासना भक्ति से	द्वितीयः	३०.	दूसरे
उपचित	१७.	प्राप्त	इव	३२.	समान
अति पुरुष	१८.	अलौकिक	पतङ्गः ॥	३१.	सूर्य के

श्लोकार्थ—भगवान् सूर्य सुमेरु पर्वत की प्रदक्षिणा करते हुये पृथ्वी लोक के जितने भाग को प्रकाशित करते हैं उसमें आधे भाग को ही प्रकाशित करते हैं और आधे भाग को अन्धकार में रखते हैं। उस समय ही भगवान् श्री हरि की उपासना भक्ति से प्राप्त अलौकिक प्रभाव वाले राजा प्रियव्रत उसे न चाहते हुये कहने लगे कि रात को भी दिन बना दूंगा, ऐसी प्रतिज्ञा करके सूर्य के समान वेग वाले प्रकाश स्वरूप रथ से दूसरे सूर्य के समान सूर्य के पीछे-पीछे सात बार परिक्रमा की ॥

एकत्रिंशः श्लोकः

ये वा उ ह तद्रथचरणनेमिकृतपरिखातास्ते सप्त सिन्धव आसन् यत एव कृताः सप्त भुवो द्वीपाः ॥३१॥

पदच्छेद—ये वा उ ह तद् रथ चरण नेमिकृत परिखाताःते सप्तसिन्धवः आसन् यत एव कृताः सप्त भुवः द्वीपाः ॥

शब्दार्थ—

ये	५.	जो	सप्त	९.	सात
वा	१२.	तथा	सिन्धवः	१०.	समुद्र
उ ह	१.	प्रसिद्ध है कि	आसन्	११.	हुये
तद्	२.	उन राजा प्रियव्रत के	यतः	१३.	जिसके कारण
रथ चरण	३.	रथ के पहिये के	एव	१४.	ही
नेमि	४.	अग्र भाग से	कृताः	१८.	बन गये
कृत	७.	बनी थी	सप्त	१६.	सात
परिखाताः	६.	लकीरें	भुवः	१५.	पृथ्वी के
ते	८.	वे	द्वीपाः ॥	१७.	द्वीप

श्लोकार्थ—प्रसिद्ध है कि उन राजा प्रियव्रत के रथ के पहिये के अग्रभाग से जो लकीरें बनी थीं वे सात समुद्र हुये तथा जिसके कारण ही पृथ्वी के सात द्वीप बन गये ॥

द्वात्रिंशः श्लोकः

जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्करसंज्ञास्तेषां परिमाणं पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो यथासंख्यं द्विगुणमानेन बहिः समन्तत उपक्लृप्ताः ॥३२॥

पदच्छेद—जम्बूप्लक्ष शाल्मलि कुश क्रौञ्च शाक पुष्कर संज्ञाः तेषाम् परिमाणम् पूर्वस्मात् पूर्वस्मात् उत्तरः उत्तरः यथासंख्यम् द्विगुण मानेन बहिः समन्तत उपक्लृप्ताः ॥

शब्दार्थ—

जम्बू, प्लक्ष	१.	जम्बू, प्लक्ष	पूर्वस्मात्	१३.	पहले के द्वीप के
शाल्मलि	२.	शाल्मलि	उत्तरः	१४.	बाद
कुश, क्रौञ्च	३.	कुश, क्रौञ्च	उत्तरः	१५.	बाद के द्वीप
शाक	४.	शाक द्वीप और	यथासंख्यम्	१६.	क्रमशः
पुष्कर	५.	पुष्कर	द्विगुण	१७.	दुगने
संज्ञाः	६.	नाम के द्वीप	मानेन	१८.	परिमाण के थे
तेषाम्	१०.	उनका	बहिः	७.	बाहर
परिमाणम्	११.	विस्तार	समन्ततः	८.	चारों ओर
पूर्वस्मात्	१२.	पहले	उपक्लृप्ताः ॥	९.	बने थे

श्लोकार्थ—जम्बू, प्लक्ष, शाल्मलि, कुश, क्रौञ्च, शाक द्वीप और पुष्कर नाम के द्वीप बाहर चारों ओर बने थे। उनका विस्तार पहले-पहले के द्वीप से बाद-बाद के द्वीप क्रमशः दुगने परिमाण के थे।

त्रयस्त्रिंशः श्लोकः

क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः सप्त द्वीपपरिखा इवाभ्यन्तरद्वीपसमाना एकैकश्येन यथानुपूर्वं सप्तस्वपि बहिर्द्वीपेषु पृथक्परित उपकल्पितास्तेषु जम्ब्वादिषु बर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्यरेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान् यथासंख्येनैकैकस्मिन्नेकमेवाधिपतिं विदधे ॥३३॥

पदच्छेद—क्षारोद इक्षुरसोद सुरोद घृतोद क्षीरोद दधि मण्डोद शुद्ध उदाः सप्त जलधयः सप्त द्वीप परिखाः इव अभ्यन्तर द्वीप समानाः एक एकश्येन यथा अनुपूर्वम् सप्त सु अपि बहिः द्वीपेषु पृथक् परितः उपकल्पिताः तेषु जम्बू आदिषु बर्हिष्मतीपतिः अनुव्रतान् आत्मजान् आग्नीध्र इध्मजिह्व यज्ञबाहु हिरण्यरेतः घृतपृष्ठ मेधातिथि वीतिहोत्र संज्ञान् यथा संख्येन एकैकस्मिन् एकम् एव अधिपतिम् विदधे ॥

शब्दार्थ—

क्षारोद	५.	खारे पानी के	परितः	१९.	चारों ओर
इक्षुरसोद	६.	गन्ने के रस के	उपकल्पिताः	२०.	बनाये गये थे
सुरोद	७.	मदिरा के जल के	तेषु	२१.	उन
घृतोद	८.	घी के	जम्बू	२२.	जम्बू
क्षीरोद	९.	दूध के	आदिषु	२३.	इत्यादि सातों द्वीपों में
दधिमण्डोद	१०.	मट्ठा और	बर्हिष्मती	२४.	बर्हिष्मती के
शुद्ध उदाः	११.	शुद्ध जल के	पतिः	२५.	पति राजा प्रियव्रत ने अपने
सप्त जलधयः	१२.	सात समुद्र	अनुव्रतान्	३०.	आज्ञाकारी
सप्तद्वीप	१.	सातों द्वीपों की	आत्मजान्	३१.	पुत्रों को
परिखाः इव	२.	खाई के समान	आग्नीध्र इध्मजिह्व	२६.	आग्नीध्र इध्मजिह्व
अभ्यन्तर द्वीप	३.	अन्दर घिरे हुये द्वीप के	यज्ञबाहु हिरण्यरेतः	२७.	यज्ञबाहु हिरण्यरेतः
समानाः	४.	समान परिमाण में	घृतपृष्ठ मेधातिथि	२८.	घृतपृष्ठ मेधातिथि
एक एकश्येन	१६.	प्रत्येक द्वीप के	वीतिहोत्र संज्ञान्	२९.	वीतिहोत्र नाम के
यथा अनुपूर्वम्	१३.	क्रम से	यथा संख्येन	३२.	क्रम से
सप्तसु अपि	१४.	सातो ही	एकैकस्मिन्	३३.	प्रत्येक द्वीप में
बहिः	१७.	बाहर	एकम् एव	३४.	एक को ही
द्वीपेषु	१५.	द्वीपों में से	अधिपतिम्	३५.	राजा
पृथक्	१८.	अलग-अलग	विदधे ॥	३६.	बनाया

श्लोकार्थ—सातों द्वीपों की खाई के समान अन्दर घिरे हुये द्वीप के समान परिमाण में खारे पानी के, गन्ने के रस के, मदिरा के जल के, घी के, दूध के, मट्ठा के और शुद्ध जल के सात समुद्र क्रम से सातों ही बाहर द्वीपों में से प्रत्येक द्वीप के बाहर अलग-अलग चारों ओर बनाये गये थे। उन जम्बू इत्यादि सातों द्वीपों में बर्हिष्मती के पति राजा प्रियव्रत ने अपने आग्नीध्र, इध्मजिह्व, यज्ञबाहु, हिरण्यरेतः घृतपृष्ठ, मेधातिथि. वीतिहोत्र नाम के आज्ञाकारी पुत्रों को क्रम से प्रत्येक द्वीप में एक-एक को राजा बनाया ॥

चतुस्त्रिंशः श्लोकः

दुहितरं चोर्जस्वतीं नामोशनसे प्रायच्छद्यस्यामासीद् देवयानी नाम काव्यसुता ॥३४॥

पदच्छेद— दुहितरम् च ऊर्जस्वतीम् नाम उशनसे प्रायच्छत् ।
यस्याम् आसीत् देवयानी नाम काव्य सुता ॥

शब्दार्थ—

दुहितरम्	५. पुत्री का		यस्याम्	७. जिससे
च	१. तथा		आसीत्	१२. उत्पन्न हुई
ऊर्जस्वतीम्	३. ऊर्जस्वती		देवयानी	८. देवयानी
नाम	४. नाम की		नाम	९. नाम की
उशनसे	२. शुक्राचार्य से		काव्य	१०. शुक्राचार्य की
प्रायच्छत्	६. विवाह किया		सुता ॥	११. पुत्री

श्लोकार्थ—शुक्राचार्य से ऊर्जस्वती नाम की पुत्री का विवाह किया। जिससे देवयानी नाम की शुक्राचार्य की पुत्री उत्पन्न हुई ॥

पञ्चत्रिंशः श्लोकः

नैवंविधः पुरुषकार उरुक्रमस्य पुंसां तदङ्घ्रिरजसा जितषड्गुणानाम् ।
चित्रं विदूरविगतः सकृदाददीत यन्नामधेयमधुना स जहाति बन्धम् ॥३५॥

पदच्छेद—न एवम् विधः पुरुषकारः उरुक्रमस्य पुंसाम् तद् अङ्घ्रिरजसा जितषड्गुणानाम् ।
चित्रम् विदूर विगतः सकृद् आददीत यत् नाम धेयम् अधुना सः जहाति बन्धम् ॥

शब्दार्थ—

न	६. नहीं है	विदूर	११. भगवान् की भक्ति से दूर
एवम्	३. इस प्रकार का	विगतः	१२. अधम मनुष्य भी
पुरुषकारः	४. पुरुषार्थ	सकृद्	१५. एक बार
उरुक्रमस्य	१. भगवान् श्री हरि के	आददीत	१६. उच्चारण कर लेता है
पुंसाम्	२. भक्तों का	यत्	१३. जिन श्री हरि के
तद्	७. उन भगवान् के	नामधेयम्	१४. नाम का
अङ्घ्रिरजसा	८. चरणों की धूली से जिसने	अधुना	१९. तत्काल
जित	१०. जीत लिया है	सः	१७. वह संसार के
षड्गुणानाम् ।	९. छहों इन्द्रियों को	जहाति	२०. मुक्त हो जाती है
चित्रम्	५. आश्चर्यकारी	बन्धम् ॥	१८. बन्धन से

श्लोकार्थ—भगवान् श्री हरि के भक्तों का इस प्रकार का पुरुषार्थ आश्चर्यकारी नहीं है। उन भगवान् के चरणों की धूली से जिसने छहों इन्द्रियों को जीत लिया है। भगवान् की भक्ति से दूर अधम मनुष्य भी जिन श्री हरि के नाम का एक बार उच्चारण कर लेता है वह संसार के बन्धन से तत्काल मुक्त हो जाता है ॥

षट्त्रिंशः श्लोकः

स एवमपरिमितिबलपराक्रम एकदा तु देवर्षिचरणानुशयनानुपतितगुण-विसर्गसंसर्गेणानिर्वृतमिवात्मानं मन्यमान आत्मनिर्वेद इदमाह ॥३६॥

पदच्छेद— सः एवम् अपरिमित बलपराक्रमः एकदा तु देवर्षि चरण अनुशयन अनुपतित गुणविसर्ग ससंर्गेन अनिर्वृतम् इव आत्मानम् मन्यमानः आत्मनिर्वेदः इदम् आह ॥

शब्दार्थ—

सः	४.	राजा प्रियव्रत ने	विसर्ग	९.	प्रपञ्च के
एवम्	१.	इस प्रकार	संसर्गेण	१०.	संसर्ग से
अपरिमित	२.	असीमित	अनिर्वृतम्	१२.	अशान्त
बल पराक्रम	३.	सहायक और शक्ति शाली	इव	१३.	सा
एकदा तु	१६.	एक बार	आत्मानम्	११.	अपने को
देवर्षि चरण	५.	नारद जी के चरणों की	मन्य मानः	१४.	मानते हुये
अनुशयन	६.	सन्निधि से	आत्मनिर्वेदः	१५.	मन से दुःखी होकर
अनुपतित	७.	प्राप्त	इदम्	१७.	यह
गुण	८.	राज्यादि	आह ॥	१८.	कहा

श्लोकार्थ—इस प्रकार असीमित सहायक और शक्तिशाली राजा प्रियव्रत ने नारद जी के चरणों की सन्निधि से प्राप्त राज्यादि प्रपञ्च के संसर्ग से अपने को अशान्त सा मानते हुये मन से दुःखी होकर एक बार यह कहा ॥

सप्तत्रिंशः श्लोकः

अहो असाध्वनुष्ठितं यदभिनिवेशितोऽहमिन्द्रियैरविद्यारचितविषम-विषयान्धकूपे तदलमलममुष्या वनिताया विनोदमृगं मां धिग्धिगिति गर्हयाञ्चकार ॥३७॥

पदच्छेद—अहो असाधु अनुष्ठितम् यद् अभिनिवेशितः अहम् इन्द्रियैः अविद्या रचित विषम विषय अन्धकूपे तद् अलम्-अलम् अमुष्याः वनितायाः विनोदमृगम् मां धिक्-धिक् इति गर्हयाञ्चकार ॥

शब्दार्थ—

अहो	१.	अहो मैंने	अलम्-अलम्	१०.	उचित नहीं है
असाधु	२.	बड़ा अपराध	अमुष्याः	११.	(मैं) उस
अनुष्ठितम् यद्	३.	किया है क्योंकि	वनितायाः	१२.	अविद्या कामिनी के
अभिनिवेशितः	८.	फंसा रखा है	विनोद	१३.	मनोरञ्जन का
अहम्	७.	मुझे	मृगम्	१४.	खिलौना बना हुआ हूँ
इन्द्रियैः अविद्या	४.	इन्द्रियों ने अज्ञान से	मां धिक्-धिक्	१५.	मुझे धिक्कार है
रचित विषम	५.	निर्मित दुस्तर	इति	१६.	इस प्रकार (राजा प्रियव्रत)
विषय अन्धकूपे	६.	विषयों के अन्धे कुयें में	गर्हयाञ्-	१७.	अपनी निन्दा
तद्	९.	तो फंसे रहना	चकार ॥	१८.	करने लगे

श्लोकार्थ—अहो मैंने बड़ा अपराध किया है। क्योंकि इन्द्रियों ने अज्ञान से निर्मित दुस्तर विषयों के अन्धे कुयें में मुझे फंसा रखा है। तो फँसे रहना उचित नहीं है। मैं उस अविद्या कामिनी के मनोरञ्जन का खिलौना बना हुआ हूँ। मुझे धिक्कार है, धिक्कार है इस प्रकार राजा प्रियव्रत अपनी निन्दा करने लगे ॥

अष्टत्रिंशः श्लोकः

परदेवताप्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यः पुत्रेभ्य इमां यथादायं विभज्य भुक्तभोगां च महिषीं मृतकमिव सहमहाविभूतिमपहाय स्वयं निहितनिर्वेदो हृदि गृहीतहरिविहारानुभावो भगवतो नारदस्य पदवीं पुनरेवानुससार ॥३८॥

पदच्छेद—परदेवता प्रसाद अधिगत आत्म प्रत्यवमर्शेन अनुप्रवृत्तेभ्यः पुत्रेभ्यः इमाम् यथादायम् विभज्य भुक्त भोगान् च महिषीम् मृतकम् इव सह महाविभूतीम् अपहाय स्वयम् निहित निर्वेदः हृदि गृहीत हरि विहार अनुभावः भगवतः नारदस्य पदवीम् पुनरेव अनुससार ॥

शब्दार्थ—

परदेवता	१.	भगवान् श्री हरि की	सह	१८.	साथ
प्रसाद	२.	कृपा से	महाविभूतिम्	१२.	सारी राज्य सम्पत्ति के
अधिगत	५.	प्राप्त हो जाने के कारण प्रियव्रत	अपहाय	१९.	छोड़ दिया (तथा)
आत्म	३.	आत्मा का	स्वयम्	२०.	अपने आप
प्रत्यवमर्शेन	४.	ज्ञान	निहित	२२.	धारण करके
अनुप्रवृत्तेभ्यः	६.	अपने आज्ञाकारी	निर्वेदः	२१.	वैराग्य को
पुत्रेभ्यः	७.	पुत्रों में	हृदि	२३.	हृदय में
इमाम्	९.	इस पृथ्वी को	गृहीत	२८.	चिन्तन करते हुये
यथादायम्	८.	यथा योग्य	हरि	२५.	श्री हरि की
विभज्य	१०.	बाँट दिया	विहार	२६.	लीलाओं (और)
भुक्त	१२.	भोगों को	अनुभावः	२७.	कर्मों का
भोगान्	१३.	भोग कर	भगवतः	२४.	भगवान्
च	११.	और	नारदस्य	२९.	देवर्षि नारद के कहे
महिषीम्	१४.	रानी बर्हिष्मती को	पदवीम्	३०.	मार्ग का
मृतकम्	१५.	मृतक के	पुनरेव	३१.	फिर से
इव	१६.	समान	अनुससार ॥	३२.	अनुसरण किया

श्लोकार्थ—भगवान् श्री हरि की कृपा से आत्मा का ज्ञान प्राप्त हो जाने के कारण राजा प्रियव्रत अपने आज्ञाकारी पुत्रों में यथा योग्य इस पृथ्वी को बाँट दिया और भोगों को भोगकर रानी बर्हिष्मती को मृतक के समान सारी राज्य सम्पत्ति के साथ छोड़ दिया अपने आप वैराग्य को धारण करके हृदय में भगवान् श्री हरि की लीलाओं का और कर्मों का चिन्तन करते हुये देवर्षि नारद के कहे मार्ग का फिर से अनुसरण किया ॥

एकोनचत्वारिंशः श्लोकः

तस्य ह वा एते श्लोकाः—

प्रियव्रतकृतं कर्म को नु कुर्याद्विनेश्वरम् ।
यो नेमिनिम्नैरकरोच्छायां घ्नन् सप्त वारिधीन् ॥३९॥

पदच्छेद— तस्य ह वा एते श्लोकाः, प्रियव्रत कृतम् कर्म कः नु कुर्यात् विना ईश्वरम् ।
यः नेमि निम्नैः अकरोत् छायाम् घ्नन् सप्त वारिधीन् ॥

शब्दार्थ—

तस्य	१. उनके विषय में	विना	८. सिवाय
ह वा	४. प्रसिद्ध है कि	ईश्वरम्	९. भगवान् के
एते	२. ये	यः	१२. जिन्होंने
श्लोकाः	३. श्लोक	नेमि	१५. रथ के पहिये की
प्रियव्रत	५. राजा प्रियव्रत के द्वारा	निम्नैः	१६. लकीरों से
कृतम्	६. किये गये	अकरोत्	१८. बना दिया
कर्म	७. कार्य को	छायाम्	१३. रात्रि के अन्धकार को
कः नु	१०. भला कौन पुरुष	घ्नन्	१५. मिटाने की इच्छा से
कुर्यात्	११. कर सकता है	सप्तवारिधीन् ॥	१७. सात समुद्र

श्लोकार्थ—उनके विषय में ये श्लोक प्रसिद्ध है कि राजा प्रियव्रत के द्वारा किये गये कार्य को सिवाय भगवान् के भला कौन पुरुष कर सकता है । जिन्होंने रात्रि के अन्धकार को मिटाने के लिये रथ के पहिये की लकीरों से सात समुद्र बना दिये ॥

चत्वारिंशः श्लोकः

भूसंस्थानं कृतं येन सरिद्गिरिवनादिभिः ।
सीमा च भूतनिर्वृत्यै द्वीपे द्वीपे विभागशः ॥४०॥

पदच्छेद— भूसंस्थानं कृतं येन सरिद्गिरि वनआदिभिः ।
सीमा च भूत निर्वृत्यै द्वीपे द्वीपे विभागशः ॥

शब्दार्थ—

भू संस्थानम्	२. पृथ्वी की रचना	सीमा	१४. सीमा बना दी
कृतम्	३. की	च	४. और
येन	१. जिन्होंने	भूत	५. प्राणियों के
सरित्	१०. नदियों	निर्वृत्यै	६. सुख के लिये
गिरि	११. पर्वतों	द्वीपे	७. प्रत्येक
वन	१२. वनों	द्वीपे	८. द्वीप में
आदिभिः	१३. इत्यादि के द्वारा	विभागशः ॥	९. अलग-अलग

श्लोकार्थ—जिन्होंने पृथ्वी की रचना की और प्राणियों के सुख के लिये प्रत्येक द्वीप में अलग-अलग नदियों, पर्वतों, वनों इत्यादि की सीमा बना दी ॥

एकचत्वारिंशः श्लोकः

भौमं दिव्यं मानुषं च महित्वं कर्मयोगजम्।
यश्चक्रे निरयौपम्यं पुरुषानुजनप्रियः ॥४१॥

पदच्छेद—

भौमम् दिव्यम् मानुषम् च महित्वम् कर्म योगजम्।
यः चक्रे निरय औपम्यम् पुरुष अनुजन प्रियः ॥

शब्दार्थ—

भौमम्	४.	पाताल लोक के	यः	१.	जिन्होंने
दिव्यम्	५.	स्वर्ग लोक के	चक्रे	११.	समझा (क्योंकि वे)
मानुषम्	७.	मर्त्य लोक के	निरय	९.	नरक के
च	६.	और	औपम्यम्	१०.	समान
महित्वम्	८.	वैभव को	पुरुष	१२.	भगवान् श्री हरि के
कर्म	२.	कर्म (और)	अनुजन	१३.	भक्तों के
योगजम्।	३.	योग से होने वाले	प्रियः ॥	१४.	प्रेमी थे।

श्लोकार्थ—जिन्होंने कर्म और योग से होने वाले पाताल लोक के, स्वर्ग के और मर्त्य लोक के वैभव को नरक के समान समझा, क्योंकि वे भगवान् श्री हरि के भक्तों के प्रेमी थे ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पंचमे स्कन्धे प्रथमः अध्यायः ॥१॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

पंचमः स्कन्धः

द्वितीयः अध्यायः

प्रथमः श्लोकः

श्रीशुकउवाच—एवं पितरि सम्प्रवृत्ते तदनुशासने वर्तमान आग्नीध्रो जम्बू द्वीपौकसः प्रजा औरसवद्धर्मावेक्षमाणः पर्यगोपायत् ॥१॥

पदच्छेद— एवम् पितरि सम्प्रवृत्ते तद् अनुशासने वर्तमानः आग्नीध्रः जम्बूद्वीप ओकसः प्रजाः औरसवत् धर्मं अवेक्षमाणः पर्यगोपायत् ॥

शब्दार्थ—

एवम् पितरि	१ २.	इस प्रकार पिता प्रियव्रत के	द्वीप ओकसः	९. १०.	द्वीप में
सम्प्रवृत्ते	३.	भक्ति में प्रवृत्त हो जाने पर	प्रजाः	११.	रहने वाली
तद्	४.	उनकी	औरसवत्	१२.	पुत्र के समान
अनुशासने	५.	आज्ञा का	धर्मं	१३.	धर्म पूर्वक
वर्तमानः	६.	पालन करते हुये	अवेक्षमाणः	१४.	पालन करते हुये
आग्नीध्रः जम्बू	७. ८.	राजा आग्नीध्र जम्बू	पर्यगोपायत् ॥	१५.	उसकी रक्षा करने लगे

श्लोकार्थ—इस प्रकार अपने पिता प्रियव्रत के भक्ति में प्रवृत्त हो जाने पर उनकी आज्ञा का पालन करते हुये राजा आग्नीध्र जम्बू द्वीप में रहने वाली प्रजाओं का पुत्र के समान धर्म पूर्वक पालन करते हुये उसकी रक्षा करने लगे ॥

द्वितीयः श्लोक

स च कदाचित्पितृलोककामः सुरवरवनिताक्रीडाचलद्रोण्यां भगवन्तं विश्वसृजां पतिमाभृतपरिचर्योपकरण आत्मैकाग्र्येण तपस्व्याराधयाम्बभूव ॥२॥

पदच्छेद—स च कदाचित् पितृ लोक कामः सुरवर वनिता क्रीडा अचल द्रोण्याम् भगवन्तम् विश्वसृजाम् पतिम् आभृत परिचर्या उपकरण आत्म ऐकाग्र्येण तपस्वी आराधयाम् बभूव ॥

शब्दार्थ—

स	४.	वे महाराज आग्नीध्र	पतिम्	१५.	स्वामी
च कदाचित्	१.२.	तदन्तर एक बार	आभृत	१०.	इकट्ठा करके
पितृलोक कामः	३.	पुत्र प्राप्ति की कामना से	परिचर्या उपकरण	८.९.	पूजा की सामग्री को
सुरवर वनिता	५.	देवताओं की पत्नियों के	आत्म	१२.	चित्त से
क्रीडा	६.	क्रीडा स्थल	एकाग्र्येण	११.	एकाग्र
अचल द्रोण्याम्	७.	मंदराचल की घाटी में	तपस्वी	१३.	तपस्या की भावना लेकर
भगवन्तम्	१६	भगवान् ब्रह्मा जी की	आराधयाम्	१७.	आराधना
विश्वसृजाम्	१४.	प्रजापतियों के	बभूव ॥	१८.	करने लगे

श्लोकार्थ—तदनन्तर एक बार पुत्र प्राप्ति की कामना से वे महाराज आग्नीध्र देवताओं की पत्नियों के क्रीडा स्थल मंदराचल की घाटी में पूजा की सामग्री को इकट्ठा करके एकाग्र चित्त से तपस्या की भावना लेकर प्रजापतियों के स्वामी भगवान् ब्रह्मा जी की आराधना करने लगे ॥

तृतीयः श्लोकः

तदुपलभ्य भगवानादिपुरुषः सदसि गायन्तीं पूर्वचित्तिं नामाप्सरसमभियापयामास ॥३॥

पदच्छेद— तद् उपलभ्य भगवान् आदिपुरुषः सदसि गायन्तीम् । पूर्व चित्तिम् नाम अप्सरसम् अभियापयामास ॥

शब्दार्थ—

तद्	१.	यह	गायन्तीम्	६.	गाने वाली
उपलभ्य	२.	जान कर	पूर्वचित्तिम्	७.	पूर्वचित्ति
भगवान्	४.	भगवान् ब्रह्मा जी ने	नाम	८.	नाम की
आदि पुरुषः	३.	आदि पुरुष	अप्सरसम्	९.	अप्सरा को
सदसि	५.	अपनी सभा में	अभियापयामास ॥	१०.	भोग के लिये भेजा

श्लोकार्थ—यह जानकर आदि पुरुष भगवान् ब्रह्मा जी ने अपनी सभा में गाने वाली पूर्वचित्ति नाम की अप्सरा को भोग के लिये भेजा ॥

चतुर्थः श्लोकः

सा च तदाश्रमोपवनमतिरमणीयं विविधनिबिडविटपिविटपनिकरसंश्लिष्टपुरटलतारूढस्थलविहङ्गमभिथुनैः प्रोच्यमानश्रुतिभिः प्रतिबोध्यमानसलिलकुक्कुटकारण्डवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमलाकरमुप बभ्राम ॥४॥

पदच्छेद—स च तद् आश्रम उपवनम् अतिरमणीयम् विविधनिविडविटपि विटप निकर संश्लिष्ट पुरट लता आरूढ स्थल विहंगम मिथुनैः प्रोच्यमान श्रुतिभिः प्रतिबोध्यमान सलिल कुक्कुट कारण्डव कलहंस आदिभिः विचित्रम् उपकूजित अमल जलाशय कमलाकरम् उप बभ्राम ॥

शब्दार्थ—

स च	१.	वह अप्सरा	स्थलविहंगममिथुनैः	१०.	मयूरादि पक्षियों का जोड़ा
तद्	२.	आग्नीध्र जी के	प्रोच्यमान श्रुतिभिः	१२.	उनकी सुरीली आवाज से
आश्रम	३.	आश्रम के समीप	प्रतिबोध्यमान	१६.	जग कर
उपवनम्	५.	बगीचे में	सलिल कुक्कुट	१३.	जल मुर्गे
अतिरमणीयम्	४.	अत्यन्त मनोहर	कारण्डव कलहंस	१४.	सारस और हंस
विविध निविड	७.	अनेकों सघन	आदिभिः	१५.	इत्यादि जल पक्षी
विटपिविटपनिकर	८.	वृक्षों की शाखा समूह पर	विचित्रम्	१७	अनेकों आवाज कर रहे थे
संश्लिष्ट	९.	फैली हुई थी (तथा)	उपकूजित	२०.	गूंज रहा था
पुरट लता	८.	स्वर्ण लतायें	अमलजलाशय	१९.	निर्मल सरोवर
आरूढ	११.	बैठा हुआ था	कमला करम्	१८	जिससे कमलों के समूह से भरा
			उपबभ्राम ॥	६.	विचर रही थी (उस बगीचे में)

श्लोकार्थ—वह अप्सरा आग्नीध्र जी के आश्रम के समीप अत्यन्त मनोहर बगीचे में विचर रही थी। उस बगीचे में अनेकों सघन वृक्षों की शाखा समूह पर स्वर्ण लतायें फैली हुई थीं। तथा मयूरादि पक्षियों का जोड़ा बैठा हुआ था। उनकी सुरीली आवाज से जलमुर्गे, सारस और हंस इत्यादि जल पक्षी जग कर अनेकों आवाज कर रहे थे। जिससे कमलों के समूह से भरा निर्मल सरोवर गूंज रहा था ॥

पञ्चमः श्लोकः

तस्याः सुललितगमनपदविन्यासगतिविलासायाश्चानुपदं खणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्य नरदेवकुमारः समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्य व्यचष्ट ॥५॥

पदच्छेद—तस्याः सुललित गमन पदविन्यास गतिविलासायाः च अनुपदम् खण खणायमान रुचिर चरणाभरणस्वनम् उपाकर्ण्य नरदेव कुमारः समाधि योगेन आमीलित नयन नलिन मुकुल युगलम् ईषद् विकचय्य व्यचष्ट ॥

शब्दार्थ—

तस्याः	१.	वह सुन्दरी	उपाकर्ण्य	१४.	सुनकर
सुललित	२.	मनोहर	नरदेव	१५.	राजकुमार
गमन	३.	चाल में	कुमारः	१६.	आग्नीध्र ने
पदविन्यास	४.	पैरों को रखकर	समाधि	१७.	समाधि
गति	६.	चल रही थी	योगेन	१८.	योग से
विलासायाः	५.	विलास पूर्वक	आमीलित	१९.	बन्द किये हुये
च	७.	तथा	नयन	२३.	नेत्रों को
अनुपदम्	८.	पग-पग पर उसके	नलिन	२०.	कमल की
खणखणायमान	१२.	झंकार कर रहे थे	मुकुल	२१.	कली के समान
रुचिर	१०.	मनोहर	युगलम्	२२.	दोनों
चरण	९.	पैरों के	ईषद्	२४.	थोड़ा
आभरण	११.	पायजेब	विकचय्य	२५.	खोलकर
स्वनम्	१३.	उस ध्वनि को	व्यचष्ट ॥	२६.	देखा

श्लोकार्थ—वह सुन्दरी मनोहर चाल में पैरों को रखकर विलास पूर्वक चल रही थी। तथा पग-पग पर उसके पैरों के मनोहर पायजेब झंकार कर रहे थे। उस ध्वनि को सुनकर राजकुमार आग्नीध्र ने समाधि योग से बन्द किये हुये कमल की कली के समान दोनों नेत्रों को थोड़ा खोलकर उसे देखा।

षष्ठः श्लोकः

तामेवाविदूरे मधुकरीमिव सुमनस उपजिघ्रन्तीं दिविजमनुजमनोनयनाह्लाददुघैर्गतिविहारव्रीडाविनयावलोकसुस्वराक्षरावयवैर्मनसि नृणां कुसुमायुधस्य विदधतीं विवरं निजमुखविगलितामृतासवसहासभाषणामोदमदान्धमधुकरनिकरोपरोधेन द्रुतपदविन्यासेन वल्गुस्पन्दनस्तनकलशकबरभाररशनां देवीं तदवलोकनेन विवृतावसरस्य भगवतो मकरध्वजस्य वशमुपनीतो जडवदिति होवाच ॥६॥

पदच्छेद—ताम् एव अविदूरे मधुकरीम् इव सुमनसः उपजिघ्रन्तीम् दिविज मनुज मनो नयन आह्लाद दुघैः गति विहार व्रीडा विनय अवलोक सुस्वर अक्षर अवयवैः मनसि नृणाम् कुसुम आयुधस्य विदधतीम् विवरम् निजमुख विगलित अमृत आसव सहास भाषण आमोद मदान्ध मधुकरनिकर उपरोधेन द्रुत पद विन्यासेन वल्गुस्पन्दन स्तन कलशकबर भार रशनाम् देवीम् तद् अवलोकनेन विवृत अवसरस्य भगवतः मकरध्वजस्य वशम् उपनीतो जडवत् इति ह उवाच ॥

शब्दार्थ—

ताम् एव	१. वही अप्सरा	अमृत आसव	२१ अमृत रस रूपी
अविदूरे	२. समीप में	सहासभाषण	२२. मुसकान भरे वचनों की
मधुकरीम् इव	३. भौंरों के समान	आमोदमदान्ध	२३. सुगन्ध से मतवाले
सुमनसः	४. पुष्पों को	मधुकर निकर	२४. भौंरों के झुण्ड ने (उसे)
उपजिघ्रन्तीम्	५. सूंघ रही थी	उपरोधेन	२५ घेर लिया था (अतः)
दिविज मनुज	६. देवता और मनुष्यों के	द्रुतपद विन्यासेन	२६. जल्दी जल्दी पैर बढ़ाने से उसके
मनोनयन	७. मन और नेत्रों के	वल्गु स्पन्दन	३०. मनोहर रूप से हिल रहे थे
आह्लाद दुघैः	८. आनन्द देने वाली	स्तन कलश	२७. स्तन कलश
गति	१०. चाल	कबर भार	२८. जूड़े का घेरा
विहार	९. बांकी	रशनाम्	२९. करधनी
व्रीडा विनय	११. लज्जा नम्रता	देवीम्	३२. उस देवी को
अवलोक सुस्वर	१२. चितवन सुन्दर आवाज	तद्	३१. उस समय
अक्षर अवयवैः	१३. मधुरवाणी तथा अङ्गों से	अवलोकनेन	३३. देखने से
मनसि	१५. मन में	विवृत	३७. मिल गया था (अतः उनके)
नृणाम्	१४. मनुष्यों के	अवसरस्य	३६. प्रवेश का समय
कुसुम आयुधस्य	१६. कामदेव के लिये	भगवतः	३४. भगवान्
विदधतीम्	१८. बना रही थी	मकरध्वजस्य	३५. कामदेव को
विवरम्	१७. द्वार	वशम् उपनीतो	३८ वश में हुये राजा आग्नीध्र
निजमुख	१९. उसके मुख से	जडवत् इति	३९ पागल की भांति इस प्रकार
विगलित	२०. निकलते हुये	ह उवाच ॥	४०. कहने लगे

श्लोकार्थ—वही अप्सरा समीप में भौंरों के समान पुष्पों को सूंघ रही थी। देवता और मनुष्यों के मन और नेत्रों को आनन्द देने वाली बांकी चाल, लज्जा, नम्रता, चितवन, सुन्दर आवाज, मधुर वाणी तथा अपने अङ्गों से मनुष्यों के मन में कामदेव के लिये द्वार बना रही थी। उसके मुख से निकलते हुये अमृत रस रूपी मुसकान भरे वचनों की सुगन्ध से मतवाले भौंरों के झुण्ड ने उसे घेर लिया था। अतः जल्दी-जल्दी पैर बढ़ाने से उसके स्तन-कलश, जूड़े का घेरा, करधनी मनोहर रूप से हिल रहे थे। उस समय उस देवी को देखने से भगवान् कामदेव को प्रवेश का समय मिल गया, अतः उनके वश में हुये राजा आग्नीध्र पागल की भांति इस प्रकार कहने लगे ॥

सप्तमः श्लोकः

का त्वं चिकीर्षसि च किं मुनिवर्य शैले मायासि कापि भगवत्परदेवतायाः।
विज्ये बिभर्षि धनुषी सुहृदात्मनोऽर्थे किं वा मृगान्मृगयसे विपिने प्रमत्तान्॥७॥

पदच्छेद—का त्वम् चिकीर्षसि च किम् मुनिवर्य शैले माया असि कापि भगवत् परदेवतायाः।
विज्ये बिभर्षि धनुषी सुहृद् आत्मनः अर्थे किम् वा मृगान् मृगयसे विपिने प्रमत्तान्॥

शब्दार्थ—

का	३.	कौन हो	परदेवतायाः	८.	परात्पर
त्वम्	२.	तुम	विज्ये	१३.	डोरी से रहित
चिकीर्षसि	७.	चाहते हो (अथवा)	बिभर्षि	१५.	धारण किये हो
च	४.	और	धनुषी	१४.	दो धनुष
किम्	६.	क्या करना	सुहृद्	१२.	हे मित्र तुम
मुनिवर्य	१.	हे मुनिवर	आत्मनः अर्थे	१७.	अपने लिये
शैले	५.	इस पर्वत में	किम्	१६.	क्या तुम
माया असि	११.	माया हो	वा मृगान्	१६.	मुझ जैसे मृगों को
कापि	१०.	कोई	मृगयसे	२०.	ढूंढ रही हो
भगवत्	६.	भगवान् की	विपिने प्रमत्तान्॥	१८.	जंगल में असावधान

श्लोकार्थ—हे मुनिवर! तुम कौन हो और इस पर्वत में क्या करना चाहते हो। अथवा परात्पर भगवान् की कोई माया हो। हे मित्र! तुम डोरी से रहित दो धनुष धारण किये हो। क्या तुम अपने लिये जंगल में असावधान मुझ जैसे मृगों को ढूंढ रहे हो॥

अष्टमः श्लोकः

बाणाविमौ भगवतः शतपत्रपत्रौ शान्तावपुङ्खरुचिरावतितिग्मदन्तौ।
कस्मै युयुङ्क्षसि वने विचरन्न विद्मः क्षेमाय नो जडधियां तव विक्रमोऽस्तु॥८

पदच्छेद—बाणौ इमौ भगवतः शतपत्रपत्रौ शान्तौ अपुङ्खौ रुचिरौ अति तिग्म दन्तौ।
कस्मै युयुङ्क्षसि वने विचरन् न विद्मः क्षेमाय नः जडधियाम् तव विक्रमः अस्तु॥

शब्दार्थ—

बाणौ	३.	नयन बाण	कस्मै	१२.	किस पर
इमौ	०.	ये दोनों	युयुङ्क्षसि	११.	प्रहार करना चाहते हो
भगवतः	१.	आप के	वने विचरन्	१०.	वन में घूमते हुये
शतपत्रपत्रौ	४.	कमल पत्र के समान पंख वाले हो कर भी	न विद्मः	१३.	हम नहीं जानते हैं
शान्तौ	५.	शान्त	क्षेमाय	१७.	कल्याणकारी
अपुङ्खौ	६.	पंख हीन हैं	नः	१५.	हमारे लिये
रुचिरौ	७.	सुन्दर	जडधियाम्	१४.	मन्द बुद्धि
अतितिग्म	६.	बहुत तीखे हैं	तव विक्रमः	१६.	तुम्हारा पराक्रम
दन्तौ।	८.	अग्र भाग में	अस्तु॥	१८.	हो

श्लोकार्थ—आपके ये दोनों नयन बाण कमल पत्र के समान पंख वाले होकर भी शान्त पंख हीन हैं, सुन्दर और अग्रभाग में बहुत तीखे हैं। वन में घूमते हुये किस पर प्रहार करना चाहते हो? हम नहीं जानते हैं, मन्दबुद्धि हमारे लिये तुम्हारा पराक्रम कल्याणकारी हो॥

नवमः श्लोकः

शिष्या इमे भगवतः परितः पठन्ति गायन्ति साम सरहस्यमजस्रमीशम् ।
युष्मच्छिखाविलुलिताः सुमनोऽभिवृष्टीः सर्वे भजन्त्यृषिगणा इव वेदशाखाः॥९॥

पदच्छेद—शिष्याः इमे भगवतः परितः पठन्ति गायन्ति साम सरहस्यम् अजस्रम् ईशम् ।
युष्मत् शिखा विलुलिताः सुमनः अभिवृष्टीः सर्वे भजन्ति ऋषिगणाः इव वेद शाखाः ॥

शब्दार्थ—

शिष्याः	३.	शिष्यों के समान	युष्मत् शिखा	११.	आपकी चोटी से
इमे	४.	ये भौंरें	विलुलिताः	१२.	झरते हुये
भगवतः	१.	आपके	सुमनः	१३.	पुष्पों की
परितः	२.	चारों ओर	अभिवृष्टीः	१४.	वर्षा का ऐसे
पठन्ति	७.	पाठ कर रहे हैं मानों	सर्वे	१०.	ये सभी
गायन्ति	९.	गानकर रहे हैं	भजन्ति	१५.	सेवन कर रहे हैं
साम	६.	साम वेद का	ऋषिगणाः	१७.	मुनिजन
सरहस्यम्	५.	रहस्यों के साथ	इव	१६.	मानों
अजस्रम् ईशम् ।	८.	निरन्तर भगवान् का	वेदशाखाः ॥	१८.	वेद की शाखाओं का पाठ करते हैं

श्लोकार्थ—आपके चारों ओर शिष्यों के समान ये भौंरें रहस्यों के साथ सामवेद का पाठ कर रहे हैं। मानों निरन्तर भगवान् का गान कर रहे हैं। ये सभी आपकी चोटी से झरते हुये पुष्पों की वर्षा का सेवन कर रहे हैं। मानों मुनिजन वेद की शाखाओं का पाठ करते हैं ॥

दशमः श्लोकः

वाचं परं चरणपञ्जरतित्तिरीणां ब्रह्मन्नरूपमुखरां शृणवाम तुभ्यम् ।
लब्धा कदम्बरुचिरङ्कविटङ्कबिम्बे यस्यामलातपरिधिः क्व च वल्कलं ते ॥१०॥

पदच्छेद—वाचम् परम् चरण पञ्जर तित्तिरीणाम् ब्रह्मन् अरूप मुखराम् शृणवाम तुभ्यम् ।
लब्धा कदम्ब रुचिर अङ्क विटङ्क बिम्बे यस्याम् अलात परिधिः क्व च वल्कलं ते ॥

शब्दार्थ—

वाचम्	६.	ध्वनि	लब्धा	१३.	मिली है
परम्	५.	केवल	कदम्ब रुचिर	१२.	कहाँ से कदम्ब पुष्पों की कान्ति
चरण पञ्जर	३.	चरण रूपी पिंजरे में बन्द	अङ्क विटङ्क	१०.	नितम्ब
तित्तिरीणाम्	४.	पायजेब के रत्नों की	बिम्बे	११.	मण्डल पर
ब्रह्मन्	१.	हे ब्रह्मन्	यस्याम्	१४.	जिसके (चारो ओर)
अरूप	८.	किसी वक्ता के बिना ही	अलातपरिधिः	१५.	लाल घेरा है
मुखराम्	१०.	अत्यन्त स्पष्ट हैं (तुम्हारे)	क्व	१९.	कहाँ है
शृणवाम	७.	सुन रहे हैं जो	च	१६.	अरे
तुभ्यम्	२.	तुम्हारे	वल्कलम्	१८.	वल्कल वस्त्र
			ते ॥	१७.	तुम्हारा

श्लोकार्थ—हे ब्रह्मन्! तुम्हारे चरण रूपी पिंजरे में बन्द पायजेब के रत्नों की केवल ध्वनि सुन रहे हैं, जो किसी वक्ता के बिना ही अत्यन्त स्पष्ट है। तुम्हारे नितम्ब मण्डल पर कहाँ से कदम्ब-पुष्पों की कान्ति मिली है, जिसके चारों ओर लाल घेरा है। अरे तुम्हारा वल्कल वस्त्र कहाँ है ?॥

एकादशः श्लोकः

किं सम्भृतं रुचिरयोर्द्विज श्रृङ्गयोस्ते मध्ये कृशो वहसि यत्र दृशिः श्रिता मे ।
पङ्कोऽरुणः सुरभिरात्मविषाण ईदृग् येनाश्रमं सुभग मे सुरभीकरोषि ॥११॥

पदच्छेद—किम् सम्भृतम् रुचिरयोः द्विज श्रृङ्गयोः ते मध्ये कृशः वहसि यत्र दृशिः श्रिता मे ।
पङ्कः अरुणः सुरभिः आत्म विषाणे ईदृग् येन आश्रमम् सुभग मे सुरभी करोषि ॥

शब्दार्थ—

किम् सम्भृतम्	५.	क्या भर रक्खा है (जिससे)	पङ्क	१४.	लेप लगाये हो
रुचिरयोः	३.	सुन्दर	अरुण	१३.	लाल
द्विजः	१.	हे द्विजवर	सुरभिः	१२.	सुगन्धित
शृङ्गयोः	४.	दोनों सींगों में	आत्मविषाणे	१०.	अपने इन दोनों सींगों में
ते	२.	तुमने	ईदृग्	११.	ऐसा
मध्ये कृशः	६.	मध्यभाग दुर्बल होने पर भी इन्हें	येन	१५.	जिससे
वहसि यत्र	७.	ढो रही हो, जहाँ पर	आश्रमम्	१७	आश्रम को
दृशिः श्रिता	९.	दृष्टि लगी हुई है	सुभग, मे	१६.	हे सुभग ! मेरे
मे ।	८.	मेरी	सुरभी करोषि ॥	१८.	सुगन्धित कर रही हो

श्लोकार्थ—हे द्विजवर ! तुमने सुन्दर दोनों सींगों में क्या भर रक्खा है । जिससे मध्य भाग दुर्बल होने पर भी उन्हें ढो रहे हो । जहाँ पर मेरी दृष्टि लगी हुई है । अपने इन दोनों सींगों में ऐसा सुगन्धित लाल लेप लगाये हो । जिससे हे सुभग ! मेरे आश्रम को सुगन्धित कर रहे हो ॥

द्वादशः श्लोकः

लोकं प्रदर्शय सुहृत्तम तावकं मे यत्रत्य इत्थमुरसावयवावपूर्वौ ।
अस्मद्विधस्य मनउन्नयनो बिभर्ति बह्वद्भुतं सरसरासुसुधादि वक्त्रे ॥१२॥

पदच्छेद—लोकम् प्रदर्शय सुहृत्तम तावकम् मे यत्रत्यः इत्थम् उरसा अवयवौ अपूर्वौ ।
अस्मद् विधस्य मनः उन्नयनः बिभर्ति बहु अद्भुतम् सरस रास सुधादि वक्त्रे ॥

शब्दार्थ—

लोकम् प्रदर्शय	४.	स्थान दिखाओ	अस्मद्	१०.	जिससे हमारे जैसे
सुहृत्तम	१.	हे मित्रवर	विधस्य	११.	लोगों के
तावकम्	३.	अपना	मनः	१२.	मन में
मे	२.	मुझे	उन्नयनः	१३.	क्षोभ उत्पन्न होता है
यत्रत्यः	५.	जहाँ के लोग	बिभर्ति	१९.	धारण किये हो
इत्थम्	६.	इस प्रकार अपने	बहु अद्भुत	१५.	अत्यन्त अलौकिक
उरसा	७.	हृदय में	सरस	१७.	मधुरालाप रूपी
अवयवौ	९.	अङ्गों को (धारण करते हैं)	रास	१६.	विलास के साथ
अपूर्वौ ।	८.	अलौकिक	सुधादि	१८	अमृत इत्यादि
			वक्त्रे ।।	१४.	अपने मुख में

श्लोकार्थ—हे मित्रवर ! मुझे अपना स्थान दिखाओ जहाँ के लोग इस प्रकार अपने हृदय में अलौकिक अङ्गों को धारण करते हैं । जिससे हमारे जैसे लोगों के मन में क्षोभ उत्पन्न होता है । अपने मुख में अत्यन्त अलौकि विकास के साथ मधुरालाप रूपी अमृत इत्यादि धारण किये हों ॥

त्रयोदशः श्लोकः

का वाऽऽत्मवृत्तिरदनाद्धविरङ्ग वाति विष्णोः कलास्यनिमिषोन्मकरौ च कर्णौ ।
उद्विग्नमीनयुगलं द्विजपङ्क्तिशोचिरासन्नभृङ्गनिकरं सर इन्मुखं ते ॥१३॥

पदच्छेद—का वा आत्मवृत्तिः अदनात् हविः अङ्ग वाति विष्णोः कला असि अनिमिष उन्मकरौ च कर्णौ ।
उद्विग्न मीन युगलम् द्विज पङ्क्ति शोचिः आसन्न भृङ्ग निकरम् सर इन् मुखं ते ॥

शब्दार्थ—

का	४.	क्या है	उद्विग्न	१५.	जिसमें चञ्चल
वा	६.	अथवा तुम	मीन	१७.	दो मछलियाँ हैं
आत्म वृत्तिः	२.३.	तुम्हारा आहार	युगलम्	१६.	दोनों नेत्र
अदनाद्धविः	४.	जिसके खाने से होम जैसी	द्विजपङ्क्ति	१८.	दाँतों की पङ्क्तियों की
अङ्ग	१.	हे मित्रवर	शोचिः	१९.	कान्ति हंस के समान हैं (तथा)
वाति	५.	सुगन्ध बह रही है	आसन्न	२०.	सिर पर स्थित केशपाश
विष्णोः	७.	भगवान् विष्णु की	भृङ्ग	२१.	भौंरों के
कला असि	८.	कला हो	निकरम्	२२.	झुंड के समान हैं
अनिमिष	१०.	अपलक नेत्र रूपी	सर इन्	१४.	तालाव के समान है
उन्मकरौ	११.	मकराकृत कुण्डल हैं	मुख	१३.	मुख
च कर्णौ ।	९.	जिससे दोनों कानों में	ते ॥	१२.	तुम्हारा

श्लोकार्थ—हे मित्रवर ! तुम्हारा आहार क्या है । जिसके खाने से होम के समान सुगन्ध बह रही है । अथवा तुम भगवान् विष्णु की कला हो । जिससे दोनों कानों में अपलक नेत्र रूपी मकराकृत कुण्डल हैं । तुम्हारा मुख तालाव के समान है । जिसमें चञ्चल दोनों नेत्र दो मछलियाँ हैं । दाँतों की पङ्क्तियों की कान्ति हंस के समान है । तथा सिर पर केशपास भौंरों के झुंड के समान है ॥

चर्तुदशः श्लोकः

योऽसौ इमे त्वया करसरोजहतः पतङ्गो दिक्षु भ्रमन् भ्रमत एजयतेऽक्षिणी मे ।
मुक्तं न ते स्मरसि वक्रजटावरूथं कष्टोऽनिलो हरति लम्पट एष नीवीम् ॥१४॥

पदच्छेद—यः असौ त्वया कर सरोज हतः पतङ्गः दिक्षु भ्रमन् भ्रमतः एजयते अक्षिणी मे ।
मुक्तम् न ते स्मरसि वक्र जटा वरुथं कष्टः अनिलः हरति लम्पटः एषः नीवीम् ।

शब्दार्थ—

यः असौ	७.८.	जो यह	न	१९.	नहीं
त्वया कर	१२.	तुम्हारे हस्त	ते	१५.	अपने
सरोज हतः	३.४.	कमल की मार खा कर	स्मरसि	२०.	सम्हाल रही हो
पतङ्गः	९.	गेंद है (वह)	वक्र	१६.	कुटिल
दिक्षु भ्रमन्	५.६.	दिशाओं में घूमता हुआ	जटा वरुथम्	१७.१८.	केश पाश को
भ्रमतः	१०.	भ्रम में पड़े हुये	कष्टः	२१.	बड़ा दुःख है कि
एजयते	१३.	चञ्चल बना रहा है	अनिलः	२४.	वायु तुम्हारे
अक्षिणी	१२.	आँखों को	हरति	२६.	उड़ा रहा है
मे ।	११.	मेरी	लम्पटः एष	२३.२२.	धूर्त यह
मुक्तम्	१४.	तुम खुले हुये	नीवीम् ॥	२५.	अधोवस्त्र

श्लोकार्थ—तुम्हारे हस्त कमल की मार खाकर दिशाओं में घूमता हुआ जो यह गेंद है । वह भ्रम में पड़े हुये मेरी आँखों को चञ्चल बना रहा है । तुम खुले हुये अपने कुटिल केश पाश को नहीं सम्हाल रही हो । बड़ा दुःख है कि यह धूर्त वायु तुम्हारे अधोवस्त्र को उड़ा रहा है ॥

पञ्चदशः श्लोकः

रूपं तपोधन तपश्चरतां तपोघ्नं ह्येतत्तु केन तपसा भवतोपलब्धम् ।
चर्तुं तपोऽर्हसि मया सह मित्र मह्यं किं वा प्रसीदति स वै भवभावनो मे ।१५।

पदच्छेद—रूपम् तपोधन तपः चरताम् तपोघ्नम् हि एतत् तु केन तपसा भवता उपलब्धम् ।
चर्तुम् तपः अर्हसि मया सह मित्र मह्यम् किम् वा प्रसीदति सः वै भवभावनः मे ।।

शब्दार्थ—

रूपम्	२	तुम्हारा स्वरूप तो
तपोधनम्	१.	हे तपस्वी
तपः चरताम्	३.	तपस्या करने वालों के
तपोघ्नम्	५.	तप में विघ्न डालने वाला है
हि	४.	अवश्य ही
तत्	८.	यह
तु	१०.	तथा
केन तपसा	७.	किस तपस्या से
भवता	६.	आपने
उपलब्धम् ।	९.	प्राप्त किया है
चर्तुम्	१४	कर
तपः अर्हसि	१३.१४.	तपस्या सकते हो
मया सह	१२.	मेरे साथ
मित्र	११.	हे मित्र तुम
मह्यम्	१९.	मुझे देने के लिये
किम्	१६.	क्या
वा	१५.	अथवा
प्रसीदति	२३.	प्रसन्न हुये हैं
सः	१७.	वे
वै	२०.	ही
भवभावनः	१८.	ब्रह्मा जी
मे ।।	२२.	मुझ पर

श्लोकार्थ—हे तपस्वी ! तुम्हारा स्वरूप तो अवश्य ही तपस्या करने वालों के तप में विघ्न डालने वाला है । आपने किस तपस्या से यह प्राप्त किया है । हे मित्र ! तुम मेरे साथ तपस्या कर सकते हो ! अथवा क्या वे ब्रह्मा जी मुझे देने के लिये ही मुझ पर प्रसन्न हुये हैं ।।

षोडशः श्लोकः

न त्वां त्यजामि दयितं द्विजदेवदत्तं यस्मिन्मनो दृगपि नो न वियाति लग्नम् ।
मां चारुशृङ्ग्यर्हसि नेतुमनुव्रतं ते चित्तं यतः प्रतिसरन्तु शिवाः सचिव्यः॥१६॥

पदच्छेद—न त्वाम् त्यजामि दयितम् द्विजदेव दत्तम् यस्मिन् मनः दृगपिनः न वियाति लग्नम् ।
माम् चारु शृङ्गि अर्हसि नेतुम् मनुव्रतम् ते चित्तम् यतः प्रतिसरन्तु शिवाः सचिव्यः।।

शब्दार्थ—

न	४.	नहीं
त्वाम्	२.	तुझ
त्यजामि	५.	छोड़ना चाहता हूँ
दयितम्	३.	प्रिय वस्तु को
द्विजदेवदत्तम्	१.	ब्रह्मा जी के द्वारा दी हुई
यस्मिन्	६.	जिस तुम्हारे में
मनः	८.	मन (और)
दृगपि नः	९.१०.	हमारी दृष्टि भी
न वियाति	११.	नहीं हट रही है
लग्नम् माम्	७.	लगा हुआ मेरा
चारुशृङ्गि	१२.	हे सुन्दर स्तनों वाली
अर्हसि	१६.	सकती हो
नेतुम्	१५.	ले जा
अनुव्रतम्	१४.	मुझ आज्ञाकारी
यतः ते चित्तम्	१३.	जहाँ तुम्हारा हृदय है (वहीं पर)
प्रतिसरन्तु	१९.	साथ चलें
शिवाः	१७.	ये मङ्गल मयी
सचिव्यः ।।	१८.	सखियाँ भी

श्लोकार्थ—ब्रह्मा जी के द्वारा दी हुई तुझ प्रिय वस्तु को नहीं छोड़ना चाहता हूँ । जिस तुम्हारे में लगा हुआ मेरा मन और हमारी दृष्टि भी नहीं हट रही है । हे सुन्दर स्तनों वाली ! जहाँ तुम्हारा हृदय है वहीं पर मुझ आज्ञाकारी को ले जा सकती हो । ये मङ्गलमयी सखियाँ भी साथ चलें ।।

सप्तदशः श्लोकः

श्रीशुक उवाच—इति ललनानुनयातिविशारदो ग्राम्यवैदग्ध्यया परिभाषया तां विबुधवधूं विबुधमतिरधिसभाजयामास ॥१७॥

पदच्छेद— इति ललना अनुनय अतिविशारदः ग्राम्य वैदग्ध्यया परिभाषया। ताम् विबुध वधूं विबुध मतिः अधि सभाजयामास ॥

शब्दार्थ—

इति	१.	इस प्रकार	परिभाषया	१०.	वाणी से
ललना	२.	उस सुन्दरी को	ताम्	११.	उस
अनुनय	३.	प्रसन्न करने में	विबुधवधूं	१२	अप्सरा को
अति	४.	अत्यन्त	विबुध	६.	देवताओं के समान चतुर
विशारदः	५.	चतुर (तथा)	मतिः	७.	बुद्धि वाले आग्नीध्र ने
ग्राम्य	८.	इस प्रकार	अधिसभाजयामास ॥	१३.	प्रसन्न कर लिया
वैदग्ध्यया	९.	चतुरता पूर्ण			

श्लोकार्थ—इस प्रकार उस सुन्दरी को प्रसन्न करने में चतुर तथा देवताओं के समान चतुर बुद्धि वाले आग्नीध्र ने इस प्रकार चातुरतापूर्ण वाणी से उस अप्सरा को प्रसन्न कर लिया ॥

अष्टादशः श्लोकः

सा च ततस्तस्य वीरयूथपतेर्बुद्धिशीलरूपवयःश्रियौदार्येण पराक्षिप्तमनास्तेन सहायुतायुतपरिवत्सरोपलक्षणं कालं जम्बूद्वीपपतिना भौमस्वर्गभोगान् बुभुजे ॥१८॥

पदच्छेद—सा च ततः तस्य वीर यूथपतेः बुद्धि शील रूप वयः श्रिया औदार्येण पराक्षिप्तमनाः तेन सह अयुत-अयुत परिवत्सरः उपलक्षणम् कालम् जम्बूद्वीपपतिना भौम स्वर्ग भोगान् बुभुजे ॥

शब्दार्थ—

सा	११.	उस अप्सरा ने	पराक्षिप्त	९.	खिच गया था
च	१०.	अतः	मनाः	२.	उस अप्सरा का मन
ततः	१.	तदनन्तर	तेन सह	१३.	उस राजा आग्नीध्र के साथ
तस्य	४.	उस राजा की	अयुत अयुत	१४.	कई हजार
वीरयूथपतेः	३.	वीरों के अधिपति	परिवत्सरः	१५.	वर्षों से
बुद्धि शील	५.	बुद्धि स्वभाव	उपलक्षणम्कालम्	१६.	युक्त समय तक
रूप वयः	६	सौन्दर्य अवस्था	जम्बूद्वीपपतिना	१२.	जम्बूद्वीप के स्वामी
श्रिया	७.	शोभा और	भौम	१७	पृथ्वी लोक के और
औदार्येण।	८.	उदारता से	स्वर्ग	१८.	स्वर्ग लोक के
			भोगान् बुभुजे	१९.	भोगों का भोग किया

श्लोकार्थ—तदनन्तर उस अप्सरा का मन वीरों के अधिपति उस राजा की बुद्धि, स्वभाव, सौन्दर्य, अवस्था, शोभा और उदारता से खिच गया था। अतः उस अप्सरा ने जम्बूद्वीप के स्वामी उस राजा आग्नीध्र के साथ कई हजार वर्षों से युक्त समय तक पृथ्वी लोक, स्वर्ग लोक और भोगों का भोग किया ॥

एकोनविंशः श्लोकः

तस्यामु ह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिम्पुरुषहरिवर्षे लावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत् ॥१९॥

पदच्छेद—तस्याम् उ ह वा आत्मजान् सः राजवरः आग्नीध्रः नाभि किम्पुरुष हरिवर्ष इलावृत रम्यक हिरण्मय कुरुभद्राश्वकेतुमाल संज्ञान् नव पुत्रान् अजनयत् ॥

शब्दार्थ—

तस्याम्	४.	उस अप्सरा से	रम्यक	८.	रम्यक
उ ह	१४.	अलौकिक प्रसिद्ध (और)	हिरण्मय	९.	हिरण्मय
वा	१	तदनन्तर	कुरु	१०.	कुरु
आत्मजान्	१५	अपने	भद्राश्व	११.	भद्राश्व और
सः राजवर	२.	उस श्रेष्ठ राजा	केतुमाल	१२.	केतुमाल
आग्नीध्रः	३.	आग्नीध्र ने	संज्ञान्	१३.	नाम के
नाभि किम्पुरुष	५.	नाभि किम्पुरुष	नव	१६.	नौ
हरिवर्ष	६.	हरिवर्ष	पुत्रान्	१७.	पुत्रों को
इलावृत	७.	इलावृत	अजनयत् ॥	१८.	उत्पन्न किया

श्लोकार्थ—तदनन्तर उस श्रेष्ठ राजा आग्नीध्र ने उस अप्सरा से नाभि, किम्पुरुष हरिवर्ष, इलावर्त, रम्यक, हिरण्मय, कुरु, भद्राश्व और केतुमाल नाम के नौ पुत्रों को उत्पन्न किया ॥

विंशः श्लोकः

सा सूत्वाथ सुतान्नवानुवत्सरं गृह एवापहाय पूर्वचित्तिर्भूय एवाजं देवमुपतस्थे ॥२०॥

पदच्छेद—सा सूत्वा अथ सुतान् नव अनुवत्सरम् गृह एव अपहाय पूर्वचित्तिः भूय एव अजम् देवम्-उपतस्थे ॥

शब्दार्थ—

सा	२.	उस अप्सरा ने	अपहाय	९.	छोड़कर
सूत्वा	६.	उत्पन्न करके	पूर्वचित्तिः	१.	पूर्व चित्ति नाम की
अथ	७.	तदनन्तर	भूयः	१०.	फिर से
सुतान्	५.	पुत्रों को	एव	१३.	ही
नव	४.	नौ	अजम्	१२.	ब्रह्मा जी की
अनुवत्सरम्	३.	एक-एक वर्ष में	देवम्	११.	भगवान्
गृह एव	८.	घर में ही	उपतस्थे ॥	१४.	सेवा में उपस्थित हो गई

श्लोकार्थ—पूर्व चित्ति नाम की उस अप्सरा ने एक-एक वर्ष में नौ पुत्रों को उत्पन्न करके तदनन्तर घर में ही छोड़कर फिर से भगवान् ब्रह्मा जी की सेवा में उपस्थित हो गई ॥

एकविंशः श्लोकः

आग्नीध्रसुतास्ते मातुरनुग्रहादौत्पत्तिकेनैव संहननबलोपेताः पित्रा विभक्ता आत्मतुल्यनामानि यथाभागं जम्बूद्वीपवर्षाणि बुभुजुः ॥२१॥

पदच्छेद—आग्नीध्र सुताः ते मातुः अनुग्रहात् औत्पत्तिकेन एव संहनन बल उपेताः ।
पित्रा विभक्ताः आत्मतुल्य नामानि यथा भागम् जम्बूद्वीप वर्षाणि बुभुजे ॥

शब्दार्थ—

आग्नीध्र	७.	राजा आग्नीध्र के	पित्रा	१२.	पिता के द्वारा
सुताः	९.	पुत्रों ने	विभक्ताः	१३.	बाँट कर दिये गये
ते	८.	उन	आत्मतुल्य	१४	अपने समान
मातुः	१.	माता पूर्व चित्ति की	नामानि	१५.	नाम वाले
अनुग्रहात्	२.	कृपा से	यथा	१०.	अपने
औत्पत्तिकेन	३.	जन्म से	भागम्	११.	भाग के अनुसार
एव	४.	ही	जम्बूद्वीप	१६.	जम्बूद्वीप
संहनन्	५.	पुष्ट अंग और	वर्षाणि	१७.	भूखण्डों का
बलउपेताः।	६.	पराक्रम से युक्त	बुभुजे ॥	१८.	शासन किया

श्लोकार्थ—माता पूर्वचित्ति की कृपा से जन्म से ही पुष्ट अंग और पराक्रम से युक्त राजा आग्नीध्र के उन पुत्रों ने अपने भाग के अनुसार पिता के द्वारा बाँट कर दिये गये अपने समान नाम वाले जम्बूद्वीप के भूखण्डों का शासन किया ॥

द्वाविंशः श्लोकः

आग्नीध्रो राजातृप्तः कामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याः सलोकतां श्रुतिभिरवारुन्ध यत्र पितरो मादयन्ते ॥२२॥

पदच्छेद—आग्नीध्रः राजा अतृप्तः कामानाम् अप्सरसम् एव अनुदिनम् अधिमन्यमानः तस्याः सलोकताम् श्रुतिभिः अवारुन्ध यत्र पितरो मादयन्ते ॥

शब्दार्थ—

आग्नीध्रः	४.	आग्नीध्र	तस्याः	९.	उस अप्सरा के
राजा	३.	राजा	सलोकताम्	१०.	लोक को
अतृप्तः	२.	तृप्त न होकर	श्रुतिभिः	८	शास्त्रों से वर्णित
कामानाम्	१.	भोगों से	अवारुन्ध	११.	प्राप्त किया
अप्सरसम् एव	६.	अप्सरा का ही	यत्र	१२.	जहाँ पर
अनुदिनम्	५.	प्रतिदिन	पितरो	१३.	पितर गण
अधिमन्यमानः	७.	चिन्तन करता हुआ	मादयन्ते ॥	१४.	प्रसन्न रहते हैं

श्लोकार्थ—भोगों से तृप्त न होकर राजा आग्नीध्र प्रतिदिन अप्सरा का ही चिन्तन करता हुआ शास्त्रों से वर्णित उस अप्सरा के लोक को प्राप्त किया, जहाँ पर पितरगण प्रसन्न रहते हैं ॥

त्रयोविंशः श्लोक

सम्परेते पितरि नव भ्रातरो मेरुदुहितॄर्मेरुदेवीं प्रतिरूपामुग्रदंष्ट्रीं लतां रम्यां श्यामां नारीं भद्रां देववीतिमिति संज्ञा नवोदवहन् ॥२३॥

पदच्छेद—

सम्परेते पितरि नव भ्रातरः मेरु दुहितॄः मेरुदेवीम् प्रतिरूपाम् उग्रदंष्ट्रीम् लताम् रम्याम् श्यामाम् नारीम् भद्राम् देववीतिम् इति संज्ञा नव उदवहन् ॥

शब्दार्थ—

सम्परेते	२.	मृत्यु को प्राप्त हो जाने पर	लताम्	८.	लता
पितरि	१.	पिता आग्नीध्र के	रम्याम्	९.	रम्या
नव	३.	नौ	श्यामाम्	१०.	श्यामा
भ्रातरः	४.	भाइयों ने	नारीम् भद्रा	११.	नारी भद्रा और
मेरु	१५.	राजा मेरु की	देववीतिम्	१२.	देववीति
दुहितॄः	१७.	पुत्रियों से	इति	१३.	इन
मेरुदेवीम्	५.	मेरु देवी	संज्ञा	१४.	नामों वाली
प्रतिरूपाम्	६.	प्रतिरूपा	नव	१६.	नव
उग्रदंष्ट्रीम्	७.	उग्रदंष्ट्री	उदवहन् ॥	१८.	विवाह किया

श्लोकार्थ—पिता आग्नीध्र के मृत्यु को प्राप्त हो जाने पर नौ भाइयों ने मेरुदेवी, प्रतिरूपा, उग्रदंष्ट्री, लता, रम्या, श्यामा, नारी, भद्रा और देववीति इन नामों वाली राजा मेरु की नव कन्यायों से विवाह किया ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पंचमे स्कन्धे आग्नीध्र-वर्णनं नाम द्वितीयोऽध्यायः ॥२॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

पञ्चमः स्कन्धः

तृतीयः अध्यायः

प्रथमः श्लोकः

श्रीशुक उवाच—

—नाभिरपत्यकामोऽप्रजया मेरुदेव्या
भगवन्तं यज्ञपुरुषमवहितात्मायजत ॥१॥

पदच्छेद—

नाभिः अपत्यकामः अप्रजया मेरुदेव्या ।
भगवन्तम् यज्ञपुरुषम् अवहित आत्मा अयजत ॥

शब्दार्थ—

नाभिः	२. राजा नाभि ने	भगवन्तम्	६. भगवान्
अपत्य	३. पुत्र की	यज्ञपुरुषम्	७. यज्ञपुरुष का
कामः	४. कामना से	अवहित	८. सावधान
अप्रजया	१. सन्तान न होने के कारण	आत्मा	९. मन से
मरुदेव्या ।	५. मेरु देवी के साथ	अयजत ॥	१०. यज्ञ किया

श्लोकार्थ—सन्तान न होने के कारण राजा नाभि ने पुत्र की कामना से मेरु देवी के साथ भगवान् यज्ञ पुरुष का सावधान मन से यज्ञ किया ॥

द्वितीयः श्लोकः

तस्य ह वाव श्रद्धया विशुद्धभावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्यदेशकालमन्त्रर्त्विग्दक्षिणाविधानयोगोपपत्त्या दुरधिगमोऽपि भगवान् भागवतवात्सल्यतया सुप्रतीक आत्मानमपराजितं निजजनाभिप्रेतार्थविधित्सया गृहीतहृदयो हृदयङ्गमं मनोनयनानन्दनावयवाभिराममाविश्चकार ॥२॥

पदच्छेद—तस्य ह वाव श्रद्धया विशुद्ध भावेन यजतः प्रवर्ग्येषु प्रचरत्सु द्रव्य देश काल मन्त्र ऋत्विग् दक्षिणा विधान योग उपपत्त्या दुरधिगमः अपि भगवान् भागवत वात्सल्यतया सुप्रतीकः आत्मानम् अपराजितम् निजजन अभिप्रेत अर्थ विधित्सया गृहीत हृदयः हृदयङ्गमम् मनोनयन आनन्दन अवयव अभिरामम् अविश्चकार ॥

शब्दार्थ—

तस्य	३.	वे राजा नाभि	अपि	८.	यद्यपि
ह	२.	कि	भगवान्	९.	भगवान् श्री हरि का
वाव	१.	प्रसिद्ध है	भागवत	२१.	भक्तों पर
श्रद्धया	४.	श्रद्धा (और)	वात्सल्यतया	२३.	स्नेह होने के कारण
विशुद्ध	५.	विशुद्ध	सुप्रतीकः	३०.	सुन्दर रूप वाले श्री हरि ने
भावेन	६.	मन से	आत्मानम्	२४.	अपने
यजत	७.	यज्ञ कर रहे थे	अपराजितम्	३१.	स्वतंत्र
प्रवर्ग्येषु	१०.	उसमें प्रवर्ग्य नामक कर्म का	निजजन	२५.	भक्तों के
प्रचरत्सु	११.	अनुष्ठान हो रहा था	अभिप्रेत अर्थ	२६.	मनोरथों को
द्रव्य	१२.	सामग्री	विधित्सया	२७.	पूर्ण करने की इच्छा से
देश	१३.	स्थान	गृहीत	२९.	खिच जाता है
काल	१४.	मुहूर्त	हृदयः	२८.	उनका हृदय (अतः)
मन्त्र	१५.	मन्त्र	हृदयङ्गमम्	३२.	सुखकारी (तथा)
ऋत्विग्	१६.	यज्ञकर्ता	मनो	३३.	मन (और)
दक्षिणा	१२.	दक्षिणा	नयन	३४.	नेत्रों को
विधान	१८.	पद्धति के	आनन्दन	३५.	आनन्द देने वाले
योग	१९.	योग की	अवयव	३६.	अङ्गों से
उपपत्त्या	२०.	सिद्धि होने पर भी	अरिामम्	३७.	मनोहर रूप को वहाँ
दुरधिगमः	२१.	दुर्लभ है (फिर भी)	आविश्चकार ॥	३८.	प्रकट किया

श्लोकार्थ—प्रसिद्ध है कि वे राजा नाभि विशुद्ध मन से यज्ञ कर रहे थे। यद्यपि भगवान् श्री हरि का उसमें प्रवर्ग्य नामक कर्म का अनुष्ठान हो रहा था। जो सामग्री, स्थान, मुहूर्त, मन्त्र, यज्ञकर्ता, दक्षिणा पद्धति के योग की सिद्धि होने पर भी दुर्लभ है। फिर भी भक्तों पर स्नेह होने के कारण अपने भक्तों के मनोरथों को पूर्ण करने की इच्छा से उनका हृदय खिच जाता है। अतः सुन्दर रूप वाले श्री हरि ने स्वतंत्र, सुखकारी तथा मन और नेत्रों को आनन्द देने वाले अङ्गों से मनोहर रूप को वहाँ प्रकट किया ॥

तृतीयः श्लोकः

अथ ह तमाविष्कृतभुजयुगलद्वयं हिरण्मयं पुरुषविशेषं कपिशकौशेयाम्बरधरमुरसि विलसच्छ्रीवत्सललामं दरवरवनरुहवनमालाच्छूर्यमृतमणिगदादिभिरुपलक्षितं स्फुटकिरणप्रवरमुकुटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितमृत्विक्सदस्यगृहपतयोऽधना इवोत्तमधनमुपलभ्य सबहुमानमर्हणेनावनतशीर्षाण उपतस्थुः ॥३॥

पदच्छेद—अथ ह तम् आविष्कृत भुज युगल द्वयम् हिरण्मयम् पुरुषविशेषम् कपिश कौशेय अम्बर धरम् उरसि विलसत् श्रीवत्स ललामम् दरवरवनरुह वनमाला अच्छूरि अमृतमणिगदा आदिभिः उपलक्षितम् स्फुट किरण प्रवर मुकुट कुण्डल कटक कटिसूत्र हार केयूर नूपुर आदि अङ्ग भूषण विभूषितम् ऋत्विक् सदस्य गृहपतयः अधना इव उत्तमधनम् उपलभ्य सबहुमानम् अर्हणेन अवनत शीर्षाणः उपतस्थुः ॥

शब्दार्थ—

अथ	१. उस समय	स्फुटकिरण	२०. चमकती किरणों वाली
ह	२. प्रसिद्ध है कि	प्रवर	२१. मणियों से निर्मित
तम्	३५. उन यज्ञ भगवान् का	मुकुट	२२. मुकुट
आविष्कृत	७. दिखलाई दे रही थीं	कुण्डल	२३. कुण्डल
भुज	६. भुजायें	कटककटिसूत्र	२४. कङ्कण करधनी
युगल द्वयम्	५. चार (दो जोडे)	हारकेयूर	२५. मणियों का हार बाजूबन्द
हिरणमयम्	४. तेजोमय रूप में	नूपुर आदि	२६. पायजेब इत्यादि
पुरुष विशेषम्	३. भगवान् पुरुषोत्तम के	अङ्ग भूषण	२७. आभूषणों से
कपिश	८. (वे) पीले वर्ण का	विभूषितम्	२८. वे सुन्दर लग रहे थे
कौशेय	९. रेशमी	ऋत्विक् सदस्य	३३. यज्ञकर्ता होता
अम्बरधरम्	१०. वस्त्र धारण किये थे (उनके)	गृह पतयः	३४. यजमान
उरसि	११. वक्षः स्थल पर	अधना	३०. निर्धन
विलसत्	१४. सुशोभित हो रहा था (तथा)	इव	२९. जैसे
श्रीवत्स	१२. श्रीवत्स का	उत्तम धनम्	३१. बहुमूल्य सम्पत्ति
ललामम्	१३. चिह्न	उपलभ्य	३२. पाकर (प्रसन्न होता है) वैसे ही
दरवरवनरुह	१५. श्रेष्ठ शंख कमल	सबहुमानम्	३६. बड़े आदर के साथ
वनमाला	१६. वनमाला	अर्हणेन	३९. अर्घ्य इत्यादि से
अच्छूरि अमृतमणि	१७. चक्र कौस्तुभमणि (और)	अवनत	३८ झुका कर
गदा आदिभिः	१८. गदा इत्यादि आयुध	शीर्षाणः	३७. मस्तक
अलक्षितम्	१९. दिखाई पड़ रहे थे	उपतस्थुः ॥	४०. पूजन किया

श्लोकार्थ—उस समय प्रसिद्ध है कि भगवान् पुरुषोत्तम के तेजोमय रूप में चार भुजायें दो जोड़े दिखलाई दे रही थीं। वे पीले वर्ण का रेशमी वस्त्र धारण किये थे। उनके वक्षः स्थल पर श्रीवत्स का चिह्न सुशोभित हो रहा था। तथा श्रेष्ठ शंख, कमल, वनमाला, चक्र, कौस्तुभमणि और गदा इत्यादि आयुध दिखाई पड़ रहे थे। चमकती किरणों वाली मणियों से निर्मित मुकुट, कुण्डल, कङ्कण, करधनी, मणियों का हार, बाजूबन्द, पायजेब इत्यादि आभूषणों से वे सुन्दर लग रहे थे। जैसे निर्धन बहुमूल्य सम्पत्ति पाकर प्रसन्न होता है वैसे ही यज्ञकर्ता, होता, यजमान ने उन यज्ञ भगवान् का बड़े आदर के साथ मस्तक झुकाकर अर्घ्य इत्यादि से पूजन किया ॥

चतुर्थः श्लोकः

ऋत्विज ऊचुः—अर्हसि मुहुरर्हत्तमार्हणमस्माकमनुपथानां नमो नम इत्येतावत्सदुपशिक्षितं कोऽर्हति पुमान् प्रकृतिगुणव्यतिकरमतिरनीश ईश्वरस्य परस्य प्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभी रूपनिरूपणम् ॥४॥

पदच्छेद—अर्हसि मुहुः अर्हत्तम अर्हणम् अस्माकम् अनुपथानाम् नमो नमः इति एतावत् सद उपशिक्षितम् कः अर्हति पुमान् प्रकृति गुण व्यतिकर मतिः अनीशः ईश्वरस्य परस्य प्रकृति पुरुषयोः अर्वाक्तनाभिः नामरूप आकृतिभिः रूप निरूपणम् ॥

शब्दार्थ—

अर्हसि	५.	स्वीकार करें (क्योंकि)	गुण	१२.	सत्त्वादि गुणों के
मुहुः	४.	बार-बार	व्यतिकर	१३.	प्रपञ्च में
अर्हणम्	१.	हे पूज्यतम आप	मतिः	१४.	बुद्धि रखने वाला
अर्हत्तम	३.	पूजन को	अनीशः	१५.	असमर्थ
अस्माकम्	२.	हमारे	ईश्वरस्य	२४.	सर्वसमर्थ आपके
अनुपथानाम्	६.	हम सेवकों को	परस्य	२३.	परे
नमो नमः	८.	नमो नमः	प्रकृति	२१.	प्रकृति और
इति एतावत्	९.	यही शब्द केवल	पुरुषयोः	२२.	पुरुष से
सद्	७.	महापुरुषों ने	अर्वाक्तनाभिः	१८.	संसार के
उपशिक्षितम्	१०.	सिखाया है (अतः)	नामरूप	१९.	नाम रूप और
कः	१६.	कौन	आकृतिभिः	२०.	आकारों से
अर्हति	२७.	कर सकता है	रूप	२५.	स्वरूप का
पुमान्	१७.	पुरुष	निरूपणम्	२६.	वर्णन
प्रकृतिः ॥	११.	प्रकृति के			

श्लोकार्थ—हे पूज्यतम ! आप हमारे पूजन को बार-बार स्वीकार करें। क्योंकि हम सेवकों को महापुरुषों ने नमो नमः यही शब्द केवल सिखाया है। अतः प्रकृति के सत्त्वादि गुणों के प्रपञ्च में बुद्धि रखने वाला असमर्थ कौन पुरुष संसार के नामरूप और आकारों से प्रकृति और पुरुष से परे सर्वसमर्थ आपके स्वरूप का वर्णन कर सकता है ॥

पञ्चमः श्लोकः

सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृते ॥५॥

पदच्छेद—

सकल जन निकाय वृजिन निरसन शिवतम
प्रवर गुण गण एकदेश कथनात् ऋते ॥

शब्दार्थ—

सकलजन	२.	सम्पूर्ण प्राणियों के	प्रवर	७.	उत्तम
निकाय	३.	समूह के	गुण गण	८.	गुणों के समूह के
वृजिन	४	अपराध को	एक देश	९.	एक भाग का
निरसन	५.	दूर करने वाले	कथनात्	१०.	कथन कर सकता है
शिवतम	६.	अत्यन्त कल्याण कर	ऋते ॥	१.	यह मनुष्य केवल

श्लोकार्थ—यह मनुष्य केवल सम्पूर्ण प्राणियों के समूह के अपराध को दूर करने वाले अत्यन्त कल्याण कर उत्तम गुणों के समूह के एक भाग का कथन कर सकता है ॥

षष्ठः श्लोकः

परिजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादूर्वाङ्कुरैरपि सम्भृतया सपर्यया किल परम परितुष्यसि ॥६॥

पदच्छेद—

परिजन अनुराग विरचित शबल संशब्द सलिल सित किसलय-
तुलसिका दूर्वा अङ्कुरैः अपि सम्भृतया सपर्यया किल परम परितुष्यसि ॥

शब्दार्थ—

परिजन	२.	भक्तों के द्वारा	तुलसिका	१०.	तुलसी (और)
अनुराग	३.	भक्ति से	दूर्वाङ्कुरैः	११.	दूब के अंङ्कुर से
विरचित	४.	की जाती हुई	अपि	१२.	भी
शबल	५.	करुणा पूर्ण	सम्भृतया	१३.	सम्पादित
संशब्द	६.	स्तुति	सपर्यया	१४.	पूजा के
सलिल	७.	जल	किल	१५.	अवश्य
सित	८.	शुद्ध	परम	१.	हे पुरुषोत्तम आप
किसलय	९.	पल्लव	परितुष्यसि ॥	१६.	प्रसन्न होते हैं

श्लोकार्थ—हे पुरुषोत्तम ! आप भक्तों के द्वारा भक्ति से की जाती हुई करुणापूर्ण स्तुति, जल, शुद्ध पल्लव, तुलसी और दूब के अंङ्कुर से भी सम्पादित पूजा से अवश्य प्रसन्न होते हैं ॥

सप्तमः श्लोकः

अथानयापि न भवत इज्ययोरुभारभरया समुचितमर्थमिहोपलभामहे ॥७॥

पदच्छेद— अथ अनया अपि न भवतः इज्यया उरुभार भरया
समुचितम् अर्थम् इह उपलभामहे ॥

शब्दार्थ—

अथ	१. हे भगवान् फिर भी	उरुभार	३.	अनेक प्रकार की सामग्रियों से
अनया	५. इस	भरया	४.	परिपूर्ण
अपि	७. भी	समुचितम्	९.	विशेष
न	११. नहीं	अर्थम्	१०.	प्रयोजन
भवतः	८. आपका कोई	इह	२.	यहाँ
इज्यया	६. यज्ञ पूजन से	उपलभामहे ॥	१२.	देखते हैं

श्लोकार्थ—हे भगवन् ! फिर भी यहाँ अनेक प्रकार की सामग्रियों से परिपूर्ण इस यज्ञ पूजन से भी आपका कोई विशेष प्रयोजन नहीं देखते हैं ।

अष्टमः श्लोकः

आत्मन एवानुसवनमञ्जसाव्यतिरेकेण बोभूयमानाशेषपुरुषार्थस्वरूपस्य किन्तु नाथाशिष आशासानानामेतदभिसंराधनमात्रं भवितुमर्हति ॥८॥

पदच्छेद—आत्मनः एव अनुसवनम् अञ्जसा अव्यतिरेकेण बोभूयमान अशेष पुरुषार्थ स्वरूपस्य किन्तु नाथ आशिषः आशासानानाम् एतद् अभिसंराधन मात्रम् भवितुम् अर्हति ।

शब्दार्थ—

आत्मनः	६. स्वतः	किन्तु	११. फिर भी
एव	७. ही	नाथ	१. हे स्वामी यद्यपि आप
अनुसवनम्	८. सर्वदा	आशिषः	१२. कामनाओं की
अञ्जसा	९. साक्षात्	आशासानानाम्	१३. इच्छा रखने वाले हम लोगों लिये
अव्यतिरेकेण	२. निरन्तर	एतद्	१४. यह
बोभूयमान	३. अत्यधिकरूप में उत्पन्न होने वाले	अभिसंराधन	१५. आराधना ही
अशेष	४. सम्पूर्ण	मात्रम्	१६. केवल
पुरुषार्थ	५. पुरुषार्थों के	भवितुम्	१७. कल्याणकारी साधन
स्वरूपस्य	१०. स्वरूप हैं	अर्हति ॥	१८. हो सकता है

श्लोकार्थ—हे स्वामी ! यद्यपि आप निरन्तर अत्यधिक रूप में उत्पन्न होने वाले सम्पूर्ण पुरुषार्थों के स्वतः ही सर्वदा साक्षात् स्वरूप हैं । फिर भी कामनाओं की इच्छा रखने वाले हम लोगों के लिये यह आराधना ही केवल कल्याणकारी साधन हो सकता है ॥

नवमः श्लोकः

तथ्यथा बालिशानां स्वयमात्मनः श्रेयः परमविदुषां परमपरमपुरुष प्रकर्षकरुणया स्वमहिमानं चापवर्गाख्यमुपकल्पयिष्यन् स्वयं नापचित एवेतरवदिहोपलक्षितः ॥९॥

पदच्छेद—तद् यथा बालिशानाम् स्वयम् आत्मनः श्रेयः परम विदुषाम् परम परम पुरुष प्रकर्ष करुणया स्वमहिमानम् च अपवर्ग आख्यम् उपकल्पयिष्यन् स्वयम् न अप चित एव इतरवत् इह उपलक्षितः ॥

शब्दार्थ—

तद्	८.	उसी प्रकार	च अपवर्ग	११.	और मोक्ष
यथा	३.	जैसे	आख्यम्	१२.	नाम की (परम वस्तु को)
बालिशानाम्	६.	मूढ बुद्धि लोगों को	उपकल्पयिष्यन्	१३.	देते हुये
स्वयम्	५.	अपने आप	स्वयम्	१४.	अपने आप
आत्मनः श्रेयः	७.	आत्मा का परम कल्याण बताते हैं	न अपचितः	१६.	अपूजित
परम विदुषाम्	४.	महान् ज्ञानी पुरुष	एव	१८.	ही
परम	२.	हे पुरुषोत्तम	इतरवत्	१७.	दूसरे लोगों की तरह
परम पुरुष	१.	हे परात्पर	इह	१५.	यहाँ यज्ञ में
प्रकर्ष करुणया	९.	अपार करुणा से	उपलक्षितः ॥	२०.	प्रकट हुये हैं
स्व महिमानम्	१०.	अपनी महिमा को			

श्लोकार्थ—हे परात्पर ! हे पुरुषोत्तम ! जैस महान् ज्ञानी पुरुष अपने आप मूढ बुद्धि लोगों को आत्मा का परम कल्याण बताते हैं। उसी प्रकार अपार करुणा से अपनी महिमा को और मोक्ष नाम को परम वस्तु को देते हुये अपने आप यहाँ यज्ञ में अपूजित दूसरे लोगों की तरह ही प्रकट हुये हैं ॥

दशमः श्लोकः

अथायमेव वरो ह्यर्हत्तम यर्हि बर्हिषि राजर्षेर्वरदर्षभो भवान्निजपुरुषेक्षणविषय आसीत् ॥१०॥

पदच्छेद—अथ अयम् एव वरः हि अर्हत्तम यर्हि बर्हिषि राजर्षेः वरदऋषभः भवान् निज पुरुष ईक्षण विषय आसीत् ॥

शब्दार्थ—

अथ	१.	तथापि	राजर्षेः	५.	राजर्षि नाभि के
अयम्	१२.	यह	वरदऋषभ	४.	वर देने वालों में प्रधान हैं
एव	१३.	ही सब से बड़ा	भवान्	८.	आप
वरःहि	१४.	वरदान है	निजपुरुष	७.	अपने भक्तों को
अर्हत्तम	२.	हे पूज्यतम	ईक्षण	९.	दर्शन
यर्हि	३.	आप	विषय	१०.	दे रहे
बर्हिषि	६.	यज्ञ में	आसीत् ॥	११.	हैं

श्लोकार्थ—तथापि हे पूज्यतम ! आप वर देने वालों में प्रधान हैं। राजर्षि नाभि के यज्ञ में अपने भक्तों को आप दर्शन दे रहे हैं। यह ही सबसे बड़ा वरदान है ॥

एकादशः श्लोकः

असङ्गनिशितज्ञानानलविधूताशेषमलानां भवत्स्वभावानामात्मारामाणां मुनीनामनवरतपरिगुणितगुणगण परममङ्गलायनगुणगणकथनोऽसि ॥११॥

पदच्छेद—असङ्ग निशित ज्ञान अनल विधूत अशेष मलानाम् भवत् स्वभावानाम् आत्मारामाणाम् मुनीनाम् अनवरत परिगुणित गुण गण परम मङ्गलायन गुण गण कथनः असि ॥

शब्दार्थ—

असङ्ग	१. हे भगवन् वैराग्य के कारण	आत्मारामाणाम्	१०. आत्मा में रमण करने वाले
निशित	२. तेज	मुनीनाम्	११. मुनिजन भी
ज्ञान	३. ज्ञानरूपी	अनवरत	१२. निरन्तर
अनल	४ अग्नि से (जिनके)	परिगुणित	१४. वर्णन करते हैं (क्योंकि)
विधूत	७. जल गये हैं (अतः)	गुण-गण	१३. गुणों के समूह का
अशेषम्	५. सारे	परम मङ्गलायन	१७ परम कल्याण का मार्ग
मलानाम्	६. दोष	गुण-गण	१५. आपके गुणों के समूह का
भवत्	८. आपके समान	कथनः	१६. वर्णन ही
स्वभावानाम्	९. स्वभाव वाले (और)	असि ॥	१८. हैं

श्लोकार्थ—हे भगवन् ! वैराग्य के कारण तेज ज्ञानरूपी अग्नि से जिनके सारे दोष जल गये हैं। अतः आपके समान स्वभाव वाले और आत्मा में रमण करने वाले मुनिजन भी निरन्तर गुणों के समूह का वर्णन करते हैं। क्योंकि आपके गुणों के समूह का वर्णन ही परम कल्याण का साधन है ॥

द्वादशः श्लोकः

अथ कथञ्चित्स्खलनक्षुत्पतनजृम्भणदुरवस्थानादिषु विवशानां नः स्मरणाय ज्वरमरणदशायामपि सकलकश्मलनिरसनानि तव गुणकृतनामधेयानि वचनगोचराणि भवन्तु ॥१२॥

पदच्छेद—अथ कथञ्चित् स्खलन क्षुत् पतनजृम्भणदुरवस्थान आदिषु विवशानाम् नः स्मरणाय ज्वर मरणदशायामपि सकलकश्मल निरसनानि तव गुण कृत नाम धेयानि वचन गोचराणि भवन्तु ॥

शब्दार्थ—

अथ	१. तथापि हे भगवन्	ज्वर मरण	८. ज्वर मृत्यु की
कथञ्चित्	१०. किसी तरह	दशायाम् अपि	९. स्थिति में भी
स्खलन क्षुत्	४. गिरने में भूख प्यास में	सकल कश्मल	११. सारे पाप दोषों को
पतन जृम्भण	५. ठोकर खाने में जम्भाई में	निरसनानि तव	१२. दूर करने वाले आपके
दुरव स्थान्	६. बुरे समय	गुणकृत	१३. उदारता आदि गुण लीला
आदिषु	७. इत्यादि में भी (तथा)	नामधेयानि	१४. नाम ही
विवशानाम् नः	३. असमर्थ हम लोगों को	वचनगोचराणि	१५. हमारी वाणी से उच्चरित
स्मरणाय	२. आपका स्मरण करने में	भवन्तु ॥	१६. होते रहें

श्लोकार्थ—तथापि हे भगवन् ! आपका स्मरण करने में असमर्थ हम लोगों को गिरने में, भूख प्यास में, ठोकर खाने में, जम्भाई में, बुरे समय इत्यादि में भी तथा ज्वर, मृत्यु की स्थिति में भी किसी तरह सारे पाप दोषों को दूर करने वाले आपके उदारता आदि गुण, लीला और नाम ही हमारी वाणी से उच्चरित होते रहें ॥

त्रयोदशः श्लोकः

किञ्चायं राजर्षिरपत्यकामः प्रजां भवादृशीमाशासान ईश्वरमाशिषां स्वर्गापवर्गयोरपि भवन्तमुपधावति प्रजायामर्थप्रत्ययो धनदमिवाधनः फलीकरणम् ॥१३॥

पदच्छेद—किञ्च अयम् राजर्षिः अपत्यकामः प्रजाम् भवादृशीम् आशासानः ईश्वरम् आशिषाम् स्वर्ग अपवर्गयोः अपि भवन्तम् उपधावति प्रजायाम् अर्थ प्रत्ययः धनदम् इव अधनः फलीकरणम् ॥

शब्दार्थ—

किञ्च	१. हमारी बात है	स्वर्ग अपवर्गयोः	९. स्वर्ग और मोक्ष को
अयम्	२. कि यह	अपि	१०. भी
राजर्षिः	३. राजर्षि नाभि	भवन्तम्	१२. आपके
अपत्यकामः	४. सन्तान की कामना से	उपधावति	१३. पास आये हैं
प्रजाम्	६. पुत्र	प्रजायाम्	१७. इन्होंने पुत्र को ही
भवादृशीम्	५. आपके समान	अर्थ प्रत्ययः	१८. परम पुरुषार्थ मान रक्खा है
आशासानः	७. चाहते हैं (अतः)	धनदम्	१६. धनी पुरुष के पास जाता है
ईश्वरम्	११. देने में समर्थ	इव अधनः	१४. जैसे निर्धन
आशिषाम्	८ कामनाओं	फलीकरणम् ॥	१५. चावल की कनी के लिये

श्लोकार्थ—हमारी बात है कि राजर्षिनाभि सन्तान की कामना से आपके समान पुत्र चाहते हैं। अतः कामनाओं, स्वर्ग और मोक्ष को भी देने में समर्थ आपके पास आये हैं जैसे निर्धन चावल की कनी के लिये धनी पुरुष के पास जाता है। इन्होंने पुत्र को ही परम पुरुषार्थ मान रक्खा है ॥

चतुर्दशः श्लोकः

को वा इह तेऽपराजितोऽपराजितया माययानवसितपदव्यानावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः ॥१४॥

पदच्छेद—कः वा इह ते अपराजितः अपराजितया मायया अनवसित पदव्या अनावृत मतिः विषय विषरय अनावृत प्रकृतिः अनुपासित महत् चरणः ॥

शब्दार्थ—

कः	४. कौन पुरुष	अनावृत	१२. आसक्त नहीं है उसका
वा इह	१. अथवा इस संसार में (जिसने)	मतिः	११. बुद्धि
ते	५. आपकी	विषय	१४. शब्दादि विषयरूपी
अपराजितः	१०. वश में नहीं हुआ है (उसकी)	विष रय	१५. विष के प्रभाव से
अपराजितया	८. अजेय	अनावृत	१६. रहित है
मायया	९. माया के	प्रकृतिः	१३. स्वभाव
अनवसित	६. अलक्षित	अनुपासित	३. उपासना नहीं की है (ऐसा)
पदव्या	७ स्वरूप वाली	महत् चरणः ॥	२. महापुरुषों के चरणों की

श्लोकार्थ—अथवा इस संसार में जिसने महापुरुषों के चरणों की उपासना नहीं की है, ऐसा कौन पुरुष आपकी अलक्षित स्वरूप वाली अजेय माया के वश में नहीं हुआ है ? उसकी बुद्धि आसक्त नहीं है ? उसका स्वभाव शब्दादि विषयरूपी विष के प्रभाव से रहित है ? ॥

पञ्चदशः श्लोकः

यदु ह वाव तव पुनरदभ्रकर्तरिह समाहूतस्तत्रार्थधियां मन्दानां नस्तद्यद्देवहेलनं देवदेवार्हसि साम्येन सर्वान् प्रतिवोढुमविदुषाम् ॥१५॥

पदच्छेद—यद् उ ह वाव तव पुनः अदभ्रकर्तः इह समाहूतः तत्र अर्थधियाम् मन्दानाम् नः तद यद् देवहेलनम् देवदेव अर्हसि साम्येन सर्वान् प्रतिवोढुम् अविदुषाम् ॥

शब्दार्थ—

यद्	५. जो	नः	१०.	हम लोगों ने
उ ह वाव	६. वह अवश्य ही	तद्	१२.	उसे
तव	३. आपको	यद् देवहेलनम्	११.	जो आपका अपमान किया है
पुनः	२. फिर से	देवे वेव	१३.	हे देवाधिदेव
अदभ्रकर्तः	१. बहुत कार्य करने वाले (हे भगवन्)	अर्हसि	१८.	समर्थ हैं
इह समाहूतः	४. इस यज्ञ में बुलाया है	साम्येन	१५.	समता के कारण
तत्र	७. उस पुत्र कामना में	सर्वान्	१४.	सब के प्रति
अर्थ धियाम्	८. बुद्धि रखने वाले	प्रतिवोढुम्	१७.	सहने में आप
मन्दानाम्	९. मूढ	अविदुषाम् ॥	१६.	अज्ञानियों के अपराध

श्लोकार्थ—बहुत कार्य करने वाले हे भगवन् ! फिर भी आपको इस यज्ञ में बुलाया है। जो वह अवश्य ही उस पुत्र कामना में बुद्धि रखने वाले मूढ हम लोगों ने जो आपका अपमान किया है, उसे हे देवाधिदेव ! सब के प्रति समता के कारण अज्ञानियों के अपराध सहने में आप समर्थ हैं ॥

षोडशः श्लोकः

श्रीशुक उवाच—इति निगदेनाभिष्टूयमानो भगवाननिमिषर्षभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह ॥१६॥

पदच्छेद—इति निगदेन अभिष्टूयमानः भगवान् अनिमिष ऋषभः वर्षधर अभिवादित अभिवन्दित चरणः सदयम् इदम् आह ॥

शब्दार्थ—

इति	९. इस प्रकार	धर	२.	स्वामी राजा नाभि से
निगदेन	१०. स्तोत्र से	अभिवादित	३.	पूज्य ऋत्विजों के द्वारा
अभिष्टूयमानः	११. स्तुति करने पर (उन्होंने)	अभिवन्दित	७.	पूजित
भगवान्	६. भगवान् श्री हरि के	चरणः	८.	चरणों को
अनिमिष	४. देवताओं में	सदयम्	१२.	कृपा पूर्वक
ऋषभः	५. श्रेष्ठ	इदम्	१३.	यह
वर्ष	१. भारत वर्ष के	आह ॥	१४.	कहा

श्लोकार्थ—भारत वर्ष के स्वामी राजा नाभि से पूज्य ऋत्विजों के द्वारा देवताओं में श्रेष्ठ भगवान् श्री हरि के पूजित चरणों को इस प्रकार स्तोत्र से स्तुति करने पर उन्होंने कृपा पूर्वक यह कहा ॥

सप्तदशः श्लोकः

श्रीभगवानुवाच—अहो बताहमृषयो भवद्भिरवितथगीर्भिर्वरमसुलभमभियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कैवल्यादथापि ब्रह्मवादो न मृषा भवितुमर्हति ममैव हि मुखं यद् द्विजदेवकुलम् ॥१७॥

पदच्छेद—

अहो बत अहम् ऋषयः भवद्भिः अवितथ गीर्भिः वरम् असुलभम् अभियाचितः यद् अमुष्य आत्मजः मया सदृशः भूयादिति मम अहम् एव अभिरूपः कैवल्याद् अथापि ब्रह्मवादः न मृषा भवितुम् अर्हसि मम एव हि मुखम् यद् द्विज देव कुलम् ॥

शब्दार्थ—

अहो	६.	आश्चर्य है	एव	१६.	ही हूँ
बत	५.	बड़ा	अभिरूपः	१६.	समान
अहम्	८.	मुझसे	कैवल्याद्	१७.	अद्वितीय होने से
ऋषयः	१.	हे ऋषियों	अथापि	२०.	फिर भी
भवद्भिः	२.	आप लोगों का	ब्रह्मवादः	२१.	ब्राह्मणों का वचन
वितथ	४.	सत्य होता है (यह)	न	२३.	नहीं
गीर्भिः	३.	वचन	मृषा	२४.	झूठा
वरम्	१०.	वरदान	भवितुम्	२४.	हो सकता
असुलभम्	६.	अत्यन्त दुर्लभ	अर्हसि	१५.	है
अभियाचित	११.	माँगा है कि	मम	३०.	मेरा
यद्	७.	कि (आप लोगों ने)	एव	३१.	ही
अमुष्यआत्मजः	१२.	राजा नाभि का पुत्र	हि	२६.	क्योंकि
मया सदृशः	१३.	मेरे समान	मुखम्	३२.	मुख है
भूयादिति	१४.	होवे किन्तु	यद्	२७.	जो
मम	१५.	मेरे	द्विजदेव	२८.	ब्राह्मणों का
अहम्	१८.	मैं	कुलम् ॥	२६.	कुल है (वह)

श्लोकार्थ—हे ऋषियों ! आप लोगों का वचन सत्य होता है। यह बड़ा आश्चर्य है, आप लोगों ने मुझसे अत्यन्त दुर्लभ वरदान माँगा है। कि राजा नाभि का पुत्र मेरे समान होवे। किन्तु मेरे समान अद्वितीय होने से मैं ही हूँ। फिर भी ब्राह्मणों का वचन झूठा नहीं हो सकता है। क्योंकि जो ब्राह्मणों का कुल है वह मेरा ही मुख है ॥

अष्टादश श्लोकः

तत आग्नीध्रीयेंऽशकलयावतरिष्याम्यात्मतुल्यमनुपलभमानः ॥१८॥

पदच्छेद—

ततः आग्नीध्रीये अंश कलया अवतरिष्यामि आत्मतुल्यम् अनुपलभमानः ॥

शब्दार्थ—

ततः	४.	इसलिये	अवतरिष्यामि	८.	अवतार लूँगा
आग्नीध्रीये	५.	राजा नाभि के यहाँ	आत्म	१.	मेरे
अंश	६.	अपने अंश	तुल्यम्	२.	समान
कलया	७.	कला से मैं ही	उपलभमानः ॥	३.	कोई नहीं है

श्लोकार्थ—मेरे समान कोई नहीं है। इसलिये राजा नाभि के यहाँ अपने अंशकला से मैं ही अवतार लूँगा ॥

एकोनविंशः श्लोकः

श्रीशुक उवाच—इति निशामयन्त्या मेरुदेव्याः पतिमभिधायान्तर्दधे भगवान् ॥१९॥

पदच्छेद—

इति निशामयन्त्या मेरु देव्याः पतिम्
अभिधाय अन्तर्दधे भगवान् ॥

शब्दार्थ—

इति	१.	इस प्रकार	पतिम्	६.	उनके पति नाभि से ऐसा
निशाम	३.	सुनते	अभिधाय	७.	कहकर
यन्त्या	४.	रहने पर	अन्तर्दधे	८.	अन्तर्धान हो गये
मेरुदेव्याः	२.	महारानी मेरुदेवी के	भगवान् ॥	५.	भगवान् श्री हरि

श्लोकार्थ—इस प्रकार महारानी मेरुदेवी के सुनते रहने पर भगवान् श्री हरि उनके पति नाभि से ऐसा कहकर अन्तर्धान हो गये ॥

विंशः श्लोकः

बर्हिषि तस्मिन्नेव विष्णुदत्त भगवान् परमर्षिभिः प्रसादितो नाभेः प्रियचिकीर्षया तदवरोधायने मेरुदेव्यां धर्मान्दर्शयितुकामो वातरशनानां श्रमणानामृषीणामूर्ध्वमन्थिनां शुक्लया तनुवावततार ॥२०॥

पदच्छेद—

बर्हिषि तस्मिन् एव विष्णुदत्त भगवान् परमर्षिभिः प्रसादितः नाभेः प्रिय चिकीर्षया तद् अवरोधायने मेरु देव्याम् धर्मान् दर्शयितु कामः वातरशनानाम् श्रमणानाम् ऋषीणाम् ऊर्ध्व मन्थिनाम् शुक्लया तनुवा अवततार ॥

शब्दार्थ—

बर्हिषि	४.	यज्ञ में	मेरुदेव्याम्	१४.	मेरुदेवी के गर्भ से (भगवान् ने)
तस्मिन्	२.	उस	धर्मान्	२०.	धर्मों को
एव	३.	ही	दर्शयितु	२१.	दिखाने की
विष्णुदत्त	१.	हे परीक्षित्	कामः	२२.	इच्छा से
भगवान्	७.	भगवान् श्री हरि को	वात रशनानाम्	१५.	दिगम्बर
परम	५.	परम	श्रमणानाम्	१६.	तपस्वियों के
ऋषिभिः	६.	ऋषियों ने	ऋषीणाम्	१८.	ज्ञानी
प्रसादितः	८	प्रसन्न किया	ऊर्ध्व	१६.	बाल
नाभेः	९.	राजा नाभि का	मन्थिनाम्	१७.	ब्रह्मचारी
प्रिय	१०.	प्रिय	शुक्लया	२३.	विशुद्ध सत्त्व
चिकीर्षया	११.	करने की इच्छा से	तनुवा	२४.	शरीर से
तद्	१२.	उनके	अवततार ॥	२५.	अवतार लिया
अवरोधायने	१३.	रनिवास में			

श्लोकार्थ—हे परीक्षित् ! उस ही यज्ञ में परम ऋषियों ने भगवान् श्री हरि को प्रसन्न किया । राजा-नाभि को प्रिय करने की इच्छा से उनके रनिवास में मेरुदेवी के गर्भ से भगवान् ने दिगम्बर, बाल ब्रह्मचारी, ज्ञानी तपस्वियों के धर्मों को दिखाने की इच्छा से विशुद्ध सत्त्व शरीर से अवतार लिया ॥

इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां पञ्चमे स्कन्धे नाभिचरिते ऋषभावतारो नाम तृतीयो ऽध्यायः ॥३॥

ॐ श्रीगणेशाय नमः

श्रीमद्भागवतमहापुराणम्

पंचमः स्कन्धः

चतुर्थः अध्यायः

प्रथमः श्लोकः

श्रीशुक उवाच—अथ ह तमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणं साम्योपशम-वैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावं प्रकृतयः प्रजा ब्राह्मणा देवताश्चावनितलसमवनायातितरां जगृधुः ॥१॥

पदच्छेद—अथ ह तम् उत्पत्त्या एव अभिव्यज्यमान भगवत् लक्षणम् साम्य उपशम वैराग्य ऐश्वर्य महाविभूतिभिः अनुदिनम् एधमान अनुभावम् प्रकृतयः प्रजाः ब्राह्मणाः देवताः च अवनितल समवनाय अतितराम् जगृधुः ॥

शब्दार्थ—

अथ ह	१. तदनन्तर प्रसिद्ध है कि	अनुभावम्	९. प्रभाव
तम् उत्पत्त्या एव	२. उन नाभिनन्दन के शरीर में जन्म से ही	प्रकृतयः	११. मन्त्री वर्ग
अभिव्यज्यमान	४. प्रकट थे	प्रजाः ब्राह्मणाः	१२. प्रजा ब्राह्मण
भगवत् लक्षणम्	३. भगवान् के वज्र अंकुशादि चिह्न	देवताः	१४. देवता
साम्य, उपशम	५. समता शान्ति	च	१३. और
वैराग्य ऐश्वर्य	६. वैराग्य और ऐश्वर्य की	अवनितल	१७. पृथ्वी मण्डल का
महाविभूतिभिः	७. महान् सम्पत्तियों से	समवनाय	१८. शासन करें
अनुदिनम्	८. प्रतिदिन (उनका)	अतितराम्	१५. अत्यन्त
एधमान	१०. बढ़ रहा था	जगृधुः ॥	१६. चाहने लगे कि वे

श्लोकार्थ—तदनन्तर प्रसिद्ध है कि उननाभिनन्दन के शरीर में जन्म से ही भगवान् के वज्र, अंकुशादि चिह्न प्रकट थे। समता, शान्ति, वैराग्य और ऐश्वर्य की महान् सम्पत्तियों से प्रतिदिन उनका प्रभाव बढ़ रहा था। मन्त्री वर्ग, प्रजा, ब्राह्मण और देवता अत्यन्त चाहने लगे थे कि वे पृथ्वी मण्डल का शासन करें ॥

द्वितीयः श्लोकः

तस्य ह वा इत्थं वर्ष्मणा वरीयसा बृहच्छ्लोकेन चौजसा बलेन श्रिया यशसा वीर्यशौर्याभ्यां च पिता ऋषभ इतीदं नाम चकार ॥२॥

पदच्छेद—तस्य ह वा इत्थम् वर्ष्मणा वरीयसा बृहत् श्लोकेन च ओजसा बलेन श्रिया यशसा वीर्यशौर्याभ्याम् च पिता ऋषभः इति इदम् नाम चकार ॥

शब्दार्थ—

तस्य	२. उनके	बलेन श्रिया	९. बल से सौन्दर्य से
ह वाव	१. प्रसिद्ध है कि	यशसा वीर्य	१०. यश से पराक्रम
इत्थम्	३. इस प्रकार	शौर्याभ्याम्	१२ प्रभाव से
वर्ष्मणा	५. शरीर	च	११. और
वरीयसा	४. सुन्दर सुडोल	पिता	१३. पिता राजा नाभि ने (उनका)
बृहत् श्लोकेन	६. महान् कीर्ति से	ऋषभः	१४. ऋषभ
च	७. और	इति इदम्	१५. ऐसा
ओजसा	८. कान्ति से	नाम चकार ॥	१६. नाम रक्खा.

श्लोकार्थ—प्रसिद्ध है कि उनके इस प्रकार सुन्दर सुडोल शरीर से, महान् कीर्ति से और कान्ति से, बल से, सौन्दर्य से, यश से, पराक्रम और प्रभाव से पिता राजा नाभि ने उनका ऋषभ ऐसा नाम रक्खा ॥

तृतीयः श्लोकः

तस्य हीन्द्रः स्पर्धमानो भगवान् वर्षे न ववर्ष तदवधार्य भगवानृषभदेवो योगेश्वरः प्रहस्यात्मयोगमायया स्ववर्षमजनाभं नामाभ्यवर्षत् ॥३॥

पदच्छेद—तस्य हि इन्द्रः स्पर्धमानः भगवान् वर्षे न ववर्ष तद् अवधार्य भगवान् ऋषभ देवः योगेश्वरः प्रहस्य आत्म योग मायया स्व वर्षम् अजनाभम् नाम अभ्यवर्षत् ॥

शब्दार्थ—

तस्य	२.	उनसे	भगवान् ऋषभदेवः	११.	भगवान् ऋषभदेव ने
हि	१.	एक बार	योगेश्वरः	१०.	योगिराज
इन्द्रः	५.	इन्द्र ने	प्रहस्य	१२.	उस पर हंसे (और)
स्पर्धमानः	३.	ईर्ष्या करके	आत्मयोग	१३.	अपनी योग
भगवान्	४.	भगवान्	मायया	१४.	माया के प्रभाव से
वर्षे	६.	भारत वर्ष में	स्ववर्षम्	१५.	अपने भारत वर्ष
न	८.	नहीं की	अजनाभम्	१६.	अजनाभ
ववर्ष	७.	वर्षा	नाम	१७.	नाम के राज्य में खूब
तद् अवधार्य	९.	यह जानकर	अभ्यवर्षत् ॥	१८.	वर्षा की

श्लोकार्थ—एक बार उनसे ईर्ष्या करके भगवान् इन्द्र ने भारत वर्ष में वर्षा नहीं की। यह जान कर योगिराज भगवान् ऋषभदेव ने उस पर हंसे और अपनी योग माया के प्रभाव से अपने भारत वर्ष अजनाभ नाम के राज्य में खूब वर्षा की ॥

चतुर्थः श्लोकः

नाभिस्तु यथाभिलषितं सुप्रजस्त्वमवरुध्यातिप्रमोदभरविह्वलो गद्गदाक्षरया गिरा स्वैरं गृहीतनरलोकसधर्मं भगवन्तं पुराणपुरुषं मायाविलसितमतिर्वत्स तातेति सानुरागमुपलालयन् परां निर्वृतिमुपगतः ॥४॥

पदच्छेद—नाभिः तु यथा अभिलषितम् सुप्रजस्त्वम् अवरुध्य अतिप्रमोदभरविह्वलः गद्गदया अक्षरया गिरा स्वैरम् गृहीत नरलोक सधर्मम् भगवन्तम् पुराण पुरुषम् माया विलसित मतिः वत्स तात इति सानुरागम् उपलालयन् पराम् निर्वृतिम् उपगतः ॥

शब्दार्थ—

नाभिः तु	१.	राजा नाभि तो	गृहीत	१४.	धारण करने वाले
यथा	३	अनुसार	नरलोकसधर्मम्	१३.	मनुष्य के आकार को
अभिलषितम्	२.	अपनी इच्छा के	भगवन्तम्	१६.	भगवान् का
सुप्रजस्त्वम्	४.	सत्पुत्र को	पुराण पुरुषम्	१५.	आदि पुरुष
अवरुध्य	५.	पाकर	मायाविलसितम्	१०.	माया के प्रभाव से युक्त
अति प्रमोदभर	६.	अत्यन्त आनन्द भर जाने से	मतिः	११.	बुद्धि हो जाने से
विह्वलः	७.	विभोर थे (तथा)	वत्स तात इति	१७.	हे वत्स हे तात इस प्रकार
गद्गदयाक्षरम्	८.	गद् गद् शब्दों वाली	सानुरागम्	१८.	बड़े प्रेम से
गिरा	९.	वाणी से	उपलालयन्	१९.	लालन-पालन करते हुये
स्वैरम्	१०.	अपनी इच्छा से	पराम् निर्वृतिम्	२०.	अत्यन्त आनन्द को
			उपगतः ॥	२१.	प्राप्त हुये

श्लोकार्थ—राजा नाभि तो अपनी इच्छा के अनुसार सत्पुत्र को पाकर अत्यन्त आनन्द भर जाने से विभोर थे। तथा गद्-गद् शब्दों वाली वाणी से माया के प्रभाव से युक्त बुद्धि हो जाने से अपनी इच्छा से मनुष्य के आकार को धारण करने वाले आदि पुरुष भगवान् का हे वत्स ! हे तात ! इस प्रकार बड़े प्रेम से लालन-पालन करते हुये अत्यन्त आनन्द को प्राप्त हुये ॥

पञ्चमः श्लोकः

विदितानुरागमापौरप्रकृति जनपदो राजा नाभिरात्मजं समयसेतुरक्षायामभिषिच्य ब्राह्मणेषूपनिधाय सह मेरुदेव्या विशालायां प्रसन्ननिपुणेन तपसा समाधियोगेन नरनारायणाख्यं भगवन्तं वासुदेवमुपासीनः कालेन तन्महिमानमवाप ॥५॥

पदच्छेद—विदित अनुरागम् आपौर प्रकृति जनपदः राजा नाभिः आत्मजम् समयसेतुरक्षायाम् अभिषिच्य ब्राह्मणेषु उपनिधाय सह मेरुदेव्या विशालायाम् प्रसन्न निपुणेन तपसा समाधि योगेन नर नारायण आख्यम् भगवन्तम् वासुदेवम् उपासीनः कालेन तत् महिमानम् अवाप ॥

शब्दार्थ—

विदित	३.	जान लिया कि	विशालायाम्	१७.	बदरिकाश्रम में
अनुरागम्	७.	ऋषभदेव के प्रति प्रेम है (उन्होंने)	प्रसन्न	१८.	हिंसा रहित
आपौर	५.	पुरवासी और	निपुणेन	१९.	कठोर
प्रकृति	६.	मन्त्री वर्ग का अपने पुत्र	तपसा	२०.	तपस्या से (और)
जनपदः	४.	राज्य के	समाधि	२१.	समाधि
राजा	१.	महाराज	योगेन	२२.	योग से
नाभिः	२.	नाभि ने	नर नारायण	२३.	नर और नारायण के
आत्मजम्	८.	अपने पुत्र को	आख्यम्	२४	नाम के
समय	९.	धर्म की	भगवन्तम्	२५.	भगवान्
सेतु	१०.	मर्यादा की	वासुदेवम्	२६.	वासुदेव को
रक्षायाम्	११.	रक्षा करने के लिये	उपासीनः	२७.	उपासना करते हुये
